विक्रम (वर्ष) IX-13
विक्रम (स्थान) I-49
विजय IX-17
विद्या (स्थान) I-50
विद् II-3
विनाशन (स्थान) I-51
विपद् XVIII-25
विभव IX-10
वियोनि III-1
विरोधकृत् IX-21
विरोधी IX-16
विलग्न I-49
विलंबि IX-18
विवास(प्रव्रज्या) XV-15-16
विशाखा IX-42,87
विश्व I-4
विश्वावसु IX-20
विषघटिका IV-112
विषनाडि IX-9
विषप्रदिग्ध (षष्ठ्यंश) I-42
विषु IX-14
विष्कम्भ IX-76,97

विष्टि IX-73,102
विष्णु षष्ठ्यंश) I-40
वीणायोग VII-165,173,179
वीर्य I-49
वृद्धि (योग) IX-98
वृद्धि (स्थान) I-50
वृश्चिक I-6,13,IX-92,95,108
वृषभ I-4,10,IX-91,94,104
वेध XIII-60
वेलाफलम् IX-123-125
वेशियोगः VII-121-122
वेसियोगः VII-121,123
वैधृति IX-76,100
वैनाशिक IX-79
वैशाख IX-29,81
वैशेषिकांश I-44,IV-101,XI-63, XII-51,58,81,92,95,146,XIII-19, 68,82,XIV-102,XV-62
वैश्य I-20
व्यतीपात IX-75,98
व्यय (स्थान) I-52
व्यय (वर्ष) IX-15
व्ययादिहरण V-9,10
व्याघात IX-98
व्यापार (स्थान) I-52
व्यालद्रेष्काण IV-45,V-55,V.A-13

श

शकटयोग VII-108,109,164,168,175
शकुन(करण) IX-103
शक्त (अवस्था) II-16,17,XVIII-32
शक्तियोग VII-164,170,177
शङ्खयोग XII-138-139
शतभिषक् IX-44,89
शत्रु (ग्रह) II-45
शत्रु (स्थान) I-50
शत्रुक्षेत्रगतफलम् VIII-112-113
शनि II-4
शरयोग VII-170,177
शरासन I-6
शरद् (ऋतु) IX-27
शशभृत् II-28
शशयोग VII-59,65
शस्त्र I-50
शाक्य (प्रव्रज्या) XV-15-16
शान्त (अवस्था) II-16,17,XVIII-31
शारदायोग VII-144,145
शार्वरी IX-18
शिखी II-5
शिव (योग) IX-99
शिशिर (ऋतु) IX-28
शीतद्युति II-3
शीतल (षष्ठ्यंश) I-43
शीर्षोदय (ग्रह) II-11
शीर्षोदय (राशि) I-14,II-86, XIV-64,XVIII-24
शुक्र II-4
शुक्ल (योग) IX-100
शुक्ल (वर्ष) IX-11
शुक्लपक्षफलम् IX-32
शुभ (गृह) I-13
शुभ (ग्रह) II-9
शुभ योग) IX-99
शुभयोग VII-125,126
शुभ (स्थान) I-51

शुभकर्त्तरियोग VII-125,127
शुभकृत् (संवत्सर) IX-19
शुभाकर (षष्ठ्यंश) I-43
शूलदशा XVIII-38
शूल (योग) IX-76,98
शूलयोग VII-165,173,180
शूल (षष्ठ्यंश) I-43,XII-135
शृङ्गाटकयोग VII-164.168,175
शोभकृत् IX-19
शोभन (योग) IX-97
श्रवण IX-44,89
श्रविष्ठा III-56,IX-44,89
श्रावण IX-30,81
श्रीनाथयोग VII-143
श्रीमुख IX-12

ष

षड्बल II-38
षड्ग्रहयोगाः VIII-36-38
षड्वर्ग I-48
षड्विधहरण V-16
षष्ठ I-50
षष्ठी IX-35
षष्ठ्यंश I-30,39-43,VI-19,XI-64,91,95,XII-7,95,135,147,XIII-68,69,XIV-96
षोडशांश I-30,36

स

सङ्ख्यायोगाः VII-167
सङ्घातिक IX-78
सत्ववेला IX-123,125
सत्व (गुण) II-26,XVIII-23
सप्तम (स्थान) I-51
सप्तमांश I-30,31
सप्तमी III-56,IX-35
सप्तवर्ग I-48
सम II-45
समयोग VII-112
समुदाय IX-78
समुदायाष्टकवर्ग X-52
समुद्रयोग VII-164,172,178
सम्पद् XVIII-25
सर्प II-4
सर्प (द्रेष्काण) IV-45,V-55,V.A-4,XIV-9
सर्प (षष्ठ्यंश) I-40
सर्पयोग VII-165,166,174
सर्वजित् IX-15
सर्वधारी IX-15
सव्य XVII-11,26,27
सव्यचक्रवाक्यानि XVII-105
सहोदर (स्थान) I-49
साधारण IX-21
साध्य IX-99
सिद्ध IX-99
सिद्धार्थी IX-23
सिद्धि IX-98
सिंह I-5,IX-92,95,106
सिंहावलोकन XVII-17,89-94,98-100
सिंहासनांश I-45,IV-102-103,XI-86,97,XIV-91
सित II-4
सीमन्तसंस्कार XII-75
सुकर्म IX-97
सुख (स्थान) I-50

सुधा (षष्ठ्यंश) I-42,43
सुनफायोग VI-72,83,84,91-95
सुभानु IX-14
सुराचार्य II-4
सूर्य II-3
सैंहिकेय II-4
सोम II-3
सौभाग्य IX-97
सौम्य (बुध) II-3
सौम्य (गृह) I-13
सौम्य (ग्रह) II-9
सौम्य (षष्ठ्यंश) I-42
सौम्य (संवत्सर) IX-21
सौम्यद्रेष्काण IX-114,116
सौरायुस् V-34,X-71
स्त्रीजातकम् XVI
स्थानबलम् II-33,38,XII-109
स्थिर (राशि) I-13
स्रक्योग VII-165,166,174
स्व I-49
स्वक्षेत्र I-25
स्वक्षेत्रफलम् VIII-105,106
स्वभानु See सुभानु
स्वरांश I-30,31
स्वस्थ (अवस्था) II-16,17,XVIII-31
स्वाती III-56,IX-42,87
स्वैरिणी XVI-20
स्वोच्चफलम् VIII-100-103

ह

हंसयोग VII-59,63
हरि I-13
हरिहरब्रह्मयोग VII-162,163
हर्षण IX-98
हलयोग VII-164,168,175
हस्त IX-41,63,66,87
हिबुक I-50
हेमन्त IX-28
हेमलंबि IX-18
हेरम्ब (षष्ठ्यंश) I-40
होरा I-30,49
होराफलम् IX-110,111

SREE CHAMARAJENDRA SANSKRIT COLLEGE LIBRARY
वाणीं भजत गैर्वाणीं
* FORT, BANGALORE. *

॥ श्रीगणेशायनमः॥

NOTES

- TO -

JATAKAPARIJATA.

स्कन्दं प्रजापतिं नत्वा गर्गाङ्गिरपराशरान् ।
औचित्यवचसे वाणीं लिख्यते लघुटिप्पणी ॥

Adhyaya I.

Slokas 4, 5, 6 and 1st quarter of Sloka 7. The author presumes in the student an elementary knowledge of the science, such as the names of the 12 Rasis, the 27 Nakshatras, *etc.*, and begins to give the different names by which each of the signs is known.

In slokas 18-25 the Rasis have been more elaborately dealt with, but the following from Skanda hora (**स्कन्दहोरा**) may be noted here regarding Vrishabha and other Rasis:

तावुरुः सौरभेयश्च वृषो वृषभवाचकः ।
मिथुनं जुतुमं प्राहुर्नृयुग्ममिति चापरे ॥
कुटीरः कर्कटः कर्की कृकाटश्चाभिधीयते ।
सिंहो लेयो मृगेन्द्रश्च कन्या स्त्री कन्यकापि च ॥
वृश्चिको मधुपः कौर्पी धनुर्धन्वी च तौक्षिकः ।
आकोकेरो मृगो नक्रो मकरः संप्रगीयते ॥
कुंभः कलशनामासौ हृद्रोग इति चोच्यते ।
अनिमेषाह्वयो मीनो बोध्यश्चेत्थसिरित्यपि ॥

Read **'मीनान्त्य'** for **'मीनालि'** in the first quarter of the 7th sloka and in the translation thereof "Meena, Anthya" for "Meenali".

Sloka 7. (quarters 2. to 4). Rasis are usually counted from Mesha and Nakshatras from Aswini. Each Nakshatra has four quarters and each Rasi consists of nine quarters of the Nakshatras. Thus Mesha is composed of Aswini, Bharani and the first quarter of Krithika and so on. *cf.* Garga.

अश्विनी भरणी मेषः कृत्तिका पाद एव च ।
तत्पादत्रितयं ब्राह्मं बृषः सौम्यदलं तथा ॥
सौम्यार्द्धमार्द्रा मिथुनं त्वादित्याश्चरणत्रयम् ।
तत्पादः पुष्यमाश्लेषा राशिः कर्कटकः स्मृतः ॥
पित्र्यं भाग्यमथार्यम्णः पादः सिंहः प्रकीर्तितः ।
तत्पादत्रितयं कन्या हस्तश्चित्रार्द्धमेव च ॥
तुला चित्रादलं स्वाती विशाखाचरणत्रयम् ।
तत्पादं मित्रदैवत्यं ज्येष्ठा वृश्चिक उच्यते ॥
मूलमाप्यं तथा धन्वी पादो विश्वेश्वरस्य च ।
तत्पादत्रितयं विष्णुर्मकरो वासवं दलम् ॥
तद्दलं वारुणं कुंभं तथाजचरणत्रयम् ।
तत्पादमेकं मीनः स्यादहिर्बुध्न्यं च रेवती ॥

The last quarter of the sloka gives the several synonymous terms for राशि or sign.

Sloka 8. The 12 Rasis are supposed to represent the several parts of the body of Kalapurusha (कालपुरुष), Mesha (Aries) representing the head and so on.

cf. सारावली

शीर्षास्यबहुहृदयं जठरं कटिवस्तिमेहनोरुयुगम् ।
जानूजङ्घे चरणौ कालस्याङ्गानि राशयोऽजाद्याः ॥

The object of this division is also distinctly expressed thus in the same work:

कालनरस्यावयवान् पुरुषाणां कल्पयेत्प्रसवकाले ।
सदसद्ग्रहसंयोगात्पुष्टान् सोपद्रवांश्चापि ॥

i. e., to find out the full growth or otherwise of the different parts of the body of the owner of the horoscope according as the Rasis typifying them are connected with benefic or malefic planets.

In the case of all horoscopes, the several parts of the body referred to above should be understood to be represented by the signs beginning from the Lagna.

Sloka 9. Cf. बृहज्जातक I-5

मत्स्यौ घटी नृमिथुनं सगदं सवीणं
चापी नरोऽश्वजघनो मकरो मृगास्यः ।
तौली ससस्यदहना प्लवगा च कन्या
शेषाः स्वनामसदृशाः खचराश्च सर्वे ॥

Slokas 10-12. These are useful in fixing the nature and the whereabouts of absconded or missing persons, lost things, etc., and seem to have been culled from the works of the Yavanas, from which the following is extracted:—

आद्यः स्मृतो मेषसमानमूर्त्तिः कालस्य मूर्द्धा गदितः पुराणैः ।
सोऽजाविका संचरकन्दराद्रिस्तेनाग्निधात्वाकररत्नभूमिः ॥
वृषाकृतिस्तु प्रथितो द्वितीयः सवक्रकण्ठायतनं विधातुः ।
बनाद्रिसानुद्विपगोकुलानां कृषीवलानामधिवासभूमिः ॥
वीणागदाभृन्मिथुनं तृतीयः प्रजापतेः स्कन्धभुजांसदेशः ।
प्रनर्तको गायनशिल्पकस्त्री क्रीडारतिर्द्यूतविहारभूमिः ॥
कर्की कुलीराकृतिरम्बुसंस्थो वक्षःप्रदेशे विहितश्च धातुः
केदारवापीपुलिनानि तस्य देवाङ्गनारम्यविहारभूमिः ॥
सिंहस्तु शैले हृदयप्रदेशं प्रजापतेः पञ्चममाहुरार्याः ।
तस्याटवीदुर्गगुहावनाद्रिव्याधावनीदुर्गवनप्रदेशाः ॥
प्रदीपिकां गृह्य करेण कन्या नौस्था जले षष्ठमिति ब्रुवन्ति ।
कालार्थधीरा जठरं विधातुः सशाद्वला स्त्रीरतिशिल्पभूमिः ॥
वीथ्यां तुला पण्यधरो मनुष्यः स्थितः स नाभीकटिवस्तिदेशे ।
शुक्लार्थवीथ्यापणपट्टनाध्वसार्थाधिवासोन्नतसस्यभूमिः ॥
श्वभ्रोऽष्टमो वृश्चिकविग्रहस्तु प्रोक्तः प्रभोर्मेढ्रगुदप्रदेशे ।
गुहाबिलश्वभ्रविषाश्मगुप्तिर्वल्मीककीटाजगराहिभूमिः ॥
धन्वी मनुष्यो हयपश्चिमार्द्धस्तमाहुरूरू भुवनप्रणेतुः ।
समस्थितव्यस्तसमस्तवाजिसुरास्त्रभृद्यज्ञरथाश्वभूमिः ॥
मृगार्द्धपूर्वं मकरोर्द्धगात्रो जानुप्रदेशं तमुशन्ति धातुः ।
नदीवनारण्यसरोह्यनूपश्वभ्राधिवासो दशमः प्रदिष्टः ॥
स्कन्धे तु रिक्तः पुरुषस्य कुंभो जङ्घे तमेकादशमाहुरार्याः ।
शुष्कोदकाधारकुशस्य पक्षी स्त्रीशौण्डिको द्यूतनिवासभूमिः ॥

जले तु मीनद्वयमन्त्यराशिः कालस्य पादौ विहितौ वरिष्ठौ ।
सपुण्यदेवद्विजतीर्थभूमिर्नदीसमुद्राम्बुचयाधिवासः ॥

एतत्स्वरूपप्रयोजनं हृतनष्टादिषु स्थानपरिज्ञानं । तथा च षट्पञ्चाशिकायां 'राशिभ्यः कालदिग्देशाः' इति.

Sloka 11. Some books read सर्वार्थवास.

Sloka 13. This sloka is helpful in deciding the sex, appearance, character, etc. of the person concerned. If the Lagna be a male sign and the surroundings lead to the same conclusion, he is surely a male; but if they should be otherwise, he will be a male with feminine appearance and character, etc., or *vice versa.* The student should never venture any prediction unless all the existing conditions are fully and carefully tested and weighed. *cf.* सत्याचार्यः

ओजाः पुरुषा ज्ञेया मेषात् स्त्रीसंज्ञका युग्माः ।
उग्रेषूग्राः पुरुषाः सौम्या युग्मेषु भवनेषु ॥
चरसंज्ञाः स्थिरसंज्ञा द्विःप्रकृतिरिति राशयः क्रमशः ।
राशिस्वभावतुल्या जायन्ते प्रकृतयः प्रसूतानाम् ॥

The sign Meena is stated to be of even length, but it will be seen from *sloka 56 infra* that the sign's length is represented by the number 20 and should therefore be classed as a short sign. *Vide* also notes to that sloka.

दिगीशत्वप्रयोजनं तु । सूतिकागृहद्वारज्ञानं, तथा हृतनष्टादिषु चौरादेर्याने दिग्विज्ञानं च । तथा च.

यातव्यदिङ्मुखगतस्य सुखेन सिद्धिः
व्यर्थश्रमो भवति दिक्प्रतिलोमलग्ने ॥ इति.

Sloka 14. cf. पराशरजातक

दिवा शीर्षोदयाश्चैव सन्ध्यायामुभयोदयाः ।
नक्तं पृष्ठोदयाश्चैव बलाधिक्या उदीरिताः ॥

Also शम्भुहोराप्रकाश

मेषो वृषद्वन्द्वकुलीरचापकुरङ्गवक्राश्च निशाबलाः स्युः ।
तुलाधरो वृश्चिककुंभभृच्च कन्यालिमीना दिवसात्मिकाःस्युः ॥

अविर्वृषः कर्कधनुर्धराश्च पृष्ठोदयाख्याः समृगाः सदोह्याः ।
कन्यातुलायुग्मघटालिसिंहाः शीर्षोदयाख्या ह्युभयोदयोऽन्त्यः ॥

For the usefulness of this sloka, cf.

शीर्षोदये समभिवांछितकार्यसिद्धिः पृष्ठोदये विफलता बलविद्रवश्च ॥

Also शस्तं दिवा दिनबले निशिनक्तवीर्यें रात्रौ विपर्ययबले गमनं न शस्तम्॥

Sloka 15 Among planets, the Moon and Venus are termed watery planets, Mercury and Jupiter are water-resorters, and the Sun, Mars and Saturn waterless ones. *Vide* Adhyaya II sl. 13.

Slokas 16–17 *cf.* गर्गः

नृयुक् तुला घटः कन्या पूर्वमर्द्धं च धन्विनः ।
लग्नस्था बलिनो नित्यमेते हि नरराशयः ॥
चतुर्थे कर्कटो मीनो मकरार्द्धं च पश्चिमे ।
विज्ञेया बलिनो नित्यमेते हि जलराशयः ॥
सप्तमे वृश्चिकः कीटो बलवान् परिकीर्तितः ।
धनुषोऽर्द्धाजगोसिंहा बलिनः खे चतुष्पदाः ॥
प्रागर्द्धं नक्रराशेश्च कैश्चिद्दिग्बलमेव हि ।

These are useful in finding the भावदिग्बल (Bhavadigbala). *Vide* श्रीपतिपद्धतिः Ch. III. Sl. 21-23

Sloks 18 *cf.* बृहज्ञातक

केन्द्रस्था द्विपदादयोऽह्नि निशि च प्राप्ते च सन्ध्याद्वये (वीर्योत्कटाः)

The term कीटाः (reptiles) here includes not only Vrischika Rasi, but also the other aquatic signs. *cf.* देवकीर्तिः

मिथुनतुलकुम्भकन्या दिवाबला धन्विनश्च पूर्वार्द्धम ।
अजबृषसिंहा रात्रौ मृगहययोः पूर्वपश्चार्द्धे ॥
बृश्चिकमीनकुलीरा मकरान्त्यार्द्धं च सन्ध्यायाम् ।

Sloka 22. For the effect of a birth at ऋक्षसन्धि, *cf.* सारावली

जातो न जीवति नरो मातुरपथ्यो भवेत्स्वकुलहन्ता ।
यदि जीवति गण्डान्ते बहुगजतुरगो भवेद्भूपः ॥

Sloka 23. For its utility *vide Adhyaya III-Sl. 4*

Sloka 25. **'मेषादिकराशिनाथाः'** is another reading. In the translation, for the words "and also of their Navamsas", read "and also of their amsas."

Slokas 26–28. cf. सारावली

उच्चबलं कन्यायां बुधस्य तुङ्गांशकैः सदा चिन्त्यम ।
परतस्त्रिकोणजातं पञ्चभिरंशैः स्वराशिजं परतः ॥
उच्चं भागत्रितयं बृष इन्दोश्च त्रिकोणमपरेंशाः ।
द्वादशभागा मेषे त्रिकोणमपरे स्वभं तु भौमस्य ॥
दशभागा ईड्यस्य च त्रिकोणमपरे स्वभं चापे ।
शुक्रस्य तु त्रिकोणं पञ्चभिरपरे स्वभं जूके ॥
विंशातिरंशाः सिंहे त्रिकोणमपरे स्वभवनमर्कस्य ।
कुम्भे त्रिकोणनिजभे रविजस्य यथा रवेः सिंहे ॥

Also शम्भुहोराप्रकाश

दिशा (10) गुणा (3) गजाश्विनः (28) शरेन्दवः (15) समीरणा(5)
नगाश्विनः (27) करोद्भवाः (20) रवेस्तु तुङ्गजापराः ।
हरौ रवेर्नखा (20) लवास्त्रिकोणकं परे (10) गृहं
बृषे विधोस्तु तुङ्गजा गुणाः (3) परे (27) त्रिकोगजाः ॥
कुजस्य भास्करा (12) अवौ त्रिकोणजाः परे (18) स्वभं
धनुर्धरे गुरोर्दिश (10) स्त्रिकोणजाः परे (20)स्वभम् ॥
घटे भृगोः शरेन्दवः (15) त्रिकोणका परे (15) स्वभं
घटे शनेस्त्रिकोणजा नखा (20) परे (10) स्वगेहजाः ।
बुधस्य तुङ्गजाः स्त्रियां शरेन्दवः (15) परे (5) शराः
स्वभं परे त्रिकोणजा दिश (10) स्तु संस्मृता बुधैः ॥

For the Exaltation and Swakshetra places of Rahu & Ketu, *vide* the following from पराशर

राहोस्तु बृषभं केतोर्वृश्चिकं तुङ्गसंज्ञकम् ।
मूलत्रिकोणकर्कं च युग्मचापं तथैव च ॥
कन्या च स्वगृहं प्रोक्तं मीनं च स्वगृहं स्मृतम् ।

Sloka 29. These are useful in finding the correct उच्चbalas of the several planets.

The effects of the Sun and the Moon occupying their respective highest exaltation degrees and their exaltation signs उच्चराशि have been separately given thus by Garga:—

स्वोच्चगौ रविशीतांशू जनयेतां महीपतिम् ।
उच्चस्थौ धनिनं ख्यातं स्वत्रिकोणगतावपि ॥

and the result of their occupying their extreme depression portions is thus described by the same.

अन्धं दिगम्बरं मूकं परपिण्डोपजीवनम् ।
कुर्यातामतिनीचस्थौ पुरुषं शशिभास्करौ ॥

Sloka 30. **दुरितचयश्रीकराः** is another reading.

There are sixteen Vargas, but only ten are given here. Even these ten Vargas are but seldom consulted. Six and sometimes seven are usually resorted to and are known as **षड्वर्ग** and **सप्तवर्ग** respectively. *Vide* slokas 47 & 48 *infra.*

Cf. the following from **गर्ग**

क्षेत्रं होराथ द्रेष्काणो नवांशो द्वादशांशकः ।
त्रिंशांशकश्च वर्गोऽयं सर्वस्य समुदाहृतः ॥
ऽयादिष्वपि पदार्थेषु स्थितः स्वेषु स्ववर्गगः ।
पञ्चवर्गगतोऽप्येवं ग्रहो भवति नान्यथा ॥

Also **सूर्यजातक** for **सप्तवर्ग**

लग्नं होरा त्रिभागश्च सप्तांशो नवमांशकः ।
द्वादशांशस्ततस्त्रिंशल्लवः सप्तकवर्गिका ॥

For the names of the 16 Vargas, *cf.* **पराशर**

वर्गान् षोडशसंख्यकान् ब्रह्मा लोकपितामहः ।
तानहं संप्रवक्ष्यामि मैत्रेय श्रूयतामिति ॥
क्षेत्रं होरा च द्रेष्काणस्तुर्यांशः सप्तमांशकः ।
नवांशो दशमांशश्च सूर्यांशः षोडशांशकः ॥
विंशांशो वेदवान्हंसो भांशस्त्रिंशांशकस्ततः ।
खवेदांशोऽक्षवेदांशः षष्ठ्यंशश्च ततः परम् ॥

That is, (1)Rasi, (2)Hora, (3) Drekkana, (4) Chaturthamsa or ¼th (5) Saptamsa, (6) Navamsa, (7) Dasamamsa (8) Dwadasamsa (9) Shodasamsa (10) Vimsamsa (11) Siddhamsa or one twenty-fourth, (12) Bhamsa or one twenty seventh, (13) Trimsamsa, (14) Khavedamsa or one fortieth (15) Akshavedamsa or one forty-fifth and (16) Shashtyamsa or one sixtieth.

For the uses of the several Vargas, *cf.* होराप्रदीप

लग्नाद्देहविचारो होरातश्चार्थसंपदो ज्ञेयाः ।
द्रेक्काणात्कर्मफलं भ्रातृविचारस्तु सप्तांशात् ॥
संततिफलं नवांशाद् द्वादशभात्कलत्रचिन्ता च ।
मृत्योर्ज्ञानं कथितं त्रिंशांशाज्जातकज्ञैस्तु ॥

According to the Yavanas, the lords of the Horas and Drekkanas are as described in the following sloka:

आद्या तु होरा भवनस्य पत्युरेकादशक्षेत्रपतेर्द्वितीया ।
स्वद्वादशैकादशराशिपानां द्रेष्काणसंज्ञाः क्रमशस्त्रयोऽत्र ॥

so that, according to this view, the ownership of the Horas is not restricted to the Sun and the Moon, but is shared by all the planets. But this view of the Yavanas is not recognised by Varahamihira, nor even by authorities like Satya who has thus stated.

ओजेषु रवेर्होरा प्रथमा युग्मेषु चोत्तरा शेषा ।
इन्दोः क्रमशो ज्ञेया जन्मनि चेष्टौ स्वहोरास्थौ ॥
राशिपतेर्द्रेष्काणस्तत्पञ्चमनवमभवनपतयः स्युः ।
तेषामधिपतयः स्वस्वद्रेष्काणे ग्रहा बलिनः ॥

But it may be mentioned here that this convention of the Yavanas has been accepted for Prasna purposes (Horary astrology) while the other is recognised for purposes of horoscopy. cf.

रवीन्दू विषमे चन्द्ररवी चात्र समे क्रमात् ।
होरा स्याल्लग्नपस्याद्या द्वितीया लाभपस्य तु ॥
आद्या तु जातके प्रोक्ता द्वितीया प्रश्नकर्मणि ॥
लग्नपुत्रशुभपाश्चरे गृहे पुत्रधर्मतनुपा युगे गृहे ।
धर्मलग्नसुतपाः स्थिरे गृहे जातके खलु दृगाण उच्यते ॥
सर्वराशिसुदृगाण उच्यते लग्नपस्य सुतपस्य चाप्यथ ।
धर्मपस्य सुविधानकर्मणि प्रश्न एव तनुरिःफलाभपः ॥

Sloka 31. This sloka gives the rule for finding out the lord of the Saptamamsa in the cases of odd and even signs. In the translation, for the words "and other houses" read "and the planets." The Vargas appertain to Lagna and the planets only and not to houses.

Sloka 32-33. These give the rules for finding out the Navamsas. Each Navamsa is 3°20′. Divide the Sphutam by 3°20′ and the result will indicate the number of Navamsas the Lagna or the planet in question has traversed.

Sloka 34. It will be seen that the Vargottama Navamsas in the several Rasis bear the same names as the signs themselves. For example, the first Navamsa of Mesha is Mesha; the first of Kataka is Kataka and so on. The middlemost Navamsa in Vrishabha is Vrishabha & so on- *cf.*

स्वे स्वे गृहेषु स्वगृहांशका ये वर्गोत्तमास्ते यवनैर्निरुक्ताः ।

Planets situated in Vargottamamsas are said to be productive of immense good-*cf.* बृहज्जातक

वर्गोत्तमाश्चरगृहादिषु पूर्वमध्यपर्यन्ततः शुभफला नवभागसंज्ञाः ॥

Also सत्य

चरभवनेष्वाद्यंशाः स्थिरेषु मध्या द्विमूर्तिषु तथान्त्याः ।
वर्गोत्तमाः प्रदिष्टास्तेष्विह जाताः कुले मुख्याः ॥

Also सारावली

वर्गोत्तमा नवांशास्तथादिमध्यान्तगाश्चराद्येषु ।
सूतौ कुलमुख्यकराः ।

Sloka 35. This sloka gives the rules for calculating the Dasamsa and Dwadasamsa of a Rasi.

cf. पराशर

दिगंशयाततश्चौजे युग्मे तन्नवमाद्वदेत् ।
पूर्वादि दश दिक्पाला इन्द्राग्नियमराक्षसाः ॥
वरुणो मारुतश्चैव कुबेरेशानपद्मजाः ।
अनन्तश्च क्रमादोजे समे वा व्युत्क्रमेण तु ॥
द्वादशांशस्य गणना तत्तत्क्षेत्राद्विनिर्दिशेत् ।
तेषामधीशाः क्रमशो गणेशाऽश्वियमा हयः ॥

Sloka 36. But according to some the Shodasamsas are to be counted from Mesha in the case of a moveable sign, from Simha in the case of a fixed sign and from Dhanus in the case of a dual sign; *cf.* पराशर

अजसिंहाश्वितो ज्ञेया नृपांशाः क्रमशः सदा ।
अजविष्णू हरः सूर्यो ह्योजे युग्मे प्रतीपकम् ॥

Sloka 37. *cf.* श्रुतकीर्तिः

पञ्चाथ पञ्च चाष्टौ सप्त च पञ्चैव चौजभवनेषु ।
धरणिसुतमन्दसुरगुरुबुधशुक्राणां क्रमेणांशाः ॥
पञ्चैव सप्त चाष्टौ पञ्च च पञ्चाथ युग्मभवनेषु ।
भागा भार्गवशशिसुतसुरेज्यशनिभूमिपुत्राणम् ॥

When a planet is in an odd sign, then take the odd Trimsamsa Rasi of the planet in whose Trimsamsa the first planet lies; *cf.* होरासार । विषमे गृहेस्य विषमो राशिः समभे समो ज्ञेयः ॥

Trimsamsa divisions are greatly useful in female horoscopes (Adhyaya 16).

Slokas 38-43. The following table for Shashtyamsa is appended for easy reference :—

Odd Sign	Names of Shashtyamsas	Even Sign	Odd Sign	Names of Shashtyamsas	Even Sign
1	Ghoramsa	... 60	31	Mrityukaramsa	... 30
2	Rakshasamsa	... 59	32	Kalamsa	... 29
3	Devamsa	... 58	33	Davagniamsa	... 28
4	Kuberamsa	... 57	34	Ghoramsa	... 27
5	Yakshavalyamsa	... 56	35	Yamamsa [Amayamsa]	26
6	Kinnaramsa	... 55	36	Kantakamsa	... 25
7	Bhrashtamsa	... 54	37	Sudhamsa	... 24
8	Kulaghnama	... 53	38	Amrutamsa	... 23
9	Garalamsa	... 52	39	Purnachandramsa	... 22
10	Agnyamsa	... 51	40	Vishapradigdhamsa	... 21
11	Mayamsa	... 50	41	Kulanasamsa	20
12	Prethapurisamsa	... 49	42	Vamsakshayamsa	... 19
13	Apampathyamsa	... 48	43	Uthpathakamsa	... 18
14	Devaganesamsa	... 47	44	Kalamsa	... 17
15	Kalamsa	... 46	45	Saumyamsa	.. 16
16	Sarpamsa	... 45	46	Mridvamsa	... 15
17	Amruthamsa	... 44	47	Seethalamsa	... 14
18	Chandramsa	... 43	48	Damshtrakaralamsa	... 13
19	Mridwamsa	... 42	49	Indumukhamsa	... 12
20	Komalamsa	... 41	50	Pravinamsa	... 11
21	Padmabhanvamsa	... 40	51	Kalagniamsa	... 10
22	Vishnuamsa	... 39	52	Dandayudhamsa	... 9
23	Brahmamsa	... 38	53	Nirmalamsa	... 8
24	Maheswaramsa	... 37	54	Subhakaramsa	... 7
25	Devamsa	... 36	55	Kruramsa	... 6
26	Ardramsa	... 35	56	Seethalamsa	... 5
27	Kalinasamsa	... 34	57	Sudhamsa	... 4
28	Kshitiswaramsa	... 33	58	Payodhyamsa	... 3
29	Kamalakaramsa	... 32	59	Bhramanamsa	.. 2
30	Gulikamsa	... 31	60	Indurekhamsa	... 1

Sloka 44. If planets be in their Moolatrikona, Swakshetra, Uccha or Vargottama positions and have other benefic portions arising from the Dasa Vargas, then, Uttama and other Vaiseshikamsas referred to in the next two and a half slokas will result and do immense good to the owner of the horoscope.

Slokas 45-46½. cf. पराशर

सप्तवर्गेऽथदिग्वर्गे पारिजातादि संज्ञकाः ।
पारिजातं भवेद् द्वाभ्यामुत्तमं त्रिभिरुच्यते ॥
चतुर्भिर्गोपुराख्यं स्याच्छरैः सिंहासनं तथा ।
पारावतं भवेत् षड्भिर्देवलोकं च सप्तभिः ॥
वसुभिर्ब्रह्मलोकाख्यं नवभिः शक्रवाहनम् ।
दिग्भिः श्रीधामयोगं स्यात् ॥

For the effects of planets in Vaiseshikamsas referred to in sloka 44, see *infra* IV–81, XI–63, XII–5, 58, 81, 92, 95, 146, XIII–19, 68, 82, XIV–102 and XV– 62;

cf. also फलदीपिका

आर्यानल्पगुणार्थसौख्यविभवान्यः पारिजातांशकः
स्वाचारं विनयान्वितं च निपुणं यद्युत्तमांशे स्थितः ।
खेटो गोपुरभागगः शुभमतिं स्वक्षेत्रगो मन्दिरं
यः सिंहासनगो नृपेन्द्रदयितं भूपालतुल्यं नरम् ॥
श्रेष्ठाश्वद्विपवाहनादिविभवं पारावताधिष्ठितः
सत्कीर्तिं यदि देवलोकसहितो भूमण्डलाधीश्वरम् ।
वन्द्यं भूपतिभिः सुरेन्द्रसदृशं त्वैरावतांशस्थितः
सद्भाग्यं धनधान्यपुत्रसहितं भूपं विदध्याद्ग्रहः ॥

Slokas 46½–48½. This is useful when the **सप्तवर्गजबल** has to be calculated. See **श्रीपतिपद्धति** Adhyaya III, sl 2 & 3.

In the example worked out in **श्रीपतिपद्धति**, it will be seen that Jupiter, whose position is given as 8 signs 1°-25′-1,″ occupies his (1) **मूलत्रिकोण**, (2) **स्वद्रेक्काण**, (3) **स्वसप्तांश** (4) **स्वनवांश** (5) **स्वदशमांश** (6) **स्वद्वादशांश**, and (7) **स्वकलांश**; so that Jupiter is said to have attained the Devalokamsa.

Mars (11 signs 27°-53′-9″) occupies his (1) own Drekkana (2) a Vargottama Navamsa and (3) own Trimsamsa, and so possesses three vargas. He is therefore said to have attained the Uttamamsa.

Sloka 51. In the translation, after "Gamana", read "(Cohabitation, travelling, etc)."

Sloka 52. **मेषूरणकीर्तिमान** is another reading.

Slokas 53-54. According to some, the biped, quadruped and the reptile signs become strong when they happen to be in Kendra, Panaphara and Apoklima houses respectively. This view is not accepted by **बादरायण**, for he says:

केन्द्रस्थातिबलाः स्युर्मध्यबलाः पणफराश्रिता ज्ञेयाः ।
आपोक्लिमगाः सर्वे हीनबला राशयः कथिताः ॥

According to Balabhadra, the terms Kendra, Panaphara etc. are applied only to Bhavas and not Rasis. For he says

" एतेन केन्द्रादिसंज्ञा भावानामेव न राशीनामिति सूचितम् । अन्यथा राशौ राशिबली वह्निरात्मदेहदाहको द्रष्टा 'स्वदृष्टदर्शक इत्यादिवत् विरुद्धार्थप्रसक्तेः । तथा च राशीनामेव केन्द्रादिसंज्ञेति सुन्दरमिश्रोक्तमपास्ता । केन्द्रस्था इति ब्रुवतो वराहस्य शब्दाल्पत्वेनार्थाल्पता स्पष्टैव ॥

In this chapter, the terms used to indicate one or the other of the twelve houses or a number of them may be divided into two classes, *viz*, (1) those which are used as mere conventional names serving no other purpose than that of denoting the particular house or houses they have been specially elected to designate and (2) those which, besides serving such purpose, also connote the functions of the houses they signify.

Of the former class may be mentioned the following :— Hora (**होरा**) for the Lagna ; Duschikya (**दुश्चिक्य**) for the 3rd house ; Meshurana (**मेषूरण**) for the 10th; Rippha (**रि:फ**) for the 12th ; Chaturasra (**चतुरस्र**) for the 4th and 8th houses ; Kantaka (**कण्टक**), Kendra (**केन्द्र**) and Chatushtaya (**चतुष्टय**) for the

1st, 4th, 7th and 10th houses; Panaphara(पणफर) for the 2nd, 5th, 8th and 11th houses; and Apoklima (आपोक्लिम) for the 3rd, 6th, 9th and 12th houses.

The following belong to the latter class. Tanu (तनु) for the Lagna, (meaning thereby that everything about the body—its growth or decay—health, etc., has to be ascertained from the Lagna; कुटुम्ब or स्व for the 2nd house, thus indicating that information regarding one's family, dayadins and wealth has to be predicted from the 2nd house; सहज or विक्रम for the 3rd house; बन्धु, वेश्म or गृह, सुख for the 4th house; धी or बुद्धि, पुत्र, etc., for the 5th house; and so on.

Sloka 55. First half. In the opinion of some eminent astrologers like Garga, the 3rd, 6th, 10th and 11th houses cease to be Upachaya houses if they are aspected by malific or other inimical planets. Says Garga

अथोपचयसंज्ञा स्यात् त्रिलाभरिपुकर्मणाम् ।
न चेद्भवन्ति दृष्टास्ते पापस्वस्वामिशत्रुभिः ॥

This view is not accepted by Varahamihira who would have those houses always as Upachaya ones. And in this, he is supported by Satya and Yavaneswara

cf. Satya

दशमैकादशषष्ठतृतीयसंज्ञानि जन्मलग्नाभ्याम् ।
उपचयभवनानि स्युः शेषाण्यृक्षाण्यपचयाख्यानि ॥

Also Yavaneswara

षष्ठं तृतीयं दशमं च राशिमेकादशं चोपचयर्क्षमाहुः ।
होरागृहस्थानशशाङ्कभेभ्यः शेषाणि चैभ्योऽपचयात्मकानि ॥

Latter half of the Sloka. cf. वराहः

अधिपयुतो दृष्टो वा बुधजीवनिरीक्षितश्च यो राशिः ।
स भवति बलवान्न यदा युक्तो दृष्टोऽपि वा शेषैः ॥

Also बादरायण

जीवस्वनाथशशिजैर्युतदृष्टा बलवती भवति होरा ।
शेषैर्बलहीना स्यादेवं मिश्रैस्तु मध्यबला ॥
बलहीना यदि सर्वैर्न वीक्षिता नैव युक्ता वा ।

Sloka 56. cf. बृहज्जातक

पूर्वार्द्धे विषयादयः कृतगुणा मानं प्रतीपं च तत् ॥

Also सत्य

चतुरुत्तरोत्तराः स्युर्विंशतिभागा भवन्ति मेषाद्ये ।
मानमिहार्द्धे पूर्वे मीनाद्ये चोत्क्रमादर्द्धे ॥

It will be seen that the figures given in the sloka in the text aggregate 360 and are the measurements in degrees of the 12 signs which they subtend at the centre.

As the whole zodiac is passed over in 24 hours, each degree is finished in 24/360 × 60 × 60 or 240 seconds or 240/24 or 10 Vighatikas or Chashakas.

भागव्यवहारश्च क्षेत्रे भागेनैकेन काले दश चषका भवन्ति । यस्माद्या कलाः क्षेत्रे सा काले प्राण इति

So that 1 kala or 1′(circular measure) = 1 प्राण or Asu

(6 Pranas being = 1 चषक)

1 घटिका is therefore=360 प्राणाः

“तत्रैतज्जातं काले या घटिका सा षष्ट्यधिकेन शतत्रयेण गुणिता प्राणा भवन्ति । क्षेत्रे च ता एव विलिप्तास्तासां षष्ट्या भागमपहृत्य षड्भागाः क्षेत्रे भवन्ति । एवं मेषादीनां प्राणभागाः दशगुणिताश्चषका भवन्ति । तेन चषक शतद्वयं मेषमीनयोः प्रमाणम् । एवं चत्वारिंशदधिकं शतद्वयं वृषकुंभयोः ।” उत्पलः ।

Thus it is seen that the several measurements mentioned in the sloka in the text when multiplied by 10 give the Chashakas (200, 240, 280&c. in time) of the several signs. These figures are useful in finding out the relative lengths of the several parts of a human body (see Adhyaya III, sloka 76).

तत्र यस्मिन्नङ्गे दीर्घराशिर्भवति दीर्घाधिपो वा ग्रहस्तदङ्गं दीर्घं भवति मध्ययोर्मध्यं ह्रस्वयोर्ह्रस्वमिति ” उत्पलः

cf. सारावली

ह्रस्वास्तिमिगोजघटामिथुनधनुःकर्किमृगमुखाश्च समाः ।
वृश्चिककन्यामृगपतिवणिजो दीर्घाः समाख्याताः ॥
एभिर्लग्नाधिगतैः शीर्षप्रभृतीनि सर्वजन्तूनाम् ।

सदृशानि च जायन्ते गगनचरैश्चैव तुल्यानि ॥

Also सत्य

दीर्घाधिपतिर्दीर्घे गृहे स्थितोऽवयवदीर्घकृद्भवति ॥

Sloka 57. **तनु** in this sloka signifies the number 8 (**अष्टमूर्तिः** 8 forms) and not 6 as stated in the translation.

In this sloka Vaidyanatha Dikshita gives the Moon's **मृत्युभागाः** or fateful portions in the several signs. These are more or less identical with those given in **सर्वार्थचिन्तामणि** and **सारावली**

(1) **सर्वार्थचिन्तामणौ**

कुम्भे विंशतिभागे स्यान्मृत्युं दद्यान्निशाकरः ।
एकविंशतिभागस्तु सिंहे तत्वैस्तु गोवृषे ॥
अष्टमे मेषचन्द्रस्तु त्रयोविंशतिकोऽलिगः ।
द्वाविंशतिः कुलीरे तु तुलायां वेदभागकः ॥
विंशतिर्मकरे चन्द्रः कन्यायां प्रथमांशकः ।
धन्विन्यष्टादशो भागो मीने दशमभागयुक् ॥
द्वाविंशतिर्नृयुग्मे तु चन्द्रोऽप्येवं मृतिप्रदः ।
ये ये निशाकरांशास्तु मृत्युभागा विवक्षिताः ॥
तावद्भिर्वत्सरैर्जातो मृत्युमेति न संशयः ।

(2) **सारावल्यां**

कुम्भे दिशति शशाङ्को भागे मृत्युं तथैकविंशाख्ये ।
सिंहे च पञ्चमेंशे वृषे च नवमे तथैवोक्तः ॥
अलिनि त्रिविंशयुक्ते मेषे च तथाष्टमे दिशति मृत्युम् ।
कर्कटके द्वाविंशे तुलिनि चतुर्थे मृगे विंशे ॥
कन्यायां प्रथमेंशे धनुर्धरेऽष्टादशे झषे दशमे ।
मिथुने च द्वाविंशे शशिप्रसूतस्य मरणकरः ॥
ये भुक्ताः शशिनोंशाः जन्मनि वर्षैर्गतैस्तु तावद्भिः ।
मरणं हि जन्मभाजामप्यन्तकबद्धरक्षाणाम् ॥

But in the two works **बृहत्प्राजापत्य** and **फलदीपिका** the Mrityubhagas of the Moon in the several signs from Mesha are given as 26, 12, 13, 25, 24, 11, 26, 14, 13, 25, 5 and 12 respectively.

Cf. बृहत्प्राजापत्य

चन्द्रो रम्यो लयो मित्रे भूरि कार्यं चिरं भयम् ।
26 12 13 25 24 11 26 14
गोप मात्रा मनो रम्यं मृत्युभागं विधोरजात् ॥
13 25 5 12

Also फलदीपिका

चान्द्रं रूपं लोक शूरो वरज्ञः कुड्ये चित्रं भाग्य लोके सुखानाम् ।
26 12 13 25 24 11 26 14 13 25
मेने राज्यं मृत्युभागाः प्रदिष्टाः मेषादीनां वर्णसंख्यैर्हिमांशोः ॥
5 12

The मृत्युभागाः Mrityubhagas of the other planets and of the Rasis in general as stated in other works have been collected and given in the following statement for easy reference:

In the Rasi mentioned hereunder.	Mrityu bhagas or fateful degrees of									
	Sun.	Mars.	Mercury.	Jupiter.	Venus.	Saturn.	Rahu.	Ketu.	Mandi.	Rasi.
Mesha ...	20	19	15	19	28	10	14	8	23	1
Vrishabha ...	9	28	14	29	15	4	13	18	24	9
Mithuna ...	12	25	13	12	11	7	12	20	11	22
Kataka ...	6	23	12	27	17	9	11	10	12	22
Simha ...	8	29	8	6	10	12	24	21	13	25
Kanya ...	24	28	18	4	13	16	23	22	14	2
Tula ...	16	14	20	13	4	3	22	23	8	4
Vrischika ...	17	21	10	10	6	18	21	24	18	23
Dhanus ...	22	2	21	17	27	28	10	11	20	18
Makara ...	2	15	22	11	12	14	20	12	10	20
Kumbha ...	3	11	7	15	29	13	18	13	21	24
Meena ...	23	6	5	28	19	15	8	14	22	10

Sloka 58. These Pushkarabhagas are referred to in the text in Adhyaya VII, Sloka 25 *infra.*

Sloka 61. **यत्तदेवप्लवत्वं** is another reading.

*cf.*सारावली

भवनाधिपदिङ्नाम प्लव इति यवनैः प्रयत्नतः कथितः ।
तत्प्लवगो विनिहन्यादाचिरेण महीपतिः शत्रून् ॥

The meaning is ' **यस्य भवनस्य राशेः स्वामिनो या दिक् तस्यां दिशि स राशिप्लवसंज्ञः । यथा मेषवृश्चिकयोः स्वामी भौमः तस्य दिक् दक्षिणा अतस्तत्र मेषवृश्चिकौ प्लवसंज्ञौ इत्यन्यत्रापि ज्ञेयम्** ' **बलभद्रः** ॥

These are useful in locating the direction towards which a thief may have absconded in the case of queries regarding things stolen. A King that sets out on an expedition in the direction indicated by the **प्लव** of his **जन्मराशि** will soon return victorious after subduing his enemy.

Adhyaya II.

Sloka 1. In the notes to sloka 8 of Adhyaya I the several parts of the Kalapurusha(**कालपुरुष**)beginning with the head were stated to be counted from Mesha and those of the owner of a horoscope from the Lagna. This is so far as the external appearance, *etc.* of the several parts of the body are concerned. Now the inherent qualities of the person are to be ascertained from the planets. These planets are then known as Karakas(**कारकाः**)and appertain to the owner of the horoscope just in the same way as they do to the Kalapurusha.

cf. बृहज्जातक

कालात्मा दिनकृन्मनस्तुहिनगुः सत्वं कुजो ज्ञो वचो
जीवो ज्ञानसुखे सितश्च मदनो दुःखं दिनेशात्मजः ।

Also सारावली

आत्मा रविः शीतकरस्तु चेतः सत्वं धराजः शशिजोऽथ वाणी
ज्ञानं सुखं देवगुरुर्मदश्च शुक्रः शनिः कालनरस्य दुःखम् ॥

The several constituents of Kalapurusha (**कालपुरुष**)will be strong or weak in proportion to the strength of the several planets representing them. But Saturn is an exception.

"शनौ बलिनि दुःखाभावः अबले दुःखप्राबल्यम्" When Saturn is strong, there is less of misery; when he is weak, misery predominates. cf. **सारावली**

आत्मादयो गगनगैर्बलिभिर्बलवत्तराः ।
दुर्बलैर्दुर्बलास्ते तु विपरीतं शनेः फलम् ॥

and the effects of these qualities will reveal themselves during the dasa periods of the planets concerned.

By the word **सौख्य** used in the text and translated as 'happiness' both wealth and progeny are also to be understood in addition to health and knowledge. For it is said

धनस्य सुखपरसाधनत्वात् सुखशब्देन धनमपि गृह्यते । सुखशब्देन पुनरपत्यमप्युच्यते । पुत्रजन्मविपत्तिभ्यां न परं सुखदुःखयोः । There is no greater happiness or misery than the birth or death of one's child.

Jupiter is therefore the giver of health, wealth, progeny and knowledge and that is why his association and aspect are said to be extremely beneficial.

Cf. **यवनः**

गुरुणा देहपुष्टिः स्याद्बुद्धिपुत्रार्थसम्पदः ।

By the word 'association' used above, occupation of the planet's house is also to be understood. This will be explained in Adhyaya XIV. *infra*, Saturn is the giver of all sorts of **दुःख** (misery).

cf. **यवनः**

सम्पदो गुरुसंयोगे शनियोगे विपत्तयः ।
चिन्तितव्यं सदा पुंसां सर्वभावानुसारतः ॥

In a horoscope, the Sun and the Moon must--not to say of the Lagna--be strong; otherwise it is not a satisfactory one. Of these, the Moon is the most important. For, it is said

चन्द्रार्कौ बलयुक्तौ कुजादयः प्रोक्तकालबलहीनाः ।
शुभफलदास्ते सर्वे दशासु योगेषु संचिन्त्याः ॥

Also

अमृतकिरणवीर्याद्वीर्यमाश्रित्य सर्वे विदधति फलमेते खेचराः साध्वसाधु ।

निजनिजविषयेषु व्याप्रियन्ते यथामूल्यलमिह मनसैवाधिष्ठितानीन्द्रियाणि ॥

Sloka 2. In saying that the Sun and the Moon are Sovereigns, it must be understood that the Sun is the King, the Moon being the Queen. Similarly, Jupiter is the Manthri (मंत्रिन्) and Venus his wife. *cf.* सूर्यजातक

अहं राजा शशी राज्ञी नेता भूमिसुतः खगः ।
सौम्यः कुमारो मन्त्री च गुरुस्तद्वल्लभा भृगुः ॥
प्रेष्यस्तथैव संप्रोक्तः सर्वदा तनुजो मम ।

एषां प्रयोजनम् । ‘ जन्मनि प्रश्नलग्ने वा यो ग्रहः सबलः स राजत्वादिकं करोति । निर्बलो राजत्वादिनाशकरः । यद्वा जन्मनि प्रश्नकाले वा बलवानुपचयस्थो यो ग्रहः स्यात्तदा तदुक्तो राजादिकस्तस्य साधकः स्यादन्यथा हानिकरः’ ॥

Slokas 3–5. For the several names for each of the planets, *cf.* शुकजातक

सूर्यो भानुस्तथादित्यो रविः प्रभाकरस्तथा ।
दिनेशश्च तमोहन्ता दिनकर्त्ता दिवामणिः ॥
शीतगुश्चन्द्रमाः सोमो रजनीपतिरेव च ।
शीतरश्मिर्निशानाथः शशी कुमुदिनीपतिः ॥
आरो वक्रो महीसूनुः रुधिरो रक्त एव च ।
अङ्गारक इति ख्यातः क्रूरदृक् क्रूरकृत्तथा ॥
सौम्यो ज्ञोऽत्र बुधश्चेति सोमजो बोधनस्तथा ।
एते सौम्यस्य पर्यायाः कुमारश्च प्रभासुतः ॥
गुरुर्जीवो देवमन्त्री देवतानां पुरोहितः ।
देवेज्य अङ्गिरासूनुर्बृहस्पतिरिति स्मृतः ॥
शुक्रो भृगुर्भृगुसुत आस्फुजिच्च सितस्तथा ।
उशना दैत्यपूज्यश्च कामः कविरिति स्मृतः ॥
कोणो मन्दः शनिः कृष्णः सूर्यपुत्रो यमस्तथा ।
पङ्गुः शनैश्चरः शौरिः कालच्छायासुतोऽसितः ॥
राहुस्तमोऽसुरोऽगुश्च स्वर्भानुश्च विधुन्तुदः ।
धाता च सैंहिकेयश्च भुजङ्गो भुजगस्तथा ॥
शिखी केतुर्ध्वजो धूम्रो मृत्युपुत्रोऽनिलस्तथा ।

Sloka 6. There are nine Upagrahas for the nine planets.

The Sun's Upagraha is (काल) Kala
,, Moon's ,, ,, (परिधि) Paridhi
,, Mars' ,, ,, (धूम) Dhuma
,, Mercury's ,, ,, (अर्धप्रहर) Ardhaprahara
,, Jupiter's ,, ,, (यमकण्टक) Yamakantaka
,, Venus' ,, ,, (कोदण्ड or इंद्रचाप or कार्मुक) Kodanda
,, Saturn's ,, ,, (मांदि or गुलिक) Mandi
,, Rahu's ,, ,, (पात or व्यतीपात) Pata
,, Ketu's ,, ,, (उपकेतु) Upaketu

For finding their several positions on any particular day, vide footnote on pages 275 and 276 in the text (Adhyaya IX, sl. 8) For their effects *vide* Adhyaya XIV, sl. 11, 13 & 14.

For detailed effects of the several Upagrahas occupying one or the other of the 12 bhavas, please refer to बृहत्पाराशर होरा

Six of these (Mandi, Dhuma, Paridhi, Kodanda, Pata and Upaketu) however appear to have been specially noticed. The author has dealt with Mandi almost elaborately in Slokas 1 to 9 of ch. IX. The remaining five are generally known as धूमादिपञ्चग्रहाः and for their effects in the several bhavas see notes under sloka 9, Adhyaya IX.

Sloka 9. About the malignity of weak Moon (क्षीणचंद्र) opinions are at slight variance. *cf.* (स्कंदहोरा) Skandahora

इन्दुः कृष्णचतुर्दश्यां क्षीणो भवति नान्यदा ।
अथ यावत्कुहूस्तावत्समे क्षीणतरो मतः ॥

Also

अमावास्यां चतुर्दश्यां क्षीणचन्द्रो न सर्वदा

The Moon is therefore weak only on the 14th and 15th days of her waning. The Moon is generally a benefic.

cf. यवनेश्वर

क्रूरग्रहोऽर्कः कुजसूर्यजौ च पापौ शुभाः शुक्रशशाङ्कजीवाः ।

But *cf.* **स्कंदहोरा**

क्षये सोमस्य सर्वे स्युर्बलिनोऽपि बलच्युताः ।
तस्य क्षीणत्वमेतावत्पापत्वे पर्यवस्यति ॥
अतः क्षीणः सपापः स्यात्क्रूर इत्यर्यमा पुनः ।
तस्मात्पापतरो ज्ञेयस्ताभ्यां भौमस्तथाविधः ॥
तेभ्यः शनिश्च तादृक्ष इत्येने पापसंज्ञिताः ।

Also **गुणाकर**

क्रूरग्रहाः कुजदिवाकरसूर्यसूनुक्षीणेन्दवः शशिसुतः सहितस्तु तैः स्यात् ।
पूर्णेन्दुजीवभृगुजाः शुभसंज्ञिताः स्युस्तैः संयुतस्तुहिनरश्मिसुतोऽपि सौम्यः ॥

Also **सारावली**

गुरुबुधशुक्राः सौम्याः सौरिकुजार्कास्तु निसर्गतः पापाः ।
शशिजोऽशुभसंयुक्तः क्षीणश्च निशाकरः पापः ॥

A very weak Moon must therefore be treated as malignant. Mercury is by nature a benefic planet. But his benefic qualities are so weak that he may better be classed as indifferent ————neither benefic nor malefic.

cf. **स्कन्दहोरा**

सौम्यो जहाति तद्योगे शुभतामियतैव सः ।
उच्यते पाप इत्येष द्वैविध्ये पर्यवस्थया ॥

He becomes really benefic or malefic according to his association. If he is associated with weak Moon, the Sun, Mars or Saturn, he is a malefic. When associated with the waxing Moon(वृद्धिचंद्र),Jupiter or Venus he is a benefic. When he is alone, he is more a benefic than a malefic.

cf. Yavaneswara

सौम्यस्तु सौम्यो व्यतिमिश्रितोन्यैर्वर्णैः स्वतुल्यप्रतिमत्वमेति ॥
(वर्गैस्तु तुल्यप्रकृतित्वमेति is another reading).

Also **वासिष्ठ**

सूर्यभौमशनिराहुकेतवः क्रूरसंज्ञखचराः क्षयचन्द्रः ।
पूर्णचंद्रगुरुशुक्रचन्द्रजाः सर्वकर्मसु हि सौम्यखेचराः ॥

Sloka 10. cf. यवनेश्वर

मासे तु शुक्लप्रतिपत्प्रवृत्तेराद्ये शशी मध्यबलो दशाहे ।
श्रेष्ठो द्वितीयेऽल्पबलस्तृतीये सौम्यैस्तु दृष्टो बलवान् सदैव ॥

Sloka 14. cf. शुकजातक

बालवयस्को भौमः कुमारवेषो बुधो गुरुस्त्रिंशत् ।
शुक्रः षोडशवर्षो रविश्च पञ्चाशदब्दश्च ॥
चन्द्रः सप्ततिवर्षः शतवर्षं शनिराहुकेतोः स्यात् ।
येषां प्रसूतिसमये सदसत्फलदायकः खेटः ॥
बलसहितः स्वावस्थाकालस्वरूपं विशेषतः कुर्यात् ।

Sloka 15. First half. प्रयोजनम्- शाखेशबले उपनयनादि प्राशास्त्यम्

Latter half. But according to पराशर

राह्वारपङ्गुचन्द्राश्च विज्ञेया धातुखेचराः ॥
मूलग्रहौ सूर्यशुक्रावपरा जीवसंज्ञकाः ॥

Slokas 16–18. cf. गुणाकर

दीप्तः स्वोच्चगतः स्ववेश्मनि भवेत् स्वस्थस्तथा हर्षितो
मित्रर्क्षे शुभवर्गगो गगनगः शान्तः प्रदिष्टो बुधैः ।
शक्तो रश्मिवितानभृच्च विकलः सूर्यांशुलुप्तद्युतिः
दीनो नीचगतः खलोऽरिविजितः खेटार्दिता पीडितः ॥

दीप्ते प्रतापविजिताखिलशत्रुपक्षो
लक्ष्मीयुतः समदकुञ्जरराजकेलिः ।
स्वस्थे गृहाश्वमणिधान्यकुटुम्बयुक्तः
सेनापतिर्भवति हन्त्यखिलारिपक्षम् ॥
कनकयुवतियुक्तो हर्षितो निर्जितारिः
ससुखधनविलासो धर्मधीयुक् प्रशान्ते ।
वसनकुसुमाकन्ताकेलिरिष्टस्य शक्ते
व्रजति गतधनत्वं दैन्ययुक्तस्तु दीने ॥
स्थानच्युतः क्षतधनो विकलेऽरिभीतिः
स्यात्पीडिते गदयुतो वहुदुःखशोकः ।
दुःखान्वितो गतधनो वनितावियुक्तो
देशान्तरं व्रजति वीतसुहृत्खलाख्ये ॥

Also सारावली

दीप्तः स्वस्थो मुदितः शांतः शक्तो निपीडितो भीतः ।
विकलः खलश्च कथितो नव प्रकारो ग्रहो हरिणा ॥

स्वोच्चे भवति च दीप्तः स्वस्थः स्वगृहे सुहृद्गृहे मुदितः ।
शांतः शुभवर्गस्थः शक्तः स्फुटकिरणजालश्च ॥

विकलो रविलुप्तकरो ग्रहाभिभूतो निपीडितश्चैवम् ।
पापगणस्थश्च खलो नीचे भीतः समाख्यातः ॥

दीप्ते विचरति पुरुषः प्रतापविषमाग्निदग्धरिपुवर्गः ।
लक्ष्म्यालिङ्गितदेहो गजमदसंसिक्तभूपृष्ठः ॥

स्वस्थः करोति जन्मनि रत्नानि सुखानि कनकपरिवारान् ।
नृपतेर्दण्डपतित्वं गृहधान्यकुटुम्बपरिवृद्धिम् ॥
मुदिते विलसति मुदितो विलासिनीकनकरत्नपरिपूर्णः ।
विजितसकलारिपक्षः समस्तसुखभाङ्नरो भवति ॥
शान्ते प्रशान्तचित्तः सुखधनभागी महीपतेः सचिवः ।
विद्वान् परोपकारी धर्मपरो जायते पुरुषः ॥
स्त्रीवस्त्रमाल्यगन्धैर्विलसति पुरुषः सदा विततकीर्त्तिः ।
दयितः सर्वजनस्य च शक्ताख्ये भवति विख्यातः ॥
दुःखैर्व्याधिभिररिभिः प्रपीड्यते पीडिताख्ये तु ।
देशाद्देशं विचरति बन्धुवियोगाभिसन्तप्तः ।
बहुसाधनोऽपि राजा प्रध्वस्तबलः प्रपीडितो रिपुणा ॥
नाशमुपयाति विजितो भीते दैन्यं परं प्राप्तः ।
स्वस्थानपरिभ्रष्टः क्लिष्टो मलिनः प्रयाति परदेशम् ॥
विध्वस्तबलो विकले रिपुबलसंचकितचित्तश्च ।
स्त्रीभरणदुःखतप्तः समस्तधननाशकलुषितमनस्कः ।
न जहाति शोकभारं कथमपि खलसंज्ञिते पुरुषः ॥

Sloka. *19. cf.* गुणाकर

ताम्रः श्वेतः शोणनीलातिपीतः चित्रः कृष्णश्चेति सूर्यादिवर्णाः ।

Also सूर्यजातक

ताम्रः शुभ्राणि रक्तानां तथा हरितपीतयोः ।
विचित्रासितयोः सूत मन्मुखाः स्वामिनः स्मृताः ॥

प्रयोजनं तु जन्मयात्राप्रश्नादौ बलिष्ठग्रहवर्णद्रव्यलाभः। अन्यथा हानिकराः। ग्रहदौष्ट्ये तत्तद्वर्णपुष्पैर्दिक्स्वामिपूजा कार्येति

Sloka 20. cf. जातकरत्नमाला

ताम्रं स्यान्मणिहेममिश्रितमतो रौप्यं तु मुक्तायसी
प्रश्ने जन्मनि वा बलाधिकतराल्लाभाधिकं चिन्तयेत्।

अत्र स्वगृहे स्थितगुरोः सुवर्णमपि वेदितव्यम्॥ एतदुक्तं बादरायणेन

अर्कस्य ताम्रं मणयो हिमांशोर्भौमस्य हेमेन्दुसुतस्य शुक्तिः।
जीवस्य रौप्यं स्वगृहे स्थितस्य तस्यैव हेमोशनसश्च मुक्ता॥
तीक्ष्णांशुदेहप्रभवस्य सीसं कृष्णायसं च प्रवदन्ति तज्ज्ञाः।

प्रयोजनं च सूतिकागृहे बलवद्ग्रहधातुमता वाच्या तच्छुभदशायां तद्द्रव्यलाभः। अथाशुभदशायां तद्द्रव्यहानिर्ज्ञेया। *Vide* also Adhyaya XVIII-sl. 19. For the deities of the several planets *cf.* यवनेश्वर

देवा ग्रहाणां जलवह्निविष्णुप्रजापतिस्कन्दमहेन्द्रदेव्यः।
चन्द्रार्कचान्द्यर्कजभौमजीवशुक्रांश्च यज्ञेषु यजेत शश्वत्॥

तथा चौरनामानयने बलवद्ग्रहोक्तदेवतापर्यायनाम वक्तव्यः। तथा च यात्रायां ग्रहदेवतां संपूज्य तद्दिशं यायात्।

Sloka 22. Cf. बृहज्जातक

वस्त्रं स्थूलमभुक्तमग्निकहतं मध्यं दृढं स्फाटितम् (अर्कात्)

Also जातकरत्नमाला

स्थूलं नूतनमेव वह्निकहतं वस्त्रं जलैराहतं
मध्यस्थं दृढमेव जीर्णकमिदं रव्यादितश्चिन्तयेत्॥

Also सारावली

वस्त्राणां स्थूलाहतशिखिजलहतमध्यदृढसुजीर्णानाम्॥

Sloka 23. cf. सारावली

भानुः शुक्रः क्षमापुत्रः सैंहिकेयः शनिः शशी।
सौम्यस्त्रिदशमन्त्री च प्राच्यादि दिगधीश्वराः॥

दिक् स्वामिप्रयोजनं तु केन्द्रस्थे ग्रहे सूतिकागृहद्वारज्ञानम्। हृतनष्टादिषु चोरादेर्गमनीयदिक्ज्ञानम् –प्रयोजनं सारावल्यां

पावकजलगुहकेशवशक्रशचीवेधसः पतयः ॥
सूर्यादिग्रहदैवतमन्त्रैः समभिपूज्य तामाशाम् ।
कनकगजवाहनादीन् प्राप्नोति नृपोऽरितः शीघ्रम् ॥

ऋतुस्वामिप्रयोजनं तु नष्टजातके ऋतुनिर्देशः स च लग्ने यो ग्रहो भवति तद्वशेन कार्यः । यदि च लग्ने न कोऽपि ग्रहः तदा द्रेष्काणस्वामिवशेन । यदि च लग्ने द्व्याद्याः ग्रहाः भवन्ति तदा बलवद्ग्रहवशेन । तथा च मणित्थः

" द्व्याद्यैर्लग्नोपेतैर्यो बलवान् तद्ग्रहस्तु निर्देशः ॥ इति

If there is a planet in the Lagna, then the season typified by that planet should be predicted. When there are more than one planet in the Lagna, then it is with reference to the strongest planet. If there is no planet in the Lagna, it is only in that case that the season should be predicted with reference to the planet owning the Lagna Drekkana.

The six seasons, their approximate periods and their lords are given in the following statement:—

Name of the Season	Approximate period.		Lord of the Season.
	From	To	
1 वसन्त (Vasanta)	20th March	19th May	Venus
2 ग्रीष्म (Grishma)	20th May	19th July	Mars
3 वर्ष (Varsha)	20th July	19th Septr	Moon
4 शरद् (Sarat)	20th Septr	19th Novr	Mercury
5 हेमन्त (Hemanta)	20th Novr	19th Januy	Jupiter
6 शिशिर (Sisira)	20th Januy	19th March	Saturn

Sloka 24. *cf.* बृहज्जातक

"देवाम्ब्वग्निविहारकोशशयनक्षित्युत्करेशाः क्रमात् " (अर्कात्)

प्रयोजनं- बलवति ग्रहे ग्रहोक्तस्थाने प्रसवज्ञानं- हृतनष्टादेश्चौरादेः तदेव स्थानं द्रव्यस्य च

Sloka 26. (1st half) cf. गुणाकर

> वागीशशुक्रावथ भानुभौमौ शीतद्युतिः शीतकरात्मजश्च ।
> द्विजातिकानामधिपा भवन्ति शनैश्चरः सङ्करसंभवानाम् ॥

Also बृहज्जातक

> विप्रादितः शुक्रगुरू कुजार्कौ शशी बुधश्चेत्यसितोऽन्त्यजानाम् ॥

But according to पराशर the Vaisya community is represented by the Moon and Mercury and the Sudras by Saturn. *cf.*

> गुरुशुक्रौ विप्रवर्णौ कुजार्कौ क्षत्रियौ द्विज ।
> शशिसौम्यौ वैश्यवर्णौ शनिः शूद्रो द्विजोत्तम ॥

प्रयोजनं हृतनष्टादिषु ग्रहबलात् चौरादीनां जातिज्ञानं तदुक्तं च वयो जातिश्च लग्नपादिति- एषामपघातेन वर्णोपघातो वाच्यः

(*Latter half*) These gunas should be ascertained after examining the strength of the planets owning, occupying and aspecting the Lagna and the Rasi occupied by the Moon. But it must be remembered that the planet in whose Trimsamsa the Sun is situated plays a prominent part in moulding the guna of the native *cf.* गुणाकर

> सत्वं शशीज्योष्णकराः सितज्ञौ रजस्तमः क्ष्मातनयार्कपुत्रौ ।
> यस्याभ्रवन्ह्यंशगतो दिनेशस्तत्तुल्यसत्वादिगुणो नरः स्यात् ॥

वराहोऽपि । स्वल्पजातके

" सत्वं रजस्तमो वा त्रिंशांशे यस्य भास्करस्तादृक् " ॥

अथगुणस्वरूपं

> यः सात्विकस्तस्य दयास्थिरत्वं सत्यार्जवं ब्राह्मणदेवभक्तिः ।
> रजोधिकः काव्यकलाशतस्त्रीसंसक्तचित्तः पुरुषोऽतिशूरः ॥

मिश्रैर्गुणे मिश्रगुणस्वभावा भवन्ति सर्वेऽपि शरीरभाजाः ॥ इति नन्वर्कस्येन्दोश्च त्रिंशांशकाभावात् अनयोः सत्वादिगुणनिरूपणं व्यर्थं स्यादिति चेन्न । यतो बलवद्ग्रहवशादपि प्रकृतिर्भवति । तदुक्तं देवकीर्तिना " बलवद्भिर्गुणो भवेज्जातः " इतिः अत्र त्रिंशांशकतो गुणविचारो मुख्यः । यदाह श्रीसूर्यः " यस्य त्रिंशांशगश्चाहं तद्गुणो जातको भवेत् "

Sloka 27. (Latter half) cf. बृहज्जातक

" शिखिभूखपयोमरुद्गणानां वशिनो भूमिसुतादयः क्रमेण "

प्रयोजनं स्वदशायां महाभूतकृतां छायां व्यञ्जयति । वक्ष्यति च
छायां महाभूतकृतां च सर्वे निवृत्तयन्ति स्वदशामवाप्य ।
क्ष्म्ब्वग्निवाय्वम्बरजान् गुणांश्च नासास्यत्वक्दृक्श्रवणानुमेयात् ॥

Sloka 28. (*First half*) *Vide* Sloka 71. *infra.*
(*Latter half*) *cf.* बृहज्जातक

स्नाय्वस्थ्यसृक्त्वगथ शुक्रवसे च मज्जा
मन्दार्कचंद्रबुधशुक्रसुरेज्यभौमाः ॥

प्रयोजनं तु जन्मकाले यो ग्रहो बलवान् तत्प्रवृत्तिकः तद्धातुसारश्च तात्कुलजातो भवति– यद्वा हृतनष्टप्रश्ने एवं विधरूपाश्चौरादयः व्याधितप्रश्ने च लग्नस्वामिलग्ननवांशस्वामिवशेन तद्दोषोद्भवा पीडा च वक्तव्येत्यादि ।

Sloka 29. *cf.* बृहज्जातक

अयनक्षणवासरर्तवो मासोर्द्धंच समाश्च भास्करात् ।

कटुकलवणतिक्तमिश्रिता मधुराम्लौ च कषाय इत्यपि

(*First half*) प्रयोजनं–आधानकाले यो बलवान् तदुक्तरसस्य दोहदो गर्भिण्या भवति

cf. सारावली

मासि तृतीये स्त्रीणां दोहदको जायतेऽवश्यम् ।
मासाधिपस्वभावैर्विलग्नयोगादिभिश्चान्यत् ॥

भोजनाश्रये च प्रश्ने गृहोदये तन्नवांशे वा (तद्ग्रहलग्ननवांशवशात्) तद्रसान्वितभोजनं वक्तव्यम्

(*Latter half*) अयनादिस्वामिप्रयोजनमाह मणित्थः (कल्याणवर्मा चा)

लग्नांशकपतितुल्यः कालो लग्नोदितांशसमतुल्यः ।
वक्तव्यो रिपुविजये गर्भाधानेऽथकार्यसंयोगे ॥

अस्यार्थः । लग्ने यावन्तो नवांशाः उदिता भवन्ति तावत् संख्यः कालोंशकः स्वामिवशेन वक्तव्यः । तद्यथा यदि नवांशस्वामी रविर्भवति तदा तावदयनान्तरं कार्यसिद्धिर्भवति– एवं चन्द्रे तावन्मुहर्तानन्तरं भौमे तावद्दिनान्तरमित्यादि ज्ञेयम् । एवं प्रश्नलग्नात् प्रसवेऽपि कालो ज्ञेयः । केचित्तु प्रश्नलग्ने यस्य ग्रहस्य नवांशकोदयो भवति स च ग्रहस्तस्मान्नवांशकाद्यावत्संख्ये नवांशे भवति तत्संख्यो नवांशस्वामिग्रहवशेनायनादि वा कालो वक्तव्य इत्याहुः॥

Suppose at the time of a query, the Vrischika Navamsa in the Mithuna lagna to have risen (2 signs 4 degrees 12 minutes), and the position of Mars, the lord of Vrischika, to be 9 signs 11 degrees 13 minutes. The period typified by the same planet is day. According to the first view, Vrischika Navamsa being the 2nd in the Mithuna lagna, the completion or success of the business has to be predicted to happen in 2 days. According to the second view. as Mesha, the Navamsa occupied by Mars, happens to be the 6th when counted from Vrischika, the time in which the success or otherwise is expected to occur will be 6 days.

Slokas 30–31. *cf.* **सारावली**

संपश्यन्ति स्थानात् सदा ग्रहाश्चरणवृद्धितः सर्वे ।
त्रिदशत्रिकोणचतुरस्रसप्तमानां फलं क्रमेणैव ॥
पूर्णं पश्यति रविजस्तृतीयदशमं त्रिकोणमपि जीवः ।
चतुरस्रं भूमिसुतो द्यूनं च सितार्कशशिबुधाः क्रमशः ॥

The following from **पराशर** regarding **राहुदृष्टि** will be of interest

सुतमदननवान्ते पूर्णदृष्टिं तमस्य युगलदशमगेहे चार्द्धदृष्टिं वदन्ति ।
सहजरिपुविपश्यन् पाददृष्टिं मुनीन्द्रा निजभवनमुपेतो लोचनान्धः प्रदिष्टः ॥

To calculate the correct **दृग्बल** of planets, please see chapter 2 of **श्रीपतिपद्धति.**

Sloka 33-34. The positional strength of planets will be better understood by a reference to Sripati's rules on the subject, *vide* **श्रीपतिपद्धति**– *Adhyaya* IV-sl 8.

Sloka 35. *cf.* **यवनेश्वर**

गुर्विन्दुजौ पूर्वविलग्नसंस्थौ नभःस्थलस्थौ च दिवाकरारौ ।
सौरोऽस्तगः शुक्रनिशाकरौ तु जलेस्थितावग्र्यबलौ भवेताम् ॥

Also **सारावली**

लग्ने जीवबुधौ दिवाकरकुजौ व्योम्नि स्मरे भास्करि–
र्बन्धाविन्दुसितौ दिशाकृतमिदं

Also **श्रीपतिपद्धति** *Adhyaya* III-sl. 7 and 8.

Sloka 36. *cf.* **बृहज्जातक**

निशि शशिकुजसौराः सर्वदा ज्ञोऽह्नि चान्ये
बहुलसितगताः स्युः क्रूरसौम्याः क्रमेण ।
द्व्ययनदिवसहोरामासपैः कालवीर्यम्

The reader will see that the author has referred to six of the subdivisions of **कालबल** in this sloka, *viz.* (1) **नतोन्नतबल** (2) **पक्षबल** (3) **वर्षपबल** (4) **मासपबल** (5) **दिनपबल** and (6) **होरापबल** *cf.* **श्रीपतिपद्धति** *Adhyaya*-III *Slokas*-9-14.

Also *cf.* **सारावली**

जीवार्कास्फुजितोऽह्नि विच्च सततं मन्देन्दुभौमा निशि
होरामासदिनाब्दपाश्च बलिनः सौम्याः सितेऽन्येऽसिते ।

Sloka 37. *cf* **सारावली**

सङ्ग्रामे जयिनो विलोमगतयः संपूर्णगावो ग्रहाः
सूर्येन्दू पुनरुत्तरेण बलिनौ सत्योक्तचेष्टाबले ॥
उत्तरमयनं प्राप्ताः शुक्रकुजार्केन्द्रमंत्रिणो बलिनः ।
याम्यं शशिरविपुत्रौ द्वयेऽपि शशिजः स्ववर्गस्थः ॥

Also **बृहज्जातक**

उदगयने रविशीतमयूखौ वक्रसमागमगाः परिशेषाः ।
विपुलकरा युधि चोत्तरसंस्थाश्चेष्टितवीर्ययुताः परिकल्प्याः ॥

The words **समागमोपग** in the text have been used in a purely technical way, the meaning being "when in conjunction with the Moon" *cf.* "**समागमगाः चन्द्रेण सहिताः बलिन एव, चन्द्रेण संयोगो ग्रहाणां समागमशब्दो वाच्यः**" (**उत्पलः**)

The sloka (in the text) may be translated thus :—

Venus, Mercury, Mars, Jupiter and Saturn when in their retrograde motion or in conjunction with the Moon are considered to be victorious (in planetary war). The Sun and the Moon are strong in the Uttarayana *etc.*

'**सौम्याक्षेपयुता- सौम्या** means (I think) 'Northern' here and **क्षेप** means 'additive.' *Vide* **श्रीपतिपद्धति** *Adhyaya*-III-15&16.

Also *cf.* **शम्भुहोराप्रकाश**

वक्रो रणे चोत्तरगो बिधत्ते चेष्टाबलं चंद्रसमागमेऽपि ॥

The following slokas from **खारावली** describing the effects of some of the kinds of balas will be found to be useful: -

उच्चबलेन समेतः परां विभूतिं ग्रहः प्रसाधयति ।
पुंसामथ साचिव्यं त्रिकोणबलवान् बलपतित्वम् ॥
स्वर्क्षबलेन च सहितः प्रमुदितधनधान्यसंपदाक्रन्तम् ।
मित्रबलेन च युक्तो जनयति कीर्त्यान्वितं पुरुषम् ॥
तेजस्विनमतिसुभगं सुस्थिरविभवं नृपाच्च लब्धधनम् ।
निजहोराबलयुक्तो जनयति विक्रान्तमतिचिन्त्यम् ॥
स्वद्रेक्काणबलेनाहीनो गुणभाजनं ग्रहः कुरुते ।
स्वनवांशकबलयुक्तः करोति पुरुषं प्रसिद्धं च ॥
सप्तांशकबलसहितः साहसिकं वित्तकीर्त्याढ्यम् ।
द्विरसांशबलसमेतः कर्मरतपरोपकारकं चैव ॥
त्रिंशांशबलेन तथा विकसत्सौख्यं गुणान्वितं कुर्यात् ।
शुभदर्शनफलसहितः पुरुषं कुर्याद्धनान्वितं ख्यातम् ॥
सुभगं प्रधानमखिलं सुरूपदेहं सुसौख्यं च ।
पुंस्त्रीभवनबलेन च करोति जनपूजितं कलाकुशलम् ॥
पुरुषं प्रसन्नचित्तं कल्यं परलोकभीरुं च ।
स्थानबलेन समेतः स्थितिसौख्यं सुहृच्च भागाढ्यः ॥
धीरो निश्चलवित्तः स्वतन्त्रकर्मा भवेन्मनुजः ।
आशाबलसमुपेतो नयति स्वदिशं नभश्चरः पुरुषम् ।
नीत्वा वस्त्रविभूषणवाहनसौख्यान्वितं कुरुते ॥
आयनबलसमुपेतो दद्याद्विविधार्थसङ्गमं स्वदिशि ॥
क्वचिद्राज्यं क्वचित्पूजां क्वचिद्द्रव्यं क्वचिद्यशः ।
ददाति विहगश्चित्रं चेष्टावीर्यसमन्वितः ॥
वक्रिणस्तु महावीर्याः शुभा राज्यप्रदा ग्रहाः ।
पापा व्यसनिनां पुंसां कुर्वंति च वृथाटनम् ॥
स्वस्थशरीरसमागमसुकरोद्भवजयबलेन विदधाति ।
शुभमखिलं विहगेन्द्रो राज्यं च विनिर्जितारातिम् ॥
रात्रिदिवाबलपूर्णैर्भूगजलाभेन शौर्यपरिवृद्धया ।
मलिनयति शत्रुपक्षं भजति च लक्ष्मीं नभश्चरैः पुरुषः ॥
द्विगुणा द्विगुणं दद्युर्वर्षाधिपमासदिवसहोरेशाः ।
क्रमपरिवृद्धया सौख्यं स्वदशासु धनं च कीर्तिं च ॥

पक्षबलाद्रिपुनाशं रत्नाम्बरहस्तिसम्पदं दद्युः ।
स्त्रीकनकभूमिलाभान् कीर्तिं च शशाङ्ककरधवलाम् ॥
सकलकरभारभारितनिर्मलकरजालभासुराः सततम् ।
राज्यं ग्रहाः प्रदद्युः सौख्यं च मनोरथातीतम् ॥
आचारसत्यशुभशौचयुताः सुरूपास्तेजस्विनः कृतविदो द्विजदेवभक्ताः ।
स्रग्वस्त्रगन्धजलभूषणसंप्रियाश्च सौम्यग्रहैर्बलयुतैः पुरुषा भवंति ॥
लुब्धाः कुकर्मनिरता निजकार्यनिष्ठाः साधुद्विषः सकलहाश्च तमोभिभूताः ।
क्रूराः सदा वधरता मलिनाः कृतघ्नाः पापग्रहैर्बलयुतैः पिशुनाः कुरूपाः ॥

Sloka 38. Here the author wants to mention the number of sub-divisions of the several kinds of balas, *viz.,*

(1) **दृग्बल** is by itself one;

(2) **स्थानबल** consists of 5 sub-divisions, viz; (i) **उच्चबल** (ii) **सप्तवर्गजबल** (iii) **युग्मायुग्मबल** (iv) **केन्द्रादिबल** and (v) **द्रेष्काणबल**.

(3) **निसर्गबल** is by itself one and has no subdivision.

(4) **चेष्टाबल** is said to consist of 5 sub-divisions; what these are, it is not exactly known. [i **वक्र**, ii **समागम**, iii **उदगयन बल**, iv **अयनबल** and v **युद्धबल** ?] *Vide Slokas* 16½ to 18 *Adhyaya* III Sripatipadhati.

(5) **दिग्बल** is by itself one.

(6) **कालबल** is composed of (i) **नतोन्नतबल** (ii) **पक्षबल** (iii) **दिनरात्रित्रिभागबल** (iv) **वर्षपबल** (v) **मासपबल** (vi) **दिनपबल** and (vii) **होरापबल**.

Sloka 40. *cf.* फलदीपिका

साद्धानि षट् तीक्ष्णकरो बलीयान् चन्द्रस्तु षट् पञ्च वसुन्धराजः ।
सप्तेन्दुसूनो रविवद्गुरोस्तु साद्धानि पञ्चाथ सितो बली स्यात् ॥
मंदस्तु पञ्चैव हि षड्बलानां संयोग एवापरथाऽ न्यथा स्युः ।
एवं ग्रहाणां स्वबलो बलानि विचिन्त्य सम्यक् कथयेत्फलानि ॥

Sloka. 41. This sloka gives only the **तात्कालिक** friendship of planets due to their occupying certain houses.

cf. शम्भुहोराप्रकाश

10 3 11 4 2 12
तात्कालिकाः स्युः सुहृदो नभोगाः ख विक्रमायाम्बुधनव्यय स्थाः ।

1 7 8 9 5 6
एकर्क्षसप्ताष्टम धर्म पुत्रोपगारिगास्ते रिपवो निरुक्ताः ॥
मैत्रीचक्रं भावतः कैश्चिदुक्तं नैतच्छ्रीपत्यादिकानां मतं हि ।
लग्ने नैसर्गाद्यथा स्थानसंस्थैः खेटैर्मैत्रीयोगपूर्वं विचिन्त्यम् ॥

Slokas 42-45 In order to find out the natural friendship or otherwise of planets with respect to any one of the rest, the following general rule is laid down by सत्याचार्य *Viz.*,

सुहृदस्त्रिकोणभवनाद्ग्रहस्य सुतभे व्ययेऽथ धनभवने ।
स्वजने निधने धर्मे स्वोच्चे च भवन्ति नो शेषाः ॥

Planets are friendly to any given planet when they happen to own the 5th, 12th, 2nd, 4th, 8th, and 9th houses counted from the planet's Moolatrikona Rasi, or when they happen to own the planet's exaltation Rasi. The rest are his enemies.

Take for example the case of the Sun. His Moolatrikona Rasi is सिंह. The 5th and 8th houses from सिंह are धनुस् and मीन respectively, and both of them are owned by Jupiter. He is therefore a friend of the Sun. The 12th house from सिंह is कटक and the Moon, the lord of that sign, is also his friend. The 4th and 9th houses from सिंह are वृश्चिक and मेष respectively and Mars is the lord of these two signs, and is thus a friend of the Sun. The lord of the 2nd house from सिंह is Mercury. As this planet is also the lord of another Rasi, *viz.*, मिथुन, which is the 1 th (from सिंह), a house not mentioned in the sloka of सत्याचार्य quoted above, he must be considered as partly friendly and partly inimical, that is, a neutral planet. The Sun's उच्चराशि is मेष and its lord is Mars, who has already been proved to be his friend. Thus it will be seen that Mars, Jupiter, and the Moon are the friends of the Sun, and Mercury his neutral, The other two planets, *viz.* Venus and Saturn are his enemies. Similarly in the case of other planets. *cf.* बृहज्जातक

सत्योक्ते सुहृदस्त्रिकोणभवनात् स्वात् स्वान्त्यधीधर्मपाः
स्वोच्चायुःसुखपाः स्वलक्षणविधेर्नान्यैर्विरोधादिति ॥

But Yavaneswara holds the following view:

रवेर्गुरुर्मित्रमतोऽन्यथान्ये गुरोस्तु भौमं परिहृत्य सर्वे ।
चान्द्रेरनर्का भृगुनन्दनस्य त्वर्केन्दुवर्जं सुहृदः प्रदिष्टाः ॥
भौमस्य शुक्रः शशिजश्च मित्रे इन्दोर्बुधं देवगुरुं च विद्यात् ।
सौरस्य मित्राण्यकुजेन्दुसूर्याः शेषान् रिपून्विद्धि नृणां च तद्वत् ॥

Only some authorities hold the above view and not all, says Varahamihira

cf. बृहज्जातक

जीवो जीवबुधौ सितेन्दुतनयौ व्यर्का विभौमाः क्रमा-
द्वीन्द्वर्का विकुजेन्द्विनाश्च सुहृदः केषांचिदेवं मतम् ॥

For friends of Rahu and Ketu, the following is stated in **सर्वार्थचिन्तामणिः**

राहोस्तु मित्राणि कवीज्यमंदाः केतोस्तथैवात्र वदन्ति तज्ज्ञाः ॥

Sloka 48. Vide infra Adhyaya XVIII sl. 30.

Slocka 52. The harmful yogas as given by Mantreswara in his **फलदीपिका** are as follow:

धर्मे सूर्यः शीतगुर्बन्धुभावे शौर्ये भौमः पञ्चमे देवमन्त्री ।
कामे शुक्रश्चाष्टमे भानुपुत्रः कुर्यात्तस्य क्लेशमित्याहुरन्ये ॥

Sloka 67. But according to Garga, Saturn in Tula, Dhanus or Meena identical with the Lagna is capable of conferring royalty on the native; for he says.

तुलाकोदण्डमीनानां लग्नसंस्थः शनैश्चरः ।
करोति भूपतिं जातमन्यराशौ गतायुषम् ॥

Sloka 72. Saturn is said to have his full (दिग्बल) Digbala in the 7th house, *vide sloka 35 supra.* It is therefore difficult to reconcile with the above the statement made in this sloka that he becomes barren of effect when in the 7th house.

Sloka 82. बृहज्जातक

दिनकररुधिरौ प्रवेशकाले गुरुभृगुजौ भवनस्य मध्ययातौ ।
रविसुतशशिनौ विनिर्गमस्थौ शशितनयः फलदस्तु सर्वकालम् ॥

Sloka 84. *cf.* अथ ग्रहाणां बालाद्यवस्थाफलानि पराशरहोरायाम्

बालो रसां (6) शैरसमे प्रदिष्टस्ततः कुमारो हि युवाथ बृद्धः ।
मृतः क्रमादुत्क्रमतः समर्क्षे बालाद्यवस्था कथिता ग्रहाणाम् ॥
फलं तु किञ्चिद्वितनोति बालश्चार्द्धं कुमारः यतते न पुंसाम् ।
युवा समग्रं खचरोऽथबृद्धः फलं च दुष्टं मरणं मृताख्यः॥

In some of the astrological works, these states or conditions of a planet are described as due to the nature of the Rasi occupied by it; thus a planet is बालः or in a state of infancy when it is placed in the house of a friend——some subdivide this condition into अतिबाल and बाल. It is in a state of कुमार or boyhood when in its own houses (or in a Trikona Rasi according to some). It is said to be in युवन् or a state of adolescence when it occupies a त्रिकोण or उच्चराशि– some recognise these as two distinct conditions and call them युवा and राजा respectively———, and so on. Separate effects are ascribed to each of these conditions and are declared to be felt during the dasa period of the planet concerned. *cf.*

अतिबालः समर्क्षस्थो बालो बन्धुगृहे स्थितः ।
कुमारः स्वगृहस्थः स्यात्स्वत्रिकोणे युवा भवेत् ॥
उच्चस्थानगतो राजा वृद्धः शत्रुगृहे स्थितः ।
मृतनामातिनीचस्थो दशैवं स्थानतो भवेत् ॥
सूर्यादुदितमात्रोसावतिबालः प्रकीर्त्तितः ।
बालः सप्तांशकादूर्द्धं कुमारस्तु ततः परम् ॥
वक्रारम्भे युवा प्रोक्तो वक्रकाले नराधिपः ।
आसन्नास्तमये वृद्धो मृतोऽस्तङ्गत ईरितः ॥
अतिबालदशाकाले जडो रोदनतत्परः ।
बालस्य तु दशाकाले क्रीडासक्तः प्रहर्षितः ॥
कुमारस्य दशाकाले विद्यासक्तश्चरेन्नरः ।
यौवनस्य दशाकाले कामी भोगपरायणः ॥
बृद्धसंज्ञदशाकाले बलहीनो जडात्मकः ।
मृतग्रहदशाकाले मरणं याति निश्चयात् ॥

Also सारावली

स्वमित्रक्षेत्रसंस्थानां ग्रहाणां बालसंज्ञिका
स्वत्रिकोणगतानां च कुमारो नाम संज्ञितः ॥
ग्रहाणां स्वोच्चसंस्थानां युवराजः प्रकीर्तितः ।
शत्रुक्षेत्रगतानां च वृद्धो नाम तथेरितः ॥
नीचगानां ग्रहाणां च दशा मरणसंज्ञिता ।
तत्तत्फलसमायुक्ता ग्रहाणां तु दशा भवेत् ॥
बालैः सुखी सुशीलश्च यौवनैरवनीश्वरः ।
वृद्धैर्व्याधिर्ऋणे वृद्धिर्मरणे मरणं व्ययम् ॥
पुंराशिगैः शुभखगैर्धीराः सङ्ग्रामरक्षिणो बलिनः ।
निश्चेष्टैः सुकठोराः क्रूरा मूर्खाश्च जायन्ते ॥
युवतिभवनस्थितेषु च मृदवः सङ्ग्रामभीरुकाः पुरुषाः ।
जलकुसुमवस्त्रनिरताः सौम्याः कल्याः स्वजनहृष्टाः ॥

Sloka 85. cf. पराशार

त्र्यंशादंशं त्रिभागं च कल्पयित्वा पृथक् पृथक् ।
विषमादि क्रमेणैव समे वै विपरीतकम् ॥
विज्ञाय प्रथमं पुंसां जाग्रत्स्वप्नसुषुप्तिकाः ।
विशेषतः परीक्षा स्याज्जागरः कार्यसाधकः ॥
स्वप्नावस्था मध्यफल उपदेष्टा गुरुर्यदि ।
निष्फला चरभावस्था ज्ञातव्या मुनिसत्तम ॥

Besides the ten अवस्थाः or conditions described in slokas 16-18 *supra* and the three ones mentioned in the present sloka, there are some more अवस्थाः which have been ascribed to the several planets due to their being placed in certain positions. An accurate knowledge of these appears to be very essential for making correct predictions. It has often been seen that, in the case of 2 or more persons born at one and the same time (say in the same Lagna, in the same day, month and year), the phalas or effects are not at all similar but quite different. This is mostly due to the entire change in their अवस्थाः in which the planets are situated in these horoscopes.

For instance, one ought to naturally expect सन्तानवृद्धि if a benefic planet occupies the 5th house and पुत्रनाश if a malefic one should occupy the same. But it is stated that benefic planets in the चेष्टा state in the शयन and निद्रा अवस्था occupying the 5th house do more harm than good for progeny, while malefics in the same position and in the same conditions are capable of helping the सन्तानवृद्धि of the native. As the several अवस्थाः of the planets are thus seen to play a very important part in moulding the nature of their effects during any birth, a detailed description of the same here will not be considered out of place.

अद्भुतसागरे

ग्रहाणां षड्विधा भावाः शम्भुना गदितः पुरा ।
एतत्सर्वं प्रयत्नेन लिख्यते च मयाऽधुना ॥
लज्जितो गर्वितश्चैव क्षुधितस्तृषितस्तथा ।
मुदितः क्षोभितश्चैव ग्रहभावाः प्रकीर्तिताः ॥
पुत्रगेहगतः खेटो राहुकेतुयुतो भवेत् ।
रविमन्दकुजैर्युक्तो लज्जितो ग्रह एव च ॥
तुङ्गस्थानगतो वाऽपि त्रिकोणेऽपि भवेत्पुनः ।
गर्वितः सोऽपि गदितो मुनिभिः कृतनिश्चयैः ॥

शत्रुगेही शत्रुयुक्तो रिपुदृष्टो भवेद्यदि ।
क्षुधितः स च विज्ञेयः शनियुक्तो यथा तथा ॥

जलराशौ स्थितः खेटः शत्रुणा चावलोकितः ।
शुभग्रहा न पश्यन्ति तृषितः स उदाहृतः ॥

मित्रगेही मित्रयुक्तो मित्रेण चावलोकितः ।
गुरुणा सहितो यश्च मुदितः स प्रकीर्तितः ॥

रविणा सहितो यश्च पापाः पश्यन्ति सर्वथा ।
क्षोभितं तं विजानीयच्छत्रुणा यदि वीक्षितः ॥

येषु येषु च भावेषु ग्रहास्तिष्ठन्ति सर्वथा ।
क्षुधितः क्षोभितो वाऽपि स नरो दुःखभाजनः ॥
एवं क्रमेण बोद्धव्यं सर्वभावेषु पण्डितैः ।

बलाबलविचारेण वक्तव्यः फलनिर्णयः ॥
अन्योन्यं च मुदा युक्तं फलं मिश्रं वदेत्पुनः ।
बलहीने तदा हानिः सबले च महाफलम् ॥
कर्मस्थाने स्थितो यस्य लज्जितस्तृषितस्तथा ।
क्षुधितः क्षोभितो वाऽपि स नरो दुःखभाजनः ॥
सुतस्थाने भवेद्यस्य लज्जितो ग्रह एव च ।
सुतनाशो भवेत्तस्य एकस्तिष्ठति सर्वदा ॥
क्षोभितस्तृषितश्चैव सप्तमे यस्य वा भवेत् ।
म्रियते तस्य नारी च सत्यमाह दिगम्बरः ॥

Six varieties have formerly been declared, by Sambhu regarding the conditions of planets, viz., (1) लज्जित ashamed or abashed), (2) गर्वित (haughty or conceited), (3) क्षुधित (hungry), (4) तृषित (thirsty or greedy), (5) मुदित (pleased or delighted) and (6) क्षोभित (agitated or excited).

(i) A planet is said to be in a लज्जित condition when it occupies the 5th house in conjunction with Rahu, Ketu, the Sun, Saturn or Mars.

(ii) It is said to be गर्वित when it is in its exaltation position or in its Mulatrikona.

(iii) It is in a क्षुधित state when it occupies an inimical house or is in conjunction with Saturn or an inimical planet or aspected by an inimical planet.

(iv) If the planet being in a watery sign be at the same time aspected by an inimical planet and unaspected by benefic ones, it is said to be in a तृषित state.

(v) But if it occupies a friend's house and be in conjunction with a friendly planet or Jupiter or be aspected by another friendly planet, it is in a मुदित condition.

(vi) Lastly, its condition will be क्षोभित when it is eclipsed by the Sun and has on it the aspect of malefics or that of an inimical planet.

अन्ये द्वादश भावाश्च प्रोक्तव्यास्ते प्रयत्नतः ।
ग्रहाणां च बलं बुद्ध्वा फलं वक्ष्ये यथाक्रमम् ॥

शयनं चोपवेशं च नेत्रपाणि प्रकाशनम् ।
गमनेच्छा च गमनं सभायां वसतिस्तथा ॥
आगमो भोजनं चैव नृत्यलिप्सा च कौतुकम् ।
निद्रा ग्रहाणां चेष्टा च कथिताः पूर्वसूरिभिः ॥

यस्मिनृक्षे भवेत् खेटस्तेन तं परिपूरयेत् ।
पुनरंशेन संपूर्य स्वनक्षत्रं नियोजयेत् ॥

यातदण्डं तथा लग्नमेकीकृत्य सदा बुधः ।
रविणा हरते भागं शेषं कार्यें नियोजयेत् ॥

नाक्षत्रिकदशाक्रमेण पुनः पूरणमाचरेत् ।
नामाक्षरेण संयुक्तं हर्त्तव्यं रविणा ततः ॥

रवौ पञ्च तथा देयं चन्द्रे दद्याद्द्वयं तथा ।
कुजे द्वयं च संयुक्तं बुधे त्रीणि नियोजयेत् ॥

गुरौ बाणाः प्रदेयाश्च त्रयं दद्याच्च भार्गवे ।
शनौ त्रयमथो देयं राहौ दद्याच्चतुष्टयम् ॥

शेषं हृतं च रामेण ग्रहाणां त्रिविधं भवेत् ।
दृष्टिश्चेष्टा विचेष्टा च कथिता मुनिपुङ्गवैः ॥

दृष्टौ स्वल्पफलं ज्ञेयं चेष्टायां विपुलं फलम् ।
विचेष्टायां फलं न स्यादेवं दृष्टिफलं विदुः ॥

शुभाशुभं ग्रहाणां च समीक्ष्याथ बलाबलम् ।
तुङ्गस्थाने विशेषेण बलं ज्ञेयं तथा बुधैः ॥

There are twelve other conditions of planets which have also to be specially noticed. They in their order are (1) **शयन** (lying down,) (2) **उपवेश** (sitting), (3) **नेत्रपाणि** (with the hand on the eye), (4) **प्रकाशन** (making bright or irradiating) (5) **गमनेच्छा** (desire to go), (6) **गमन** (going), (7) **सभायांवसति** (dwelling or being in an assembly), (8) **आगम** (coming) (9)**भोजन** (eating), 10) **नृत्यलिप्सा** (desire to dance), (11) **कौतुक** (delight, joy, pleasure) and (12) **निद्रा** (sleep).

To find the particular **अवस्था** of any planet, the following is the method to be adopted:—

Find the product of the following three numbers:—

(1) The number representing the order of the planet (counted from the Sun) whose अवस्था has to be found. (2) the number representing the order of the Nakshatra (counted from Aswini) in which the planet is situated; and (3) the number representing the actual degree in which the planet is at the time under consideration. To this product must be added (1) the number indicating the order of the person's जन्मनक्षत्र (2) the number representing the order of the जननलग्न (counted from मेष) and (3) the number representing the ghatikas that have elapsed since Sunrise till the time of birth. Divide the result by 12. The remainder will indicate the order of the अवस्था (counted from शयन) of the planet.

Again, multiply the remainder above obtained by itself. To this add the number given in the marginally noted table under the initial letter of the name of the person concerned. Divide the result by 12. To the remainder add the Kshepa (क्षेप), which is also appended in the margin, belonging to the planet, and divide this by 3. The remainder will indicate in which of the three (दृष्टि, चेष्टा or विचेष्टा) conditions in the अवस्था already found, the planet actually is at the time.

अ	इ	उ	ए	ओ
क	ख	ग	घ	च
छ	ज	झ	ट	ठ
ड	ढ	त	थ	द
ध	न	प	फ	ब
भ	म	य	र	ल
व	श	ष	स	ह
1	2	3	4	5

Sun's	Kshepa is	5
Moon's	,,	2
Mar's	,,	2
Mercury's	,,	3
Jupiter's	,,	5
Venus's	,,	3
Saturn's	,,	3
Rahu	,,	4
Ketu	,,	4

Take for example the case of the horoscope given in the notes to श्रीपतिपद्धति. Suppose it is required to find the particular अवस्था of Jupiter. The birth is stated to be at half a ghatika before Sunrise or in the 60th ghatika from the previous Sunrise. The position of Jupiter is 8 signs, 1 degree, 25 minutes, 1 second. Jupiter is in the star **मूला**, and in the 2nd degree of **धनुस्**. Jupiter is the 5th when counted from the Sun. **मूला** is the 19th from **अश्विनी**.

Therefore multiplying 5 × 19 × 2 = 190.

To this must be added the number represented by the **जननलग्न** (which is **मेष** in this horoscope), the number representing the **जन्मनक्षत्र** (which is **श्रवण** or 22nd from **अश्विनी**) and the number representing the ghatikas that have elapsed since last Sunrise (which is 60 in the present case)

The result is 190 + 1 + 22 + 60 or 273. Dividing this by 12, we have 9 as the remainder which means that Jupiter's **अवस्था** at the time is **भोजन**.

Again squaring 9, we get 81. The name of the native begins with the letter **व** and the number given for that letter is 1. So we have 81 + 1 or 82. Dividing this by 12, there is a remainder 10. To this must be added the **क्षेप** of Jupiter, viz. 5. Total is therefore 15. When this is divided by 3, there is a remainder 3 which means that Jupiter is in **विचेष्टा** in the **भोजनावस्था**.

The following table shows the particular **अवस्था** and the sub-state or condition therein in which the several planets are placed in the horoscope under reference.

Planets.	Actual position in the Ecliptic.				Name of the	The Sub-state
	S.	D.	M.	S.	अवस्था	or condition
Sun	0	17	43	30	कौतुक	दृष्टि
Moon	9	14	29	39	कौतुक	दृष्टि
Mars	11	27	53	9	कौतुक	दृष्टि
Mercury	11	24	13	44	कौतुक	चेष्टा
Jupiter	8	1	25	1	भोजन	विचेष्टा
Venus	0	14	2	51	कौतुक	चेष्टा
Saturn	0	27	55	46	कौतुक	चेष्टा

H 1288

निद्रायां च यदा पापो जायास्थाने शुभं वदेत् ।
यदि पापग्रहैर्दृष्टो न शुभं च कदाचन ॥
यदि वा शत्रुगेही स्याद्रिपुणा यदि वीक्षितः ।
तदा नारी मृता तस्य सकलासु विनिश्चितम् ॥
शुभग्रहैर्यदा दृष्टः शुभग्रहसमन्वितः ।
नारी च म्रियते तस्य प्रथमा च विशेषतः ॥
सुतस्थाने स्थितः पापो निद्रायां शयनेऽपि वा ।
तदा शुभं भवेत्तस्य नात्र कार्या विचारणा ॥
तुङ्गस्थाने स्वगेहे वा त्रिकोणे वा यदा भवेत् ।
अपत्यस्य तदा नाशो जायते नात्र संशयः ॥
शुभग्रहो यदा तत्र शुभैर्वा यदि वीक्षितः ।
तदाऽपि प्रथमापत्यनाशो भवति निश्चितम् ॥
मृत्युस्थानस्थितः पापो निद्रायां शयनेऽपि वा ।
तदा तस्यापमृत्युः स्याद्राजतः परतस्तथा ॥
शुभग्रहैर्यदायुक्तः शुभैर्वा यदि वीक्षितः ।
तदा च मरणं तस्य गङ्गायां च विशेषतः ॥
पापग्रहैर्यदा दृष्टः शुभैर्वा यदि वीक्षितः ।
तदा तस्य शिरश्छेदो मुनिना परिकीर्त्तितः ॥
अष्टमस्थौ शनिकुजौ तमो वा तत्र संस्थितः ।
अपमृत्युर्भवेत्तस्य शिरश्छेदान्न संशयः ॥
कर्मस्थाने यदा पापः शयने भोजनेऽपि वा ।
तदा दारिद्र्यदोषेण कृत्स्नां भ्रमति मेदिनीम् ॥
कर्मस्थाने शुभः खेटो निद्रायां गमनेऽपि वा ।
तदा कर्मविपाकः स्यान्नानादुःखप्रदायकः ॥
दशमस्थो निशानाथो कौतुके च प्रकाशने ।
तदैव राजयोगः स्यान्मुनिभिः परिकीर्त्तितः ॥
एवं क्रमेण बोद्धव्यं सर्वभावेषु बुद्धिमान् ।
बलाबलविचारेण ज्ञायते च शुभाशुभम् ॥
ज्योतिर्विद्भिः पुरा सर्वैर्ज्ञायते तत्वनिर्णयः ।
इदानीं सूक्ष्मरूपेण शयनादि निगद्यते ॥
शयनाद्येकभावेषु यस्य तिष्ठन्ति सद्ग्रहाः ।
नित्यं तस्य शुभज्ञानं मुनिभिः परिकीर्तितम् ॥

भोजनाद्येकभावेषु पापास्तिष्ठन्ति सर्वथा ।
तदा सर्वविनाशोऽपि नात्रकार्या विचारणा ॥
मन्दाग्निः पित्तशूली च श्लीपदी च न संशयः ।
गुह्यस्थाने भवेद्रोगी जायते शयने रवौ ॥
उपवेशे भवेच्छिल्पी श्यामवर्णो भवेन्नरः ।
स विद्यारहितो दुःखी परसेवासु तत्परः ॥
पञ्चमे नवमे वाऽपि दशमे सप्तमेऽपि वा ।
नेत्रपाणौ यदा सूर्यः सर्वसौख्यसमन्वितः ॥
नेत्रपाणौ भवेत् क्रूरो जलदोषी भवेन्नरः ।
चक्षुरोगी महाक्रोधी परद्वेषी तथा पुनः ॥
पुण्यवान् धार्मिकश्चैव धनवांश्च प्रकाशने ।
दाता भोक्ता भवेन्मानी राजपुत्रो धनाधिपः ॥
सप्तमे पञ्चमे वाऽपि प्रकाशे च यदा रविः ।
नाशयेत्प्रथमापत्यं कलत्रं च विशेषतः ।
प्रवासी गमने भानौ पादमूले रूजान्वितः ॥
निद्रालस्यभयक्रोधी जायते च नराधमः ।
क्रूरः कुबुद्धिः कुशलो दाम्भिकः कृपणस्तथा ॥
परदारेष्वमिरुचिर्जायते गमनोन्मुखे ।
सप्तमे द्वादशे वाऽपि यदि दैवाद्भवेत्कचित् ॥
अपत्यं नाशयेत्तस्य धनमल्पं विनिश्चितम् ।
नवमस्थो यदा सूर्यो भोजनस्थो यदा भवेत् ।
तदा पुण्ये महाविघ्नं करोति च न संशयः ॥
धार्मिको धनवांश्चैव नानाविद्यासु तत्परः ।
प्रियदृष्टिः शुचिर्वक्ता सभायां तपने जनैः ॥
क्षोभितो दुःखितश्चैव नानादुःखप्रदायकः ।
भवेन्मूर्खश्च गमने कुरूपो धनवान् भवेत् ॥
भोजने नित्यदुःखी स्यान्मांसलुब्धो भवेन्नरः ।
शिरोरोगी कर्णरोगी सन्धौ भवति वेदना ॥
पण्डितः सुन्दरो वाग्मी नृत्योत्साहे ग्रहाधिपे ।
शूलरोगी भवेन्नित्यं धनवान्धार्मिकः सदा ॥
षष्ठस्थाने भवेद्वाऽपि कौतुकस्थो यदा रविः ।
सर्वशत्रुविनाशः स्याज्ञाडचं च लभते पुनः ॥

उत्साही च महापुत्रो कौतुकस्थे रवौ जनः ।
दाता भोक्ता महाभोगी द्विभार्यो बहुभाषकः ॥
क्षतादिर्वाऽपि देहः स्याद्दद्रुरोगी भवेच्च सः ।
महादक्षो महाक्रोधी जायते च नरोत्तमः ॥
सप्तमे पञ्चमे वाऽपि यदि दैवाद्भवेत्पुनः ।
कलत्रं नाशयेत्तस्य पूर्वापत्यं च निश्चितम् ॥
लिङ्गान्तर्गुदरोगी स्यात् श्लीपदी च विशेषतः ।
निद्रायां च भवेद्भानौ क्रोधेनारक्तनेत्रकः ॥
नित्यं प्रवासी दुःखी च दरिद्रो विकलो महान् ।
प्रथमापत्यनाशः स्यात्कलत्राणां विशेषतः ॥

इत्यर्कभावफलम्.

तुङ्गातुङ्गबलाबलैर्ज्ञातव्यं यत्नतो यतः ।
शयने च विधौ क्रोधी दरिद्री चैव लम्पटः ॥
गुह्यस्थाने भवेत्किञ्चित् देहमांद्यं सुनिश्चितम् ।
एतत्सर्वं विलग्ने च चिन्तनीयं सदा बुधैः ॥
अन्यभावे यदा जातो न तादृग्दोष एव च ।
कृष्णपक्षे भवेद्वाऽपि कृपणो दाम्भिकः सदा ॥
भक्षकश्च महाशूरो लम्पटः परनिन्दकः ।
दक्षिणाङ्गे क्षतादींश्च वन्हौ भवति संशयम् ॥
सर्पभीतिस्तथा ज्ञेया जले चैव महद्भयम् ।
भोजने च विधौ जाते ज्ञातिभिः परिपूरितः ॥
दाता भोक्ता तथा मानी धनवांश्च भवेन्नरः ।
क्रूरकर्मा चिरं रोगी श्लीपदश्च महाकृशः ॥
नित्यं प्रवासी भोगी च जायते च न संशयः ।
जातोऽसौ नृत्यचेष्टायां गुणवान्धार्मिको भवेत् ॥
धनवान् बहुपुत्रश्च दाता च जायते नर ः।
कौतुके च भवेद्भूपो नानाविद्यासु तत्परः ॥
उत्साही च महामानी जायते च सुनिश्चितम् ।
नवमे दशमे वाऽपि कौतुकस्थो निशाकरः ॥
तदा सर्वसुखं विद्याद्दरिद्रं न कदाचन ।
निद्रायां दद्रुरोगी स्यात्क्लेशी पापी रुजान्वितः ॥

पुत्रशोकी महादुःखी नित्यं भ्रमति मेदिनीम् ।
कर्मस्थाने विशेषेण चैवं ज्ञेयं सदा बुधैः ॥
अन्यभावे तु निद्रायां वैपरीत्यं वदेत्पुनः ।
परद्वेषी प्रवासी च पित्तशूली भवेन्नरः ॥
उपवेशे च रोगी च धनहीनो भवेन्नरः ।
कृपणः कुटिलश्चैव दंष्ट्राघाती भवेन्नरः ॥
नेत्रपाणावक्षिरोगो श्लीपदी बहुभाषकः ।
क्रूरः खलोऽतिशूरश्च जायते च विधौ सदा ॥
प्रकाशने निशानाथे धनवांश्च भवेन्नरः ।
प्रकाण्डदेहः कृपणस्तीर्थे च गमनोन्मुखः ॥
शुक्लपक्षे एवम् ॥ कृष्णपक्षे भिन्नम् ।
प्रवासी वित्तहीनश्च क्रूरकर्मा विशेषतः ॥
शिरोरोगी स्तब्धशूली जायते गमने विधौ ।
नानामतिर्महा मायी श्लीपदी च भवेत्पुनः ॥
यानेच्छयां विधौ जाते धनहीनो भवेन्नरः ।
दाता च धार्मिकश्चैव राजपुत्रो भवेत्सदा ॥
सभायां च विधोर्नित्यं जायते पुरुषोत्तमः ।
बहुभाषी प्रियः शान्तो द्विभार्यो धार्मिकः सदा ॥
किञ्चिद्भवेद्देहमांद्यं स्त्र्यपत्यं बहुलं भवेत् ।
स राजा च भवेन्नारी एकपुत्री भवेद्यशः ॥
नित्यं क्रोधी महादुःखी भवेदागमने विधौ ।
भोजने च महालुब्धो सुतस्थाने विशेषतः ॥
जायास्थानेऽपि नियतं तत्फलं परिचिन्तयेत् ।
यदि निद्राभवेत्तत्र सर्वं भद्रं भवेत्पुनः ॥
राहुणा सहितश्चन्द्रो यदि निद्रां गतो भवेत् ।
तदा सर्वविनाशः स्याद्दोषाश्चैव सहस्रशः ॥

इति चन्द्रभावफलम्.

शयने च कुजे जातो लम्पटः कृपणः सुधीः ।
महाक्रोधी महादक्षः पण्डितो जायते नरः ॥
पञ्चमे सप्तमे वाऽपि शयनस्थो यदा कुजः ।
नाशयेत्प्रथमापत्यं नारीं च प्रथमां पुनः ॥

पुत्रगेही यदा भौमो रिपुणा चावलोकितः ।
भुजच्छेदो भवेत्तस्य कर्मादिश्च विशेषतः ॥
शनिराहुसमायुक्तः स च भौमो यदा भवेत् ।
तदा तस्य शिरच्छेदो मुनिभिः परिकीर्त्तितः ॥
शयने च यदा लग्ने नानारोगसमन्वितः ।
देहभङ्गमवाप्नोति दद्रुकुष्ठविचर्चिकैः ॥

उपवेशे यदा भौमो जायते च नराधमः ।
धनवान् क्रूरकर्मा च निष्ठुरो ज्ञानवर्जितः ॥
पापशीलो महारोगी दरिद्रो विकलो महान् ।
यदि लग्ने विशेषेण वक्तव्यं च सुनिश्चितम् ॥
धर्मस्थाने भवेच्चैवं कर्मस्थाने विशेषतः ।
तदा सर्वविनाशः स्यात्तथा पुत्रकलत्रयोः ॥
शुभैर्यदि समायुक्तो मित्रयुक्तो भवेन्नरः ।
तदेतद्विपरीतं च ज्ञातव्यं च बलाबले ॥
नेत्रपाणौ च यो जातो चक्षुर्हीनो भवेच्च सः ।
पुत्रदारधनैस्त्यक्तो दरिद्रेणैव दह्यते ॥

एतल्लग्ने विचार्यम् ॥

अन्यस्थाने स्थितो भौमो नेत्रपाणौ यदा भवेत् ।
तदा सर्वसुखं तस्य पुत्रदारधनैर्युतः ॥
देहमान्द्यं भवेत्किञ्चित् सन्धौ भवति वेदना ।
व्याघ्रभीतिः सर्पभीतिश्चाग्नेर्भीतिर्जलाद्भयम् ॥
द्वितीये सप्तमे वाऽपि धनहीनो भवेन्नरः ।
जाया च म्रियते तस्य भूमिजीवी भवेत्सदा ॥
प्रकाशने कुजे जातो धनवान् क्षणिकः सुधीः ।
क्षतादिर्वामनेत्रे च उच्चाच्च पतनं भवेत् ॥
सुतस्थाने कलत्रे वा यदि दैवाद्भवेत्पुनः ।
तदा सर्वान् सुतान् हन्ति नारीं चैव न संशयः ॥
यत्र तत्र स्थितो भौमः पापयुक्तो भवेद्यदि ।
पतितं तं विजानीयाच्छनियुक्तश्च गोवधः ॥
गमने च यदा जातः प्रवासी नित्यदुःखितः ।
शरीरे च भवेद्रोगो दद्रुकुष्ठविचर्चिकाः ॥

पित्तशूलं महातेजा सन्धौ भवति वेदना ।
क्षिप्रकर्मा महाधैर्यः स्त्रीवेषो बहुभाषकः ॥
चक्षुर्ज्वाला शिरोरोगी दन्तशूली भवेन्नरः ।
त्वग्दोषश्च भवेत्किञ्चित् दंष्ट्रिणो भयमद्भुतम् ॥
एतल्लग्ने भवेच्चैवमन्यभावेषु नैव च ।
नानाधनो महादक्षो राजपात्रो भवेन्नरः ॥
किन्त्वस्य देहमान्द्यं च शरीरे नित्यमेव च ।
दाता भोगी भवेच्चैव जायते च नरेश्वरः ॥
प्रवासी गमनेच्छायां गुदरोगी भवेच्च सः ।
धनहीनः कुकर्मा च जायतेऽक्षियुतस्य तु ॥

एतल्लग्नपरता ॥

सभायां च यदा यातो धार्मिको बहुसम्पदः ।
गुणवांश्च महादाता शिरोरोगी भवेच्च सः ॥
नवमे पञ्चमे चैव सभायां च यदा कुजः ।
विद्याहीनः कर्महीनो धर्मविघ्नः पदे पदे ॥
सुतस्थाने यदा भौमो भोजने शयनेऽपि वा ।
तदा तस्यापमृत्युः स्यात्पशुभिर्हन्यते ततः ॥
कुजस्य नृत्यलिप्सायां द्वादशे च भवेत्पुनः ।
तदा सर्वसुतान्हन्ति कथितं मुनिपुङ्गवैः ॥
कुजस्य गमने नित्यं खञ्जो भवति नान्यथा ।
कर्णरोगी पित्तशूली जायते च नराधमः ॥
धनवान्धार्मिकश्चैव यदि स्याद्गमने पुनः ।
नानाधनी महामानी द्विभार्यो बहुपुत्रकः ॥
भोजने भूमिजस्यापि यो जातो मांसलुब्धकः ।
स्वल्पाहारो महाक्रोधी नित्योत्साही धनान्वितः ॥
अष्टमस्थो यदा भौमो भोजने शयनेऽपि वा ।
तदा तस्यापमृत्युः स्यात्पशुभिर्हन्यते ततः ॥
कुजस्य नृत्यलिप्सायां यो जातो धनवान्भवेत् ।
दाता भोक्ता सदा सौख्यं धनेशश्च भवेन्नरः ॥
लग्ने द्वितीयगे वाऽपि कर्मस्थाने स्थितोऽपि वा ।
सप्तमेऽपि यदा भौमः सर्वसौख्यप्रदायकः ॥
अष्टमो नवमस्थो वा नानादुःखप्रदायकः ।

अपमृत्युर्भवेच्चैव धर्महानिः पदे पदे ॥
कौतुके क्षितिजस्यापि जातो भवति पण्डितः ।
नानाधनैः सुसंयुक्तो द्विभार्यो बहुकन्यकः ॥
विहाय पञ्चमस्थानं सप्तमं नवमं तथा ।
तत्रैतद्विपरीतं च वक्तव्यं च सुनिश्चितम् ॥
विशेषतश्च वैकल्यं नानारोगसमन्वितः ।
प्रथमापत्यनाशः स्यात्कलत्रस्य तथैव च ॥
निद्रायां च कुजे जातो मूर्खो भवति पण्डितः ।
धनहीनो महाक्रोधी जायते च नराधमः ॥
लग्ने द्वितीयगे चैव तृतीये नवमेऽपि वा ।
दशमैकादशे वाऽपि एतद्वाच्यं सदा बुधैः ॥
पञ्चमे सप्तमे वाऽपि यस्य निद्रापितः कुजः ।
तस्यापत्यस्य बाहुल्यं नानादुःखसमन्वितम् ॥
राहुणा सहितो भौमो यदि निद्रान्वितो भवेत् ।
नाशयेत्प्रथमापत्यं नानादुःखप्रदायकः ॥
धनवान् कलत्रबहुलो दाता सर्वगुणान्वितः ।
किञ्चिद्रोगो भवेत्तस्य पादमूले रुजान्वितः ॥

इति भौमभावफलम्.

शयने च बुधे जातो बलवान् क्षुधितस्तथा ।
अङ्गच्छेदो भवेद्वाऽपि षण्ढो भवति नान्यथा ॥
यदि लग्ने भवेद्वाऽपि एतद्वाच्यं तदा बुधैः ।
अन्यस्थाने स्थितश्चैव दरिद्रो बहुलम्पटः ॥
उपवेशे च यो जातो स वाग्मी जायते ध्रुवम् ।
कवितागुणसंयुक्तो गौरवर्णो महाशुचिः ॥
यदि पापसमायुक्तः शत्रुणा यदि वीक्षितः ।
महापातकयोगोऽयं विष्णुना परिकीर्त्तितः ॥
स्वगृहो मित्रयुक्तो वा नानासुखप्रदायकः ।
पुण्यवान्धार्मिकश्चैव चक्षुरोगश्च केवलम् ॥
नेत्रपाणौ तथा जातः श्लीपदी च तथार्शकः ।
विद्याहीनो विशेषेण पुत्रनाशो भवेद्ध्रुवम् ॥
पञ्चमस्थो यदा सौम्यो नेत्रपाणौ भवेद्यदि ।

नाशयेत्प्रथमं पुत्रं कन्या च बहुला भवेत् ॥
प्रकाशने भवेद्दाता धार्मिकोऽपि धनान्वितः ।
नानागुणसमायुक्तो जायते वेदपारगः ॥
गमने च बुधे जातो जलदोषी भवेन्नरः ।
वाणिज्ये धनलाभश्च सर्पाद्भीतिर्जलाद्भयम् ॥
नानादुःखं भवेत्तस्य स्त्रीनाशो बन्धुनाशकः ।
मूर्खोऽथ विकलश्चैव सर्वगुणविवर्जितः ॥
गमनेच्छायां च यो जातो लम्पटो दक्ष एव च ।
स्त्रीवशो दुष्टभार्यश्च कामुको बहुभाषकः ॥
नानादुःखं भवेत्तस्य सर्वरोगसमन्वितः ।
दन्तघाती भवेच्चैव कलहो नित्यमेवच ॥
सभायामपि यो जातो मूर्खो भवति निश्चितम् ।
धनवान्धार्मिकश्चैव चिररोगी भवेच्च सः ॥
पञ्चमे द्वादशे वाऽपि सभायां च सुधांशुजः ।
स्त्र्यपत्यं वहुलं दत्ते कार्याणां च विशेषतः ॥
सप्तमे च यदा सौम्यः सभायां च यदा स्थितः ।
तदा सर्वसुखं तस्य कृष्णवर्णो दुरासदः ॥
क्रूरः खलोऽतिमूर्खश्च पापशीलो भवेन्नरः ।
बुधस्य गमने नित्यं जायते च नराधमः ॥
पुत्रद्वयं धन किञ्चिन्नानामतिश्च जायते ।
गुह्यस्थाने भवेद्रोगं मूत्रकृच्छ्रं सुदारुणम् ॥
भोजने च बुधे जातो धनहीनो भवेन्नरः ।
परद्वेषी प्रवासी च शेषे सर्वरुजान्वितः ॥
क्षतादिर्वामदेहे च व्रणदद्रुविचर्चिका ।
कंकालवेदना चैव शिरोरोगी विशेषतः ॥
यो जातो नृत्यलिप्सायां धनवान् पण्डितः कविः ।
उत्साही च महाहृष्टो भुनक्ति सुखमद्भुतम् ॥
पञ्चपुत्रो भवेत्सोऽपि चतस्रोऽस्य च कन्यकाः ।
भार्याद्वयं तथा ज्ञेयं सर्वगुणसमन्वितम् ॥
कौतुके च यदा जातो भवेत्सर्वजनप्रियः ।
अर्शरोगी दद्रुयुक्तस्त्वग्दोषी च न संशयः ॥
पञ्चमे दशमे वाऽपि कौतुके च सुधांशुजः ।

प्रथमापत्यहानिः स्यात्स्त्र्यपत्यं बहुलं भवेत् ॥
कर्मस्थाने भवेद्वाऽपि धर्मस्थाने तथैव च ।
नानासुखं भवेत्तस्य सर्वकर्मसमन्वितः ॥
निद्रायां च यदा जातः सर्वदुःखैकभाजकः ।
अल्पायुश्च भवेत्सोऽपि विवादी च न संशयः ॥
तनुस्थाने भवेद्वाऽपि कर्मस्थाने तथैव च ।
पूर्वोक्तं च फलं तस्य तदेव स्यात्सदारुणम् ॥
अन्यस्थाने भवेद्वाऽपि विपरीतं फलं वदेत् ।
धनधान्ययुतं चैव वक्तव्यं च सुनिश्चितम् ॥

इति बुधभावफलम्.

बलवान् दुःखितो गौरः शूलरोगी रुजान्वितः ।
जीवस्य शयने जातो मानवो नात्र संशयः ॥
यदि लग्ने भवेच्चैव सप्तमे दशमे तथा ।
नवमे पञ्चमे चैव धनवान् पण्डितः शुचिः ॥
उपवेशे गुरौ दुःखी बहुभाषी च रोगवान् ।
दन्ताघाती महादुःखी श्लीपदी रोगसंयुतः ॥
द्वितीये द्वादशे वाऽपि तृतीयैकादशे तथा ।
सर्वैर्गुणैः समायुक्तो नानाविद्यासु तत्परः ॥
नेत्रपाणौ तथा गौरः शीर्षरोगी धनी भवेत् ।
कार्यहानिर्भवेत्तस्य संशयस्तु पदे पदे ॥
क्षतादिश्चरणे नित्यं लग्ने चैव न संशयः ।
नवषष्ठाष्टमे वाऽपि नेत्रपाणौ गुरुर्भवेत् ॥
शत्रुक्षयं भवेत्तस्य गङ्गायां मरणं ध्रुवम् ।
गुरौ प्रकाशे धनवान् नानारत्नसमायुतः ॥
राजपात्रो भवेन्नित्यं लग्ने वा दशमेऽपि वा ।
यद्यन्यत्र भवेज्जीवो लिङ्गे गुह्ये रुजान्वितः ॥
मूर्खस्तु लम्पटः पापी श्यामवर्णो रुजान्वितः ।
सेवाकर्मरतः शूली प्रवासी धनवानपि ॥
गुरोश्चागमनेच्छायां जातो भवति मानवः ।
द्वितीये पञ्चमे चैव सप्तमे दशमे तथा ॥
अन्यस्थाने भवेद्वाऽपि वैपरित्ये न चिन्तनम् ।

सर्वभीतिश्चोग्रकर्मा साहसी गमने गुरौ ॥
परवित्तेन धनवान् राजसेवान्वितो नरः ।
पण्डितः सुन्दरो वाग्मी सभायां गीष्पतौ स्थिते ॥
केन्द्रे चैव यदा जीवः सभायां च भवेत्पुनः ।
तदा सर्वसुखं ज्ञेयं पुत्रदारधनैर्युतः ॥
यदि दैवाद्भवेद्वाऽपि द्वादशे चाष्टमे तथा ।
तदा सर्वविनाशः स्यात् स नरो दुःखभाजनः ॥
धार्मिकस्तीर्थवान्मानी भवेदागमने गुरौ ।
नानातीर्थकरो नित्यमुत्साही नित्यगर्वितः ॥
भोजने विविधं सौख्यं मांसलुब्धो महारुचिः ।
कामुकः प्रियवादी च यदि लग्ने भवेत्पुनः ॥
पञ्चमे नवमे चैव पुत्रधर्मसमन्वितः ।
गृहान्तरे भवेद्वाऽपि सर्वरोगसमाकुलः ॥
नृत्येच्छयां भवेद्वाग्मी धनवान् सात्विकस्तथा ।
महैश्वर्येण संयुक्तो जीवस्य तु भवेन्नरः ॥
लग्ने वा नवमे वाऽपि दशमे पञ्चमे तथा ।
एतत्सर्वं भवत्येव नान्यगेहे कदाचन ॥
कौतुके च गुरौ जाते धनवान्धार्मिकः सदा ।
नित्योत्साही महाहृष्टो भुनक्ति सुखमद्भुतम् ॥
कर्मस्थाने भवेद्यस्य लग्ने वा सप्तमे पुनः ।
तदा सर्वं भवत्येव विपरीतमतोऽन्यथा ॥
निद्राभावेषु यो जातश्चक्षुरोगी भवेच्च सः ।
कृपणो बहुभाषी च दुःखितो भ्रमते महीम् ॥
पञ्चमे सप्तमे वाऽपि कर्मस्थाने तथाऽपि वा ।
स्त्रीनाशः पुत्रनाशश्च द्वादशे धनवान् भवेत् ॥

इति गुरुभावफलम्.

शुक्रस्य शयने जातो धनवान् बहुलम्पटः ।
दन्तरोगी महाक्रोधी दीनो भवति लग्नगे ॥
सप्तमैकादशे वाऽपि शयने च भृगोर्भवेत् ।
तदा सर्वसुखं ज्ञेयं दारिद्र्यं न कदाचन ॥
अपत्यं बहुलं चैव सप्तपुत्राः सुनिश्चितम् ।

पञ्चकन्यास्तथा ज्ञेया ग्रहस्यास्य बलाबले ॥
अन्यगेहेषु धनवान् विद्यावान् धार्मिकः सदा ।
नानासुखं भवेत्तस्य पुत्रनाशो भवेद्ध्रुवम् ॥
उपवेशे भृगोर्जातो बलवान् धार्मिकः सदा ।
दक्षिणाङ्गे क्षतादिश्च सन्धौ भवति वेदना ॥
तुङ्गस्थाने स्थितो वाऽपि स्वगृहो मित्रसंयुतः ।
तदा सर्वं सुखं प्रोक्तं पुत्रदारधनप्रदः ॥
नेत्रपाणौ भृगोर्जातश्चक्षुर्नाशो भवेद्ध्रुवम् ।
लग्ने वा सप्तमे वाऽपि तदा भवति निश्चितम् ॥
कर्मस्थाने यदा शुक्रो नेत्रपाणौ भवेद्यदि ।
तदा दरिद्रदोषेण समुद्रानपि शोषयेत् ॥
अन्यस्थानेषु सर्वेषु द्विभार्यो बहुसम्पदः ।
नानातीर्थपरो मानी साहसी राजसेवकः ॥
प्रकाशने भृगोर्जातो धनवान् धार्मिकः शुचिः ।
लग्ने वाऽथ द्वितीये वा नवमे वाऽथ सप्तमे ॥
मित्रगेहस्थितो वाऽपि तुङ्गस्थानगतोऽपि वा ।
तदा राज्यास्पदं भुङ्क्ते कर्मस्थाने विशेषतः ॥
अन्यगृहे यदा शुक्रः सर्वरोगसमन्वितः ।
नित्यं प्रवासी दुःखी च जायते नीचसंस्थिते ॥
गमनेच्छायां च यो जातो भ्रातृनाशो भवेद्ध्रुवम् ।
माता च म्रियते तस्य शैशवे व्याधिसंयुतः ॥
शुक्रस्य गमने जातः पादमूले रुजान्वितः ।
नित्योत्साही महाशिल्पी तीर्थेषु तत्परो भवेत् ॥
सभायां च भृगोर्जातो राजपात्रो धनाधिपः ।
कुशलः सर्वकार्येषु केवलं शूलरोगवान् ॥
शत्रुगेहे यदा शुक्रः शत्रुयुक्तोऽथ वीक्षितः ।
तदा सर्वविनाशः स्यान्नानारोगसमन्वितः ॥
भृगोरागमने जातो दुःखितो बहुभाषकः ।
दद्रुरोगी पुत्रशोकी जायते च नराधमः ॥
रिपुगेहे रिपुयुतो रिपुणा वीक्ष्यते यदा ।
तदा सर्वविनाशः स्यात् स्त्रीपुत्रस्य विशेषतः ॥
द्वितीये दशमे वाऽपि चतुर्थे चाष्टमे तथा ।

सर्वं सुखं भवेत्तस्य नात्र कार्या विचारणा ॥
शुक्रस्य भोजने जातो बलवान्दाम्भिकः सदा ।
महाधनी भवेन्नित्यं वाणिज्येनाथ सेवया ॥
मन्दाग्निः पित्तशूली च शिरोरोगी रुजान्वितः ।
नानादुःखं भवेत्तस्य प्रवासी परसेवकः ॥
नृत्येच्छयां च यो जातः स वाग्मी जायते ध्रुवम् ।
पाण्डित्यं कविता चैव वर्द्धते च दिने दिने ॥
यदि दैवाद्भवेन्नीचो मूर्खो भवति निश्चितम् ।
तुङ्गस्थाने स्वगेहे वा राजपात्रो महाबली ॥
कामुको बहुकान्तश्च नानायोषित्प्रियः सदा ।
श्यामवर्णस्तथा मानी क्षणिको लम्पटः सदा ॥
शुक्रस्य कौतुके जातो धनवान् सात्विको महान् ।
महाहृष्टो महावक्ता कौतुकी च भवेत्सदा ॥
बहुपुत्रकलत्रश्च नानासुखसमन्वितः ।
नो चेत्तद्विपरीतं च दुःखशोकभयानकः ॥
निद्रायां च भृगोर्जातो भवेद्रोगी सुनिश्चितम् ।
नित्यं क्लेशयुतो रोगी दरिद्रो विकलो महान् ॥
मृत्युस्थाने तु जायायां यदि निद्रा भृगोरपि ।
तदा सर्वविनाशः स्याद्विष्णुना परिकीर्त्तितम् ॥

इति शुक्रभावफलम्.

शयने च शनेर्जातो क्षुधितो विकलस्तथा ।
गुह्यस्थाने भवेद्रोगी कोशबृद्धिश्च जायते ॥
लग्ने षष्ठाष्टमे चैव शयने च शनैश्चरः ।
तदा नित्यं प्रवासी स्याद्दरिद्रो विकलो महान् ॥
पञ्चमे नवमे चैव दशमे सप्तमे तथा ।
पुत्रवान्धार्मिकश्चैव सर्वसुखप्रदायकः ॥
उपवेशे यदा जातः श्लीपदी दद्रुसंयुतः ।
धनहानिर्नरेन्द्राच्च पीडा भवति नित्यशः ॥
लग्ने वा दशमे वाऽपि नेत्रपाणौ शनैश्चरः ।
कार्यबाधा भवेत्तस्य सर्वदुःखप्रदायकः ॥
सप्तमे पञ्चमे वाऽपि पुत्रदारधनक्षयः ।

अन्यगृहेषु धनवान् नानासुखप्रदायकः ॥
नेत्रपाणौ यदा जातो मूर्खो भवति पण्डितः ।
धनवान्धार्मिकश्चैव द्विभार्यो बहुसम्पदः ॥
पित्तशूली क्षणक्रोधी त्वग्निभीतिर्जले भयम् ।
शिरोरोगी गुदोरोगी सन्धौ भवति वेदना ॥
लग्नेऽथ दशमे चैतद्विपरीतं फलं वदेत् ।
प्रकाशने च यो जातो राजपात्रो भवेच्च सः ॥
नानागुणेन गुणवान्धार्मिकः पण्डितः शुचिः ।
जायास्थाने च लग्ने च प्रकाशे च यदा शनिः ॥
तदा सर्वविनाशः स्यज्ज्ञातिध्वंसो भवेद्ध्रुवम् ।
गमनेच्छायां च यो जातो बहुपुत्रो महाधनः ॥
पण्डितो गुणवान् दाता जायते च नरोत्तमः ।
गमने च शनेर्जातः श्लीपदी रोगसंयुतः ॥
दन्ताघाती भवेत्क्रोधी कृपणः परनिन्दकः ।
सुतस्थाने कलत्रे वा शनिस्तत्र भवेत्क्वचित् ॥
तदा सर्वसुतान्हन्ति कलत्रं च विशेषतः ।
गमने च शनौ जातः पादमूले रुजान्वितः ॥
तीर्थे च गमने नित्यं पुत्रदारैर्विवर्जितः ।
कर्मस्थाने कलत्रे च धर्मे च द्वादशे पुनः ॥
तदा सर्वसुखं प्रोक्तं पण्डितोऽपि धनेश्वरः ।
सभायां च शनौ जातः पुत्रदारधनैर्युतः ॥
सर्वत्र लभते विद्यां नानारत्नसमन्वितः ।
शत्रुस्थाने गतः शौरिः शत्रुणा यदि वीक्षितः ॥
तदा सर्वविनाशः स्याद्विष्णुना परिकीर्तितम् ।
गमने च शनेर्जातो महाक्रोधी रुजान्वितः ॥
सर्पादिभिश्च संदष्टो भ्रातृनाशो भवेद्ध्रुवम् ।

लग्ने एतच्चिन्तनीयम् ॥

द्वितीये वा तृतीये वा पञ्चमे सप्तमे तथा ।
वित्तपुत्रकलत्रैश्च भ्रातृभिः सह मोदते ॥
नवमस्थो यदा शौरिर्भवेदागमने पुनः ।
तदा पुण्ये भवेद्धानिर्विघ्नं स्याच्च पदे पदे ॥
भोजने च यदा जातो मन्दाग्निश्च महान् भवेत् ।

अर्शरोगी च शूली च चक्षूरोगी भवेच्च सः ॥
तुङ्गस्थाने स्वगेहे वा भोजने च यदा शनिः ।
तदा सर्वसुखं ज्ञेयं सर्वरोगविवर्जितम् ॥
नृत्येच्छायां च यो जातो धनवान्धार्मिको भवेत् ।
नानाविधं स्मृतं सौख्यं भवेत्तस्य न संशयः ॥
नानाधनैर्धनी मानी सर्वसुखप्रदायकः ।
कौतुके च यदा जातो राजपात्रो महाधनी ॥
दाता भोक्ता महादक्षो धार्मिकः पण्डितः शुचिः ।
पञ्चमस्थो यदा शौरिर्नृत्यलिप्सा भवेद्यदि ॥
नाशयेत्सकलान्पुत्रानिति प्राह दिगम्बरः ।
पञ्चमे सप्तमे वाऽपि नवमे दशमे तथा ॥
तदा सर्वविनाशः स्यात्सर्वरोगसमन्वितः ।
निद्रायां च शनिर्जातो धनवान्पण्डितः शुचिः ॥
चक्षूरोगी पित्तशूली द्विभार्यो बहुपुत्रकः ।
कर्मस्थाने यदा शौरिर्विशेषफलदायकः ॥
यदि दैवाद्भवेन्निद्रा नाशो भवति निश्चितम् ।
कार्यनाशो धर्मनाशः क्षुधितो दुःखितः सदा ॥
नित्यं प्रवासी रोगी च कार्यहानिः पदे पदे ।
यदि तुङ्गे त्रिकोणे स्यात्केन्द्रे स्यात्स्वगृहे पुनः ॥
तदा सर्व विचार्य च वैपरीत्येन निश्चितम् ।
सुतस्थाने च जायायां यदि निद्रा भवेत्पुनः ॥
तदा सर्वं शुभं विद्याद् द्विभार्यो बहुपुत्रकः ।

इति शनिभावफलम्.

शयने च यदा राहौ यस्य जन्म भवेत्पुनः ।
तस्य क्लेशो महादुःखं जायते च न संशयः ॥
शयने च यदा जातः श्लीपदी च न संशयः ।
धनहानिर्भवेत्तस्य पीडा भवति नित्यशः ॥
मिथुने च तथा सिंहे कन्यायां वृषभे तथा ।
सर्वसुखसमायुक्तः शयने च विधुन्तुदे ॥
उपवेशे च यो जातः श्लीपदी रोगसंयुतः ।
धनहानिर्भवेत्तस्य पीडा भवति नित्यशः ॥
नेत्रपाणौ यदा जातश्चक्षूरोगी भवेद्ध्रुवम् ।

तस्यारिष्टं महच्चैव व्याघ्राच्चैव विशेषतः ॥
अधर्मेषु च चित्तं स्यात्स्त्रीवशो धनवानपि ।
अन्तः क्रूरो महाधैर्यः क्षणिको बहुभाषकः ॥

कोशे पार्श्वे भवेद्विघ्नं शैशवे च रुजान्वितः ।
निजबन्धोर्महाद्वेषी बाह्यबन्धोर्महानपि ॥

नेत्रपाणौ यदा राहुर्लग्ने वा सप्तमेऽपि वा ।
तदा सर्वविनाशः स्यात्सर्वदुःखप्रदायकः ॥
गुह्यस्थाने भवेद्रोगी जले चैव भवेद्भयम् ।
नवमे दशमे वाऽपि गमनेच्छा भवेद्यदि ॥
प्रकाशने च यो जातो धनवान्धार्मिकः सदा ।
नित्यं प्रवासी चोत्साही सात्विको राजसेवकः ॥
सिंहे वा कर्कटे वाऽपि यदि राहुः प्रकाशने ।
शिरच्छेदकरो योगो विष्णुना परिकीर्त्तितः ॥
गमनेच्छायां च यो जातो बहुपुत्रो महाधनः ।
पण्डितो गुणवान्दाता जायते च नरोत्तमः ॥
गमने च यदा जातो नानारोगी धनक्षयः ।
दन्तघाती महारोगी पिशुनः परनिन्दकः ॥
व्याघ्रभीतिः सर्पभीतिर्निगडस्थो दुरासदः ।
स्त्रीनाशो धननाशश्च बन्धुहीनो भवेन्नरः ॥
सभायां च यदा जातः कृपणो धनसंयुतः ।
नानागुणेन गुणवान् धार्मिकः पण्डितः शुचिः ॥
लग्ने वा दशमे वाऽपि पञ्चमे च यदा भवेत् ।
भार्यापुत्रविनाशः स्याद्वित्तनाशोऽतिचञ्चलः ॥
आगमने च यो जातः सर्व्वदुःखप्रदायकः ।
सुहृद्बन्धुविनाशः स्यान्नानाक्लेशोऽपि जायते ॥
भोजने च महालुब्धो मन्दाग्निश्च रुजान्वितः ।
दुःखितः कृपणश्चैव क्रूरश्च कलहप्रियः ॥
यदि दैवाद्भवेच्चैव लग्ने वाऽपि धनेऽपि वा ।
पतितं तं विजानीयाच्चन्द्रवंशो भवेद्यदि ॥
सप्तमे दशमे वाऽपि भोजने च यदा तमः ।
नारीं च हन्ति नियतं पुण्ये विघ्नं करोति सः ॥
जातश्च नृत्यलिप्सायां यदि लग्ने भवेत् क्वचित् ।

तदा षण्ढो माहारोगी चक्षुर्नाशो दुरासदः ॥
अन्यगृहे यदा जातो धनवान् बहुसम्पदः ।
नानासुखस्य गुणवान् द्विभार्यो बहुपुत्रकः ॥
कौतुके च यदा जातः सर्वगुणसमन्वितः ।
नानाधनेन धनवान् पित्तशूली भवेन्नरः ॥
विहाय पञ्चमं स्थानं सप्तमं दशमं तथा ।
नानादुःखं भवेत्तस्य पुत्रदारविवर्जितः ॥
यदि दैवाद्भवेत्तुङ्गी स्वगृही वा कदाचन ।
तदा सर्वं शुभं जातं जायते नात्र संशयः ॥
निद्रायां चापि यो जातः शोकदुःखरुजान्वितः ।
नवमे दशमे वाऽपि यदि निद्रा भवेत्पुनः ।
तदा दारिद्र्यदोषेण कृत्स्नां भ्रमति मेदिनीम् ॥

इति राहुभावफलम्.

Sloka 86. cf. बृहज्जातक

पृष्ठोभयकोदयर्क्षगास्त्वन्तेन्तः प्रथमेषु पाकदाः ॥

Also गार्गिः

आद्यन्तमध्यफलदः शिरःपृष्ठोभयोदये ।
दशाप्रवेशे समये तिष्ठन्वाच्यो दशापतिः ॥

Also सारावली

आदौ दशासु फलदः शीर्षोदयराशिसंस्थितो विहगः ।
उभयोदये च मध्ये स्वान्त्ये पृष्ठोदये च नीचर्क्षे ॥

Adhyaya III

Out of the 80 slokas in this Adhyaya, 46 have been taken from बृहज्जातक, *viz.*, Slokas 1-4, 7-15, 21-25, 38-40, 43-44, 46-47, 58, 60-79.

Slokas 1-2. The वियोनि Rasis are मेष, वृषभ, कटक, सिंह, वृश्चिक, first half of धनुस्, मकर and मीन.

For a वियोनिजन्म the following conditions are necessary:–

(1) The malefic planets must be strong.

(2) The benefic ones should be weak.

(3) One of the neutral planet Mercury or Saturn should be in a Kendra position with respect to the Lagna or aspect the Lagna.

(4) The Dwadasamsa occupied by the Moon should be a **वियोनिराशि**.

Suppose there is a birth when the Moon is on the 12th degree of Dhanus. As each Dwadasamsa consists of 2½ degrees and the first Dwadasamsa in that Rasi begins with Dhanus, the Dwadasamsa occupied by the Moon is Mesha. The birth of a goat or sheep has therefore to be predicted, and so on.

cf. सारावली

क्रूरैः सुबलसमेतैः सौम्यैर्विबलैर्वियोनिलग्ने वा ।
सौम्यार्किभ्यां केन्द्रे तदीक्षिते वा वियोनिः स्यात् ॥

Sloka 3. cf. गुणाकर

मेषान्मूर्द्धा वदनगलकौ चाथ पादांसकं च
पृष्ठं चोरःस्थलमथ ततः पार्श्वयुग्मं च कुक्षी ।
पादापाने जननवृषणौ स्फिग्द्वयं चाथ पुच्छं
तिर्यग्योनेर्वपुषि मुनयः प्राहुरिच्छांतमित्थम् ॥

Sloka 4. cf. गुणाकर

लग्नस्थितग्रहवशाद् द्युचरेक्षणाद्वा नन्दांशकादुत बलेन चतुष्पदानाम् ।
भूयो विलोकनतया हि बहूंश्च वर्णाल्लेखा वदन्ति मदनोपगतैश्च पृष्ठे ॥

Also सारावली

मेषादिभिरुदयस्थैरंशैर्वा ग्रहयुतैश्च दृष्टैर्वा ।
स्वं स्वं वर्ण ब्रूयाद्गात्रे चिह्नं व्रणं वाऽपि ॥
स्वगृहांशकसंयोगाद्द्विधाद्वर्णान् परांशके ऋक्षान् ।
सप्तमसंस्थाः कुर्युः पृष्ठे रेखां स्ववर्णसमाम् ॥
वीक्षन्ते यावन्तो वियोनिवर्णाश्च तावन्तः ।
बलदीप्तो गगनचरः करोति वर्ण वियोनीनाम् ॥
पीतं करोति जीवः शशी सितं भार्गवो विचित्रं च ।
रक्तो दिनकररुधिरौ रविजः कृष्णं बुधः शबलम् ॥

स्वे राशौ परभागे परराशौ स्वांशके तिष्ठन् ।
पश्यन् ग्रहोऽपि लग्नं सुवर्णवर्णं तदा कुरुते ॥
परिघपरिवेषजलदैः शङ्कुकवेधैर्ध्वजैश्च वृक्षैश्च ।
वृषमृगदण्डैः सर्पैः शक्रधनुः पांसुभिर्वाऽपि ॥
यद्वर्णेन वृतः स्याद्ग्रहस्तामिह वर्णमादिशेन्मतिमान् ।
स्वाभाविकैर्ग्रहाणां वर्णैर्वर्णा भवन्ति जातानाम् ॥

Sloka 6. cf **सर्वार्थचिन्तामणि**

शुक्रेक्षिते गोजननं महिष्याः सूर्यात्मजेनापि युतः सदृष्टः ।
राहुध्वजाभ्यां सहितोऽथ दृष्टो मेषस्तु जातोऽन्यपशुस्तथान्यैः ॥

Sloka 7. cf. **गुणाकर**

विहङ्गे द्रेष्काणे चरगृहनवांशे च तनुगे
बलोपेते खेटे शशिसुतनवांशेऽपि यदि वा ।
शनीन्द्वोः संयोगादुत तदवलोक्यादितिबुधैः
प्रबोधव्या चिन्ता स्थलजलभुवामत्र वयसाम् ॥

Also **सारावली**

विहगोदितदृक्काणे ग्रहेण बलिना युते च चरभांशे ।
बौधेंशे वा विहगाः स्थलाम्बुजाः शनिशशीक्षणाद्योगात् ॥

Sloka 8. **तोये स्थले** is another reading.

Bhattotpala in his commentary to this sloka says regarding the latter half:— उदितांशः स्थलचरी जलचरी वा भवति तदधिपतिः यावत्संख्ये राशौ लग्नाद्यवस्थितः तावत्संख्या एव तरवो वृक्षाः स्थलजा जलजा वा वक्तव्याः– अत्रापि अंशकपतिवशाद्वक्ष्यमाणायुर्दायविधिना द्वित्रिगुणत्वं वाच्यम्– स्वतुङ्गवक्रोपगतैस्त्रिसङ्गुणं द्विरुत्तमस्वांशकभत्रिभागगैरिति ॥ अत्र द्वित्रिगुणत्वे प्राप्ते यावत्यो गणना भवन्ति तावत्यः कार्या इत्यागमविदः । तथा च सारावल्याम्

लग्नार्कजीवचन्द्रैरबलैः शेषैश्च मूलयोनिः स्यात् ।
स्थलजलभवनविभागा वृक्षादीनां प्रभेदकराः ॥
स्थलजलयोगो लग्नाद्यावति राशौ तु तेऽपि तावन्तः ।
द्वित्रिगुणत्वं तेषामायुर्दायप्रकारोक्तम् ॥ इति

Suppose the 14th degree of Mithuna to be rising. Then the rising Navamsa is the fifth in **मिथुनराशि,** *i.e.,* Kumbha, which is only a land sign. If at the time the position of Saturn (the lord of Kumbha) be **वृश्चिक**, the number of trees will be the number of Rasis separating Saturn from the Lagna *i.e.* from **मिथुन** to **वृश्चिक** *i.e.* 6· Again, from the slokas of **सारावली** quoted above, the following has also to be noted: If the lord of the rising Navamsa either occupy his exaltation sign or be retrograde in his motion, the number already obtained should be trebled. If he be in his **वर्गोत्तम** or his own Navamsa or Rasi or Drekkana, such number should be doubled. For example, if Saturn in the instance cited be retrograde in his motion, or instead of occupying **वृश्चिक** be in **तुला**, his exaltation **राशि**, the number 5 (**तुला** being the 5th from **मिथुन**) should be trebled. We shall thus have 15. But if Saturn should occupy the 4th Navamsa of **तुला**, *viz*-**मकर** (his own place), the number of trees will be only 5 × 2 or 10, and so on.

Sloka 9. *cf*. **सारावली**

अन्तःसारान् वृक्षान् भानुर्दुर्गान् करोति तद्रूपान् ।
क्षीरस्नेहसमेतान् शशी गुरुः फलसमेतांश्च ॥
कटुकण्टकिनो रुधिरः सुदुर्भगांस्तरणिजस्तथा शुक्रः ।
कुसुमफलस्नेहयुतान् बुधश्च बलवर्जितं जनयेत् ॥

Also **पराशर**

स्थूलान् जनयति सूर्यो दुर्भगान् सूर्यपुत्रकः ।
क्षीरोपेतांस्तथा चन्द्रः कटुकाद्यान् धरासुतः ॥
गुरुज्ञौ सफलान्विप्र पुष्पवृक्षान् भृगोः सुतः ।
नीरसान् सूर्यपुत्रश्च एवं ज्ञेयाः खगा द्विज ॥

Sloka 10. The reader will do well to go through Chapter 53 of **सारावली** for detailed information on **तिर्योनिजन्म**.

For the latter half of this Sloka *cf.* **सारावली**

स्वांशात्परांशगामिषु यावत्संख्या भवन्ति तावन्तः ।
स्थलजा वा जलजा वा तरवः प्राक्संख्यया प्रवदेत् ॥

Sloka 11. cf. गुणाकर

शशिक्षितिजहेतुकं जगुरिहार्त्तवं योषितः
शशिन्यपचयर्क्षगे धरणिसूनुना वीक्षिते ।
अपत्यजननक्षमं ह्युपचयाश्रिते प्रेयसो
बृहस्पतिविलोकिते स्वपतिसङ्गमाप्नोति सा ॥

Bhattotpala, the commentator says:—

स्त्रियो जन्मर्क्षात् अनुपचयस्थश्चन्द्रमाः तत्र च यद्यङ्गारकेण दृश्यते तदा गर्भग्रहणमप्यार्तवस्यातीव हेतुर्भवति । अन्यत्र बालवृद्धातुरवन्ध्याभावः । अत्र च बादरायणः ॥

स्त्रीणां गतोऽनुपचयर्क्षमनुष्णरश्मिः संदृश्यते यदि धरातनयेन तासाम् ।
गर्भग्रहार्तवमुशन्ति तदा न वन्ध्यावृद्धातुराल्पवयसामपि चैतदिष्टम् ॥

तथा च सारावल्याम्

अनुपचयराशिसंस्थे कुमुदाकरबान्धवे रुधिरदृष्टे ।
प्रतिमासं युवतीनां भवतीह रजो ध्रुवं त्वेके ॥
इन्दुर्जलं कुजोऽग्निर्जलमिश्रं त्वग्निरेव पित्तं स्यात् ।
एवं रक्ते क्षुभिते पित्तेन रजः प्रवर्तते स्त्रीषु ॥
एवं यद्भवति रजो गर्भस्य निमित्तमेव कथितं तत् ।
उपचयसंस्थे विपुलं प्रतिमासं दर्शनं तस्याः ॥

नन्वत्रातोऽन्यथास्थ इत्यनेन स्त्रिया उपचयस्थ इति कस्मान्न व्याख्यायते अयुक्तमेतत् प्राधान्यात्पुरुषस्यैवैतत् । यस्माद्बादरायणः ॥

पुरुषोपचयगृहस्थो गुरुणा यदि दृश्यते हिममयूखः ।
स्त्रीपुरुषसंप्रयोगं तदा वदेदन्यथा नैवम् ॥ इति

सारावलीकारेण सामान्येनोक्तम् । तद्यथा

उपचयभवने शशभृद्दृष्टो गुरुणा सुहृद्भिरथवासौ ।
पुंसां करोति योगं विशेषतः शुक्रसंदृष्टः ॥ इति

कस्मिन् कालेऽयं विचारः—उच्यते— चतुर्थदिने स्नातायां—तथा मणित्थः

ऋतुविरमे स्नातायां यद्युपचयसंस्थितः शशी भवति ।
बलिना गुरुणा दृष्टो भर्त्रा सह सङ्गमश्च तदा ॥
राजपुरुषेण रविणा विटेन भौमेन वीक्षिते चन्द्रे ।
सौम्येन चपलमतिना भृगुणा कान्तेन रूपवता ॥

भृत्येन सूर्यपुत्रेण याति सा स्त्री समागमम् ।
एकैकेन फलं स्याद्दृष्टेनान्यैः कुजादिभिः पापैः ॥
सर्वैः स्वगृहत्यक्तैर्गच्छति वेश्यापदं युवतिः ॥ इति–

Menses appear in women every month when the Moon occupies an Anupachaya Rasi (1st, 2nd, 4th, 5th, 7th, 8th, 9th, & 12th), and is at the same time aspected by Mars. The Moon is water; Mars is fire. When water and fire combine, the resultant is bile. When the bile mixes with the blood, menses occur.

If, in the case of a woman as soon as she bathes after the stoppage of the menses, the Moon in its orbit should occupy an Upachaya Rasi and be at the same time aspected by powerful Jupiter, she will have sexual intercourse with her husband. If the Moon in the above said Upachaya position be aspected by the Sun, she will have sexual union with an officer of the King. If the aspecting planet be Mars, the union will be with a voluptuary. If it be Mercury, the intercourse will be with a fickle-minded person. If Venus be the aspecting planet, it will be with a beautiful lover. If it be Saturn, she will have criminal intimacy with an ordinary servant. If the Moon be aspected by several malefic planets who are not occupying their own houses at the time, the woman will become a courtezan.

Sloka 12. *cf.* सारावली

द्विपदादयो विलग्नात् सुरतं कुर्वन्ति सप्तमे यद्वत् ।
तद्वत्पुरुषाणामपि गर्भाधानं समादेश्यम् ॥
अस्तेऽशुभयुतदृष्टे सरोषकलहं भवेत्तत्र ।
सौम्यैः सौम्यं सुरतं वात्स्यायनसम्प्रयोगिकाख्यातम् ॥

Sloka 13. In line 7 of the translation of the sloka, read "उपचय" for "अपचय". *cf.* सारावली.

उपचयगौ रविशुक्रौ बलिनौ पुंसः समांशसम्प्राप्तौ ।
युवतेर्वा कुजचन्द्रौ यदा तदा गर्भसंभवो भवति ॥

Also गुणाकर

स्वर्क्षांशगौ रविकवी सबलौ नराणां चन्द्रासृजावुपचये यदि चाङ्गनानाम् ।
वाचस्पतावुपचयात्मजधर्मगे वा गर्भाय संभवति तत्र रतिप्रयोगः ॥

Also लघुजातक

बलयुक्तौ स्वगृहांशेष्वर्कसितावुपचयर्क्षगौ पुंसाम् ।
स्त्रीणां वा कुजचन्द्रौ यदा तदा गर्भसंभवो भवति ॥

The above combinations need not necessarily be with respect to the male or female. They may also be with respect to the time of conception or Adhana Lagna (आधानलग्न).

Cf. सारावली

शुक्रार्कभौमशशिभिः स्वांशोपचयस्थितैः सुरेड्ये वा ।
धर्मोदयात्मजस्थे बलवति गर्भस्य संभवो भवति ॥

Also शौनक

आधानलग्नादर्केन्दुसितभौमा निजांशकाः ।
कुर्वन्त्युपचयं प्राप्ता निषेकं सफलं मुने ॥

Another meaning can also be attributed to the sloka as follows:

इडायां चन्द्रमाः प्रोक्तः पिङ्गलायां च भास्करः ।

So रवि in the sloka means पिङ्गला (Pingala) and इन्दु means इडा. These are the winds passing through the right and left nadis (नाडि—arteries and veins–). शुक्रावनिज will mean semen and blood or the male and female energy. The sloka will then mean

(i) If the author of conception has, at the time of connection, strong wind passing through the right नाडि, then the female will conceive a male child and if in the left a female child.

(ii) If semen be greater, the female will conceive a male child and if blood, a female child.

In the case of equality of wind in the right and left nadis or of the semen and blood, the female will conceive a eunuch

cf. सन्दहोरा

वामया संचरन्वायुर्नाड्या जनयति स्त्रियम् ।
पुमांसमन्यया वायुराधान इति केचन ॥

Also **संहित**

रक्तेऽधिके स्त्रीपुरुषश्च शुक्रे नपुंसकं शोणितशुक्रसाम्ये ।
यस्मादतः शुक्रविवृद्धिदानि निषेवितव्यानि रसायनानि ॥

2nd quarter. cf. **शौनक**

तत्रस्वांशगते जीवे तत्त्रिकोणगतेऽपि वा ।
सफलं तद्विजानीहि सुतभस्थे विशेषतः ॥

Sloka 14. cf. **गुणाकर**

भौमशनी स्मरगौ शशिभान्वोः स्त्रीनरयोर्गददौ क्रमतः स्तः ।
मध्यगतौ मृतिदौ कुजशन्योस्तौ च तथैकतरे क्षितियुक्तौ ॥

For some more similar yogas. *cf.* also **मीनराजजातक**

मन्दारयोः सप्तमराशिसंस्थयोर्यदा निषेको मरणं तदा पितुः ।
रवेः शशाङ्कात्त्वथ तज्जनन्या एकेन रोगाः पुरुषप्रवादाः ॥
यदा हिमांशुर्व्ययगो दिवाकरश्छिद्रं गतो भूतनयश्चतुर्थः ।
मृत्युस्तदा संभवते ह्युभाभ्यां शस्त्रेण सौरेण तु बन्धनेन ॥
मृत्युंकरः शीतकरः खरिःफे सुखस्थितः सूर्यसुतः सभौमः ।
नगर्भसंभूतिरिह प्रदिष्टा योगैः ससौम्यैः प्रवदन्ति कृच्छ्रात् ॥
मूर्त्तिस्थितस्तीक्ष्णकरः कुजो वा सक्षीणमूर्त्तिर्विधुरिःफगो वा ।
वृथा फलं स्यात्सुरतोपचारे नीचाश्रितैस्त्र्यादिभिरत्र पुंसाम् ॥

The yogas stated in the text must be understood to refer to the time of conception.

Sloka 15. cf. **गुणाकर**

अहनि सवितशुक्रौ मन्दचन्द्रौ रजन्यां
जनयितृजनयित्री संज्ञितौ व्यत्ययातौ ।
पितृसहजसवित्रीस्वसृसंज्ञावथैतौ
विषमसमगृहस्थौ तत्तयोरेव पुष्ट्यै ॥
आदौ द्युरात्र्योः पितृमातृखेटौ फलं हि पूर्णं ददतुः स्वकीयम् ।
अन्ते तयोस्तुच्छमतीव मध्ये पापं शुभं चापरिकल्पनीयम् ॥

Also **सारावली**

दिवसे मातापितरौ शुक्ररवी शशिशनी निशायां च ।
मातृभगिनीपितृव्यौ विपर्ययात्कीर्तितौ यवनैः ॥

दिवसे निषक्तस्य जातस्य चेति शेषः । एवं निशायामित्यत्रापि ।

लग्नाद्विषमर्क्षगतः पितुः पितृव्यस्य खेचरः शस्तः ।
मातृभगिनीजनन्योः समगृहगोऽन्ये तथा भेषु ॥

अन्यथोक्तवैपरीत्येषु मातृपित्रादिषु अन्यः विपरीतफलः । अशस्त इत्यर्थः ।

Sloka 16. In line 5 of the translation of this sloka, read 'male' for 'female'. The last quarter of this sloka reads thus in **फलदीपिका**

अत्याज्ये समये शुभाधिकयुते पर्वादिकालोज्झिते.

But the reading in the text is the more generally accepted one.

A few of the objectionable periods are

(a) Nakshatras **भरणी, कृत्तिका, आर्द्रा. आश्लेषा, पूर्वाषाढा** and **पूर्वाभाद्रपदा.**

(b) **अष्टमी** and other Vishtiriktas. and

(c) Sankrama and such other sacred days, fasting days, birth days, anniversary days and their previous ones. For detailed information, see Muhurta Sastras.

Sloka 17. There is a difference of opinion for discarding the first four days as unfit for impregnation. Some hold **'ऋतुस्तु षोडशनिशाः'** while others hold **'ऋतुस्तु द्वादशनिशाः'**. For impregnation, purity of the womb is desired.

अस्रृक्शेषं विशुद्धं तत्स्वनिष्ठां तत्वधारिणीम् ।
यत्तेशक्तिमतो योनिर्विवृता योषिता भवेत् ॥

At this time the female is supposed to attain the following qualifications:

cf Vahata:

क्षामप्रसन्नवदनां स्फुरःश्रोणिपयोधराम् ।
स्रस्ताक्षिकुक्षीं पुंस्कामां विद्यादृतुमतीं स्त्रियम् ॥

For this and the following sloka, see **अष्टाङ्गसङ्ग्रह** for more information.

Sloka 21. cf. **सारावली**

विषमे विषमांशगता होराशशिजीवभास्करा बलिनः ।
कुर्वन्ति जन्म पुंसां समे समांशे युवतिनरजन्म ॥

ओजर्क्षे गुरुसूर्यौ बलिनौ पुंसः समे सितेन्दुकुजाः ।
कन्यानां जन्मकरा गर्भाधाने स्थिता बलिनः ॥
मिथुने चापेऽर्कगुरू बुधदृष्टौ दारकद्वयं कुरुतः ।
स्त्रीयुग्मं कन्यायां सितशशिभौमा झषे च बुधदृष्टाः ॥

Also लघुजातक

विषमर्क्षे विषमांशे संस्थिताश्च गुरुशशाङ्कलग्नार्काः ।
पुंजन्मकराः समभेषु योषितां समनवांशगताः ॥
बलिनौ विषमेऽर्कगुरू नरं स्त्रियं समगृहे कुजेन्दुसिताः ।
यमलं द्विशरीरांशेष्विन्दुजदृष्ट्या स्वपक्षसमौ ॥

Sloka 22. cf. सारावली

लग्नं मुक्त्वा विषमे शनैश्चरः पुरुषजन्मदो भवति ।
योगे विहगस्य बलं संवीक्ष्य वदेन्नरं स्त्रियं वाऽपि ॥

Also गुणाकर

दिनकरसूनुर्विषमगृहस्थः । तनयकरः स्यादुदयमपास्य ॥

The yoga mentioned in the sloka of the text has to be applied only in the absence of the yogas mentioned in the previous verse.

It may here be observed that these slokas *viz* 21 & 22 propound fourteen male and fourteen female yogas, *viz*:

8 of each in the first half of sloka 21

3 .. Do .. .. 3rd quarter thereof

2... ..Do.........4th quarter thereof, and

1......Do.........in sloka, 22

Before making any prediction in this connection both the yogas should be carefully weighed and that which has a preponderating influence predicted.

Sloka 23 cf. गुणाकर

यद्यन्योन्यं तरणिशशिनौ पश्यतस्तत्सुतौ वा
भौमो वार्कं समगृहगतं लग्नचन्द्रावथौजे ।
युग्मौजर्क्षे हिमगुशशिजौ भूसुतेनेक्षितौ वा
पुंभागे वा तनुशशिसिता क्लीबयोगाः षडेते ॥

And सारावली

अन्योन्यं रविचन्द्रौ विषमर्क्षगतौ निरीक्षेते ।
इन्दुजरविपुत्रौ वा दृष्टौ बलिनौ नपुंसकं कुरुतः ॥

पश्यति वक्रः समभे सूर्यं चन्द्रोदयौ च विषमर्क्षे ।
यद्येवं गर्भस्थः क्लीबो मुनिभिः समादिष्टः ॥

ओजसमराशिसंस्थौ ज्ञेन्दू षण्ढं कुजेक्षितौ कुरुतः ।
नरभे विषमनवांशे होरेन्दुबुधाः सितार्किदृष्टा वा ॥

Also बृहत्प्राजापत्य

उदये विषमे तत्र स्थित इन्दौ च तन्मदम् ।
प्राप्तो नपुंसकं गर्भे सूचयत्यवनीसुतः ॥

ओजर्क्षमाश्रितात्सौम्यान्मदगो युग्मराशिगम् ।
पश्यन्वेन्दुमसौ कुर्याद्गर्भे तद्वन्नपुंसकम् ॥

And स्कन्दहोरा

विषमं लग्नमाश्रित्य वर्तमानान्निशाकरात् ।
मदमङ्गारकः प्राप्तो गर्भे कुर्यान्नपुंसकम् ॥

ओजर्क्षस्थाद्बुधाद्यद्वुत्सप्तमं गृहमाश्रितः ।
पश्यन्युग्मर्क्षगं सोमं कुर्याद्गर्भे नपुंकम् ॥

In the text it is not clearly said that for the 3rd yoga Mars must be in an odd sign. But it has to be so construed as to be in conformity with earlier authors.

Cf. स्कन्दहोरा

सूर्यचन्द्रमसावोजयुग्मर्क्षस्थौ परस्परम् ।
पश्यन्तौ बुधमन्दौ वा गर्भे क्लीभं प्रयच्छतः ॥
आरो विषमर्क्षस्थः पश्यन् सूर्यं समर्क्षगम् ।
अपश्यत्यापि सूर्ये स्वं कुर्याद्गर्भे नपुंसकम् ॥
लग्नेन्द्वोरोजयोरेष सप्तमं गृहमास्थितम् ।
ओजयुग्मगयोर्यद्वा सौम्यचन्द्रमसोर्द्वयोः ॥
ईक्षिता कुरुते गर्भे क्लीबमच्छोदयेन्दवः ।
पुंभागमाश्रिताश्चेति क्लीबयोगा भवन्ति षट् ॥

In the quotation from Badarayana given in the footnote on page 50, read ‘संस्था’ for ‘संख्या’ in the last line. And ‘विषमर्क्षसमर्क्षगौ’ is another and a better reading for ‘विषमाविषमर्क्षगौ, in the first line.

These eunuch yogas take effect only in the absence of male and female yogas. They are to be predicted from the आधानग्न or प्रश्नलग्न and not from horoscopes. And if they be predicted from horoscopes of the last child and if these yogas should exist therein, then the mother will bear no more. The author of the दशाध्यायी (another commentary for बृहज्जातक) after commenting on the sloka says:

एवं षट् क्लीबयोगा उक्ताः न केवलमाधानप्रश्नलग्नाभ्यां नपुंसकजन्म सूचकाः जातस्य जन्मकाले सन्ति चेत् सन्तति हानिकराः इति केचित् ।

Sloka 24. *cf.* सारावली

लग्ने समराशिगते चन्द्रे च निरीक्षिते बलयुतेन ।
गगनसदा वक्तव्यं मिथुनं गर्भस्थितं नित्यम् ॥
समराशौ शशिसितयोर्विषमे गुरुवक्रसौम्यलग्नेषु ।
द्विशरीरे वा बलिषु प्रवदेत् स्त्रीपुरुषमत्रैव ॥
द्विशरीरांशकयुक्तान् ग्रहान्विलग्नं च पश्यतीन्दुसुते ।
मिथुनांशे कन्यैका द्वौ पुरुषौ त्रितयमेवं स्यात् ॥
द्विशरीरांशकयुक्तान् ग्रहान्विलग्नं च पश्यतीन्दुसुते ।
कन्यांशे द्वे कन्ये पुरुषश्च निषिच्यते गर्भे ॥
मिथुने धनुरंशगतान् ग्रहान्विलग्नं च पश्यतीन्दुसुतः ।
मिथुनांशस्थश्च यदा पुरुषत्रितयं तदा गर्भे ॥
कन्यामीनांशस्थान् विहगानुदयं च युवतिभागगतः ।
पश्यति शिशिरगुतनयः कन्यात्रितयं तदा गर्भः ॥

Also बृहत्प्राजापत्य

यदा चन्द्रसितौ युग्मे लग्नमोजगृहं तथा ।
ओजर्क्षे ज्ञारजीवाश्च तदा मिथुनमादिशेत् ॥
उदयं युग्मतां प्राप्तं युग्मस्थं च निशाकरम् ।
पूर्णं पश्येद्रविर्यद्वा भौमो धिषण एव वा ॥

यावद्गर्भगतं तावदथवा मिथुनं वदेत् ।
युग्मस्थैर्ज्ञारजीवैश्च बलिभिर्युग्मतां गते ॥
उदये वीर्यसंयुक्ते गर्भस्थं मिथुनं वदेत् ।
यद्वा पश्यति सौम्यस्त्रींश्चतुरो वा नभश्चरान् ॥
द्विशरीरांशगान् स्वांशे स्थितो लग्नं च तादृशम् ।
तदा प्रजात्रयं विद्याद्युग्मत्वेऽत्र बुधांशकान् ॥
साम्यं च स्वसमानांशैस्तस्य तैः सूचयत्ययम् ।
स्त्रियौ नरं नरौ स्त्रीं च विभज्यास्माच्च निर्दिशेत् ॥

In the first line of the sloka in the text, some books read ‘ युग्मे चन्द्रसितौ तथौजभवने ’ for ‘ युग्मे चन्द्रसितावथौजभवने. ’

Sloka 25. cf. Bhattotpala, the commentator, is of opinion that the word प्रभूताः may mean 5,7 or 10 “ पञ्च सप्त दश वा गर्भे संभवन्ति”

Cf. गुणाकर

तनौ तुरङ्गमान्त्यगे बलाधिकैस्तदंशगैः ।
ग्रहैर्ज्ञमन्दवीक्षिते तदाऽमितास्तु कोशगः ॥

Slokas 26-28. These are mere repetitions of what has already been stated in sloka 24 *supra.*

Slokas 29-30. cf. शुकजातक

रविजीवौ युग्मधनुर्नवांशस्थौ बुधेक्षितौ ।
पुंयुग्मं मीनकन्यांशास्थितौ पुंस्त्रीयुगं वदेत् ॥
भौमेन्दुशुक्रा मीनस्त्रीनवांशस्था बुधेक्षिताः ।
स्त्रीयुगं चापयुग्मांशे गर्भे पुंस्त्रीयुगं भवेत् ॥

Sloka 34 The reading of the second half of this sloka is different in सर्वार्थचिन्तामणि, *viz.*,

तृतीयनाथेन युतो निषेकलग्नेश्वरस्तत्सहजे तथैव and appears to be the correct one.

Sloka 35. cf. सर्वार्थचिन्तामणि

लग्नेश्वरे कर्मगते विलग्ने भोगीन्द्रयुक्ते सति पादजातः ।

As a matter of fact, this ought to be the first half of the next sloka. It is difficult to account for the omission.

Sloka 37. This also appears in **सर्वार्थचिन्तामणि.** The reading of the first half there is slightly different: *viz.*,

लग्नत्रिभागेऽण्डजसर्पकाले तन्नाथयुक्ते तु तथा त्रिभागे ।

Sloka 38. *cf.* **गुणाकर.**

पापोदये पापयुते विधौ वा त्रिभागगे वृश्चिकराशिभर्तुः ।
शुभैर्धनोपान्त्यगतैः प्रसूतः फणी भवेत्तत्परिवेष्टितो वा ॥

Also **सारावली**

भौमशनिद्रेक्काणे पापे लग्ने स्थिते शशियुते वा ।
द्व्येकादशगैः सौम्यैरभिवेष्टितको भुजङ्गेन ॥

Also **गर्ग**

भौमद्रेक्काणगे चन्द्रे सौम्यैरायधनस्थितैः ।
सर्पस्तद्वेष्टितस्तद्वत्पापलग्ने विनिर्दिशेत् ॥

Neither in the text, nor in the slokas above quoted, the position of the malefics is specified. But they are to be either with the Moon or the Lagna and for this purpose **सपापे** has to be added on by the grammatical process of **अध्याहरण.**

Cf. **स्कन्दहोरा**

समसौम्यैर्गतः सेन्दौ दृगाणेऽङ्गारकेश्वरे ।
तादृशस्य च लग्नस्य स्वायस्थैरखिलैः शुभैः ॥
उरगोवेष्टितस्तेन शिशुर्वेति विभावयेत् ।
चन्द्रेणोरग आख्यातो लग्नेनोरगवेष्टितः ॥

Also **बृहत्प्राजापत्य**

शशिनः सकलैः पापैः सङ्गतस्य महीसुते ।
दृगाणाधिपतावायधनस्थैरखिलैः शुभैः ॥
जातं सर्पं विजानीहि लग्नं चेच्छशिनः पदे ।
योगेऽत्र तेन जानीहि जातं सर्पेण वेष्टितम् ॥

And **शौनक**

सर्वैः पापैः समेतस्य लग्नस्य शशिनोऽथवा ।
खस्थैरायस्थितैर्यद्वा सौम्यैः पन्नगवेष्टितः ॥

Sloka 39. *cf.* सारावली

सूर्यश्चतुष्पदस्थः शेषा द्विशरीरसंस्थिता बलिनः ।
कोशैर्वेष्टितदेहौ यमलौ खलु संप्रजायेते ॥

Also गुणाकर

चतुष्पदे स्थिते रवौ परैर्द्विमूर्त्तिवर्त्तिभिः ।
बलेन संयुतैर्यमौ स्त एककोशवेष्टितौ ॥

Sloka 40. *cf.* सारावली

सिंहाजगोभिरुदये जातो नालेन वेष्टितो जन्तुः ।
लग्ने कुजेऽथ सौरे राश्यंशसमानगात्रश्च ॥

'छागसिंहवृषे लग्ने' is another reading. It will then mean "If Mesha or Simha be the Lagna and be at the same time occupied by Saturn, or if Mars occupy Vrishabha identical with the Lagna, and no other planet occupies the Lagna in either case, then the effect said in the text will happen."

Cf. स्कन्दहोरा

उदये मेषतां प्राप्ते सिंहत्वमथवा गते ।
तत्र चेत्सौर एकाकी वृषे तत्र कुजस्तथा ॥

Also बृहत्प्राजापत्य

अजे लग्ने मृगेन्द्रे वा मन्दस्तत्र स्थितो यदि ।
अङ्के लग्नांशकाख्ये ये नालेनोद्वेष्टनं वदेत् ॥
वृषे स्याद्भूमिपुत्रश्चेत् स्थितो लग्नत्वमीयुषि ।
तदा च द्वाविमौ तत्र स्थितावेकाकिनौ यदि ॥

Sloka 42. Venkatesadaivagna reads 'वासरनाथ' instead of 'वासुरनाथ' in his सर्वार्थचिन्तामणि.

Sloka 43. *cf.* शौनकहोरा

आधाने प्रश्नकाले वा यतिमेऽर्कांशके शशी ।
मेषतस्तदिमं राशिं प्राप्तेऽस्मिन् प्रसवो भवेत् ॥
तस्मादर्कांशतस्तस्मिंस्तदिमं वा गते गृहम् ।
दिनराशिगतश्चन्द्रो यद्यसौ लेयतोऽपि वा ॥
रात्रिराशिगते तत्र विपरीतेन वर्त्मना ।
तदिमं राशिमापन्ने प्रसवं कर्किततो वदेत् ॥

तद्भागभं गते वेन्दौ सूतिं केचन मन्वते ।
इन्दुनात्र नवांशं वा गृहाण बलयोगतः ॥
स्वनवांशकभं प्राप्ते तस्मिन्वा प्रसवो भवेत् ।
स्वनवांशं नवांशर्क्षमथवाऽस्मिन्नुपेयुषि ॥
अथ साधारणं वक्ष्ये सर्वत्रात्र महामते ।
दिनरात्रिविभागार्थं तन्मे निगदतः शृणु ॥
अथ नैषेकलग्नस्य त्रिंशांशे यावती स्थितिः ।
तावत्यत्र गते रात्रौ दिवा वा प्रसवो भवेत् ॥
तत्कालचन्द्रस्त्रिंशांशे यावती स्याद्व्यवस्थितिः ।
तावत्यत्रगते रात्रौ दिवा वा प्रसवो भवेत् ॥
रात्रिराशिगते लग्ने चन्द्रे वा रात्रिकल्पना ।
दिनराशिगते लग्ने चन्द्रे वा दिनकल्पना ॥
अथ नैषेकलग्नस्य षष्ठ्यंशे यावती स्थितिः ।
नाड्यां गतायां तावत्यां वदेद्वाऽहनि वा निशि ॥
सूर्यस्योदयतः पूर्वे पक्षेऽस्तमयतोऽपरे ।
यस्मिन्नाधानमारभ्य तस्मिन्नाहनि धारया ॥
व्याख्यात इन्दुनैषेकलग्नेनैवं मया मुने ।
दृढं द्विबहुसंवादात् सर्वं विद्धि द्विजोत्तम ॥

अथ गर्भाधानलग्नात् प्रसवमासज्ञानं शुकजातके

गर्भाधानं चरे राशौ नवमे मासि सूयते ।
स्थिरभे दशमे मासि द्व्यङ्गे चैकादशे च सः ।

कस्मिन् राशौ चन्द्रे सति प्रसवो भविष्यति इत्येतज्ज्ञानार्थं आह गार्गिः ।

यावत्संख्ये द्वादशांशे शीतरश्मिर्यदा स्थितः ।
तत्संख्येयस्ततो राशिर्जन्मेन्दौ तद्गते भवेत् ॥

अस्यार्थः । मेषादिगणनया यावत्संख्ये द्वादशांशे चन्द्रमा व्यवस्थितस्तद्राशिस्तावत्संख्यो यो राशिस्तत्र वर्तमाने जन्म वक्तव्यमिति । अत्र चन्द्रद्वादशांशप्रमाणेन २–३० कलात्मकेन १५० सकलश्चन्द्रराशिरष्टादशशतकला १८०० लभ्यते तदा भुक्तद्वादशकलाप्रमाणे किमित्यनुपातलब्धं चन्द्रराशिभुक्तं कलात्मकं ज्ञेयं। ततोऽष्टशतकलाकल्पनया चन्द्रनक्षत्रं ज्ञेयमिति विशेषः । अन्ये तु तत्कालेन्दुना यावत्संख्यो द्वादशभाग अधिष्ठितस्तावत्संख्याराशिस्थे चन्द्रे सति प्रसवकाले प्रसवो वक्तव्यः । तथा च सारावल्याम्

यस्मिन्द्वादशभागे गर्भाधाने व्यवस्थितश्चन्द्रः ।
तत्तुल्यर्क्षे प्रसवं गर्भस्य समादिशेत्प्राज्ञः ॥

समुद्रजातकेऽपि

यतमे द्वादशांशेतः सूतिस्तत्संख्यगे विधौ । इति

अत्र चन्द्रलग्नयोर्मध्ये यो बलवान् तस्य द्वादशांशकवशेन चन्द्रराशिज्ञेयः इत्युक्तं शुकजातके ।

लग्नेन्द्वोर्यो वलवान् तस्य द्विरसान्वितो राशिः ।
यावत्तस्मात्परतो राशिः स्थिते विधौ प्रसवः ॥ इति.

अत्रगर्गशुकाचार्ययोरेकवाक्यत्वात्सारावलीसमुद्रजातकादिमते मूलं मृग्यम्.

Suppose the **आधानलग्न** or **प्रश्नलग्न** to be 3 signs 8° 12,' 20′, and the position of the Moon at the time 4 signs 10° 25′ 35″ As the Moon is in the 5th Dwadasamsa of Simha, the Dwadasamsa is Dhanus. The birth has to be predicted when the Moon passes through the 5th Rasi counted from Dhanus, *i.e.* Mesha. This is the view of some.

According to others the birth should be predicted thus:— Find by counting from Mesha the order of the Rasi representing the Dwadasamsa; when the Moon traverses through so many Rasis from the Dwadasamsa Rasi, birth will happen. According to this view, Dhanus happens to be the 9th from Mesha ; the birth will happen when the Moon is in the 9th Rasi from Dhanus. *i.e.* Simha. The former view seems more rational.

Then, to find the the exact position of the Moon, we have $\frac{25' \, 35''}{150'}$ of **मेष** as having been traversed by the Moon at birth time, or $5^\circ{\cdot}11\dot{6}$ or the second quarter of the star Aswini.

To know the time, we proceed thus:

The Lagna is 8° 12' 20" in **कटक** which is a night sign. The exact time will therefore be at $\frac{8^\circ \, 12' \, 20''}{30^\circ} \times$ 30 ghatikas (the period of night) or at 8 ghatikas, 12⅓ Vighatikas in the night.

Balabhadra also adds that only in the case of the Moon and the lord of the 5th bhava at the time of query or आधान ocupying one and the same Rasi, it has to be predicted that the pregnant woman will be delivered of her child at that very instant, and not otherwise.

Sloka 44. cf. समुद्रजातक

लग्ने यमांशे मन्देऽस्ते निषेकश्चेत् समात्रयात् ।
सूतिः कर्कांशगेऽङ्गस्थे चन्द्रेऽस्ते द्वादशाब्दकः ॥

Also गुणाकर

मन्दस्य भांशे तनुगेऽर्कजेऽस्ते वर्षत्रयेण प्रसवस्तदानीम् ॥
मन्दभांशगे विधौ द्यूनगेऽर्कजे तथा ।
द्वादशे च हायने सूतिरत्र जायते ॥

Alse सारावली

लग्ने शनैश्चरांशे शनैश्चरे द्यूनगे यदि निषेके ।
वर्षत्रयेण सूतिर्द्वादशभिः स्याच्छशिनि चैवम् ॥

The Sloka is interpreted in दशाध्यायी to mean " If the Navamsa Rasi of the Moon at the time of conception be one of Saturn's houses and if Saturn be in the 7th bhava from the Moon, then the birth will happen in the twelfth year" and in support thereof, the following sloka from बृहत्प्राजापत्य is quoted:

अथ नैषेकचन्द्रस्य मन्दांशे सप्तमं गतः ।
मन्दो वा हिबुकं स्याच्चेत्सूतिर्द्वादशवत्सरैः ॥

In बृहत्प्राजापत्य it is said " सप्तमं हिबुकं वा, " and in the text " सप्तमस्थे च" is used. This च should be taken to mean सप्तमस्थे हिबुकस्थे च सति, The object of Varahamihira is to place Saturn in a Kendra with his full aspect on the Lagna or the Moon.

Cf. स्कन्दहोरा

नैषेकलग्नस्येन्दोर्वा नैषेकस्यांशकः शनेः ।
केन्द्रस्थितिश्च दृष्टिश्च त्रयं सूतिविलम्बकृत् ॥

It is also opined that if these yegas exist, the female will bear no more.

Cf. शौनकहोरा

आधानलग्ने शन्यंशे तत्सप्तमगतः शनिः ।
वेश्मस्थो वा ततः कुर्यात् प्रसूतिं वत्सरैस्त्रिभिः ॥
इन्दुरेवं विधः कुर्याद्द्वादशाब्दे द्विजोत्तम ।
एवं प्रसूतिकालेन तत्कालशशिना तथा ॥
भूयानपि च भूयिष्ठो विलम्बः प्रसवे पुनः ।
प्रसूतिकालं तं विद्धि यदा गर्भोदकः स्रुतिः ॥

Soka 45. *cf.* सर्वार्थचिन्तामणि

दुःस्थानगौ कर्मशुभाधिनाथौ बली विलग्नाधिपतिस्तदानीम् ।
सीमन्तकर्मादि विनैव जातो भवेन्नरः प्राथमिकोऽपि तत्र ॥
लाभे सपापे त्वथ तद्गृहे वा जातो नरः प्राथमिकोऽपि तत्र ।

Sloka 46. *cf.* गुणाकर

विलग्नमिन्दोर्ननिरीक्षमाणे भवेत्परोक्षस्य पितुः प्रसूतिः ।
भ्रष्टे च मध्याच्चरराशिसंस्थे तिग्मद्युतौ स्यात्परदेशगस्य ॥

Also सारावली

होरामनीक्षमाणे शशिनि परोक्षस्थिते पितरि जातः ।
मेषूरणागते वा चरभे भानौ विदेशगते ॥

Also वृद्धयवन

वाच्यं शिशोर्जन्म पितुः परोक्षे क्षपाकरः पश्यति चेन्न लग्नम् ।
चरस्थितेऽर्केऽष्टमधर्मगे वा विदेशसंस्थे पितरीह वाच्यम् ॥

For the second yoga given in the second half of the sloka (in the text), the condition that the Lagna is not aspected by the Moon is necessary; *cf.* शुकजातक

चरराशिगते भानौ नवमाष्टमसंस्थिते ।
शिशोः पिता विदेशस्थो लग्नं चन्द्रेण नेक्षितम् ॥

Sloka 47. बलभद्र slightly differs—He says

लग्नस्थिते वासरनाथपुत्रे यामित्रसंस्थेऽप्यथवा महीजे ।
चन्द्रेऽथवा सूर्यमहीजमध्ये विदेशसंस्थे जनके बभूव ॥

where the Moon if between Mars & the Sun is said to cause the same effect.

Cf. गुणाकर

उदयति वार्कावथ कुसुतेऽस्ते ।
बुधसितमध्ये स्थितवति वेन्दौ ॥ (पितुःपरोक्षस्य प्रसूतिः)

Sloka 48. *cf.* शुकजातक

सौम्यराश्यंशगे चन्द्रे गुरुराश्यंशगेऽपि वा ।
जारजातस्य योगेऽपि न परैर्जात इष्यते ॥

Vide also sloka 59 *infra.*

Sloka 56. Balabhadra in his होरारत्न states that this sloka is from तातमिश्र The reading given is as follows :—

स्वातीद्वितीयारविवारयोगे सोमात्मजे सप्तमिरेवतीषु ।
स्याद् द्वादशीवासवमन्दवारे जारेण जातं प्रवदन्ति बालम् ॥

Sloka 57. The following are some more yogas for illegitimate offsprings :—

नीचस्थिताश्चन्द्रदिवाकरेज्याः कुर्वन्त्यमी जन्मनि जारजातम् ।
लग्नेऽथवा सूर्यसुतेन दृष्टाः सौम्यैश्च शुक्रोदयशीतभासः ॥ गुणाकरः ॥

नवमस्थो गुरुर्यत्र धने चन्द्रोऽर्कमण्डले ।
अन्यजातः स विज्ञेयो योगेऽस्मिन्यतते ध्रुवम् ॥
चन्द्रारभानवः षष्ठे गुरुः पञ्चमगो यदि ।
योगेऽस्मिन्नात्र सन्देहश्चान्यजातः स उच्यते ॥ तातमिश्रः ॥

Also जातकोत्तमे

अर्यम्णभे स्याद्रविवासरेऽष्टमीविश्वे चतुर्थीगुरुवासरं च ।
हिर्बुध्नभे भौमदिने चतुर्दशी स्याज्जातजारस्य च जन्मकाले ॥

दिनान्ते च तिथिप्रान्ते लग्नप्रान्ते प्रसूतिषु ।
वारस्यान्ते च यो जातः सोऽन्यजातः प्रकीर्त्तितः ॥

भग्नपादर्क्षसंयोगाद्द्वितीया द्वादशी यदि ।
सप्तमी चार्कमन्दारे जारजो जायते ध्रुवम् ॥

Sloka 58. *cf.* गुणाकर

न प्राग्लग्नं पश्यतीन्दुं च जीवः सूर्योपेतं शीतरश्मिं च यद्वा ।
सार्के चन्द्रे पापयुक्तेऽथवा स्यान्निःसन्दिग्धं जारजातस्य जन्म ॥

Also सारावली

पश्यति न गुरुः शशिनं लग्नं च दिवाकरं सेन्दुम् ।
पापयुतं वा सार्कश्चन्द्रं यदि जारजातः स्यात् ॥

But it has to be stated here that if the Lagna and the Moon be in a Navamsa belonging to Jupiter, then the child should not be declared as illegitimate. *cf.* यवनेश्वर.

अजीवभागेऽप्यनवीक्षिते वा जीवेन चन्द्रेऽथ विलग्नभे वा ।
जातं परोद्भूतमिति ब्रुवन्ति वाच्ये जनेनाथ बलावलोकात् ॥

न वा शशाङ्को रविणा समागतः is another reading, The whole sloka is capable of being interpreted thus:

यदा गुरुः लग्नं इन्दुं च न निरीक्षते तदा शशाङ्कः रविणा समागतः न यदि अर्केणयुतः शशी सपापकः यदि वा मुनयः प्रसूतं परेण जातं निश्चयात्प्रवदन्ति ॥ That is, if Jupiter does not aspect the Lagna and the Moon, and at the same time the Moon be not in conjunction with the Sun, and secondly, the Lagna and the Moon being unaspected by Jupiter, if the Moon in conjunction with the Sun be also associated with a malefic planet, then the child should—in the absence of any restricting (अपवाद) yogas—be declared illegitimate. *cf.* स्कन्दहोरा.

न यदा लग्नमिन्दुं च चष्टे वाचस्पतिस्तदा ।
नेन्दुसूर्येण संबन्धो यद्यसावथ तद्युतः ॥
सपापको वा मुनयः प्रवदेयुस्तमन्यजम् ।
गुरोः क्षेत्रस्थितिर्योगस्तद्द्रेक्काणे तदंशके ॥
स्थितिश्चेद्यपवादान्वै चतुरोऽस्य वदाम्यहम् ।
तपसैव विजानन्तु प्राज्येन मुनयो परान् ॥

It would appear that 44 अपवाद yogas were after great penance observed one after another by Sages as stated below:

Brahma, Subrahmanya and Surya	4	Garga	1
		Marichi	12
Vyasa	3	Manu	1
Vasishta	1	Angiras	5
Attri	2	Lomasa	1

Parasara	2	Paulasa	3
Kasyapa	3	Chyavana	1
Narada	2	Saunaka	3

Vide Srutis.

These yogas are explained in the following slokas:

अथ ते संप्रवक्ष्यामि क्षेत्रजं तं तथौरसम् ।
अनौरसं वा विज्ञातुं वात्स्यायन निशाम्यताम् ॥
यदा न लग्नमिन्दुं च जीवः पश्यति सर्वथा ।
तथा विधुरसंबन्धः प्राधान्येन विवस्वता ।
संबद्धोऽप्यथ पापेन सहैकर्क्षैकभागगः ॥
स्याच्चेद्वा स तदा विद्धि जारजं तं न चेद्भवेत् ।
एकोऽपि वक्ष्यमाणेषु योगेष्वत्र द्विजोत्तम ॥
गुरोः क्षेत्रस्थितिर्योगस्तद्दृगाणे तदंशके ।
स्थितिश्चेदपवादान्वै चतुरोऽस्य गुहोऽब्रवीत् ॥
अथान्यानपि वक्ष्यामि शृणु वात्स्यायनाखिलान् ।
मुनिभिस्तपसा दृष्टान्योगानस्य विरोधिनः ॥
लग्नेन्द्वोः शुभवर्गाश्चेदुभयोः स्युरमिश्रिताः ।
एकेनाप्यन्यवर्गेण जारजं तं न निर्दिशेत् ॥
लग्नस्य नवमाधीशवर्गाधिक्यं तथा विधोः ।
अस्तेशवर्गाधिक्येतो जारजं तं न निर्दिशेत् ॥
वर्गाधिक्ये भृगोरिन्दौ लग्नं चेद्भार्गवांशकम् ।
न कश्चिदपि दैवज्ञो जारजं तं विनिर्दिशेत् ॥
अरन्ध्रनाथो देवेड्यो भाग्यं पश्यति चेद्बली ।
न कश्चिदपि दैवज्ञो जारजं तं विनिर्दिशेत् ॥
चन्द्राद्दशमभे दृष्टिर्जीवस्य बलिनो यदि ।
न कश्चिदपि दैवज्ञो जारजं तं विनिर्दिशेत् ॥
आयाधीशः शुभश्चेत्स्याज्जीवेन्द्वोरन्तरस्थितः ।
न कश्चिदपि दैवज्ञो जारजं तं विनिर्दिशेत् ॥
चन्द्राल्लाभं गतौ सौम्यभार्गवौ चेद्बलान्वितौ ।
न कश्चिदपि दैवज्ञो जारजं तं विनिर्दिशेत् ॥
चन्द्रात्कर्मणि सूर्यस्य दृष्टिश्चेदस्ति पुष्कला ।
स्थिरराशिं प्रपन्नस्य जारजो न भवेच्छिशुः ॥

वर्गोत्तमांशगश्चन्द्रस्तत्कर्माधिपसंयुतः ।
यदि स्यात्सौम्य जानीहि जारजो न भवेच्छिशुः ॥
पापदृग्योगहीनश्चेच्छीतांशुः शुभराशिगः ।
तदा सौम्यावबुध्यस्व जारजो न भवेच्छिशुः ॥
शुभकेन्द्रे शशी चेत्स्यात् पापदृष्टिविवर्जितः ।
तदा सौम्यावबुध्यस्व जारजो न भवेच्छिशुः ॥
वर्गोत्तमगतो यद्वा द्वितीयांशकमाश्रितः ।
कविः कर्कटकस्थश्चेदौरसः स भवेत्पितुः ॥
सूर्येण बलिना दृष्टः शुक्रश्चेदन्त्यसंस्थितः ।
चन्द्रस्य जारजो नायमौरसः स भवेत्पितुः ॥
स्वोच्चस्थः शीतरश्मिश्चेत्स्वोच्चांशकगतोऽपि वा ।
वात्स्यायन विजानीहि स पितुः पुत्र औरसः ॥
व्ययाधिपतिदृग्धीनः स्वक्षेत्रे यदि चन्द्रमाः ।
स्वस्यैव सौम्य बुध्यस्व पितुः पुत्रं तमौरसम् ॥
मिथुनस्यादितस्त्र्यंशे वणिजो वा द्वितीयके ।
कुंभस्य वान्त्ये चन्द्रश्चेज्जातं विद्धि तमौरसम् ॥
मिथुनांशगतश्चन्द्रो वणिगंशगतोऽपि वा ।
यदि कुंभांशकस्थो वा जातं विद्धि त्वमौरसम् ॥
त्यक्तेन्दोर्मण्डलस्येज्यक्षेत्रादन्यत्र चेत् स्थितिः ।
तद्दृगाणाद्ययोगो वा जातं विद्धि त्वमौरसम् ॥
त्यक्तेन्दोर्भास्करस्येज्यक्षेत्रादन्यत्र चेत् स्थितिः ॥
तद्दृगाणाद्ययोगो वा जातं विद्धि त्वमौरसम् ॥
शशिना संयुतः पापस्तस्माच्चेत्सप्तमाधिपः ।
वात्स्यायन विजानीहि जारजो न भवेच्छिशुः ॥
शिखिना सहितो जीवो मन्दत्रिंशांशगोऽपि वा ।
यद्यष्टमाधिपो वेन्दोरौरसः स भवेत्पितुः ॥
इन्दुर्लग्नेशयोर्बन्धुस्तत्काले वाक्पतिर्यदि ।
तत्समानांशकस्थश्चेज्जातः स पितुरौरसः ॥
स्वोच्चस्थः स्वसुताधीशः शीतांशुं यदि पश्यति ।
जारजो न स वक्तव्यः पितुः पुत्रः स औरसः ॥
जीवेन दृष्टः कश्चिच्चेच्चन्द्रं पश्यति खेचरः ।
तत्कालबन्धुभावेन तर्हि जातः स औरसः ॥

इन्दुः सूर्येण संयुक्तो जीवक्षेत्रगतोऽपि वा ।
यदि जीवेन युक्तो वा तर्हि जातः स औरसः ॥

अथ गुर्वंशकस्थो वा गुरुद्रेक्काणगोऽपि वा ।
गुरुत्रिंशांशकस्थो वा यदि जातः स औरसः ॥

लग्नार्कस्फुटयोगर्क्षसप्तमे बलवान् गुरुः ।
स्याच्चेत्तर्हि विजानीहि पितुः पुत्रं तमौरसम् ॥

एषामभावे सर्वेषामवधारय जारजम्
पूर्वोक्तेनैव योगेन प्रच्छन्नं वा वद क्वचित् ॥
कालः कलिरथादिष्टे योगे सम्बन्धगोचरम् ।
प्राधान्यमपि वक्ष्यामि तत्सौम्यावहितः शृणु ॥

तद्दृष्टिस्तत्सहस्थत्वं तदीयभवनस्थितिः ।
तदंशकस्थितिस्तस्य दृगाणस्थत्वमित्यमी ॥

पञ्चप्रधानसम्बन्धाः खेटानां सर्वसंमताः ।
तेषामभावः सर्वेषां योगस्योक्तस्य कारणम् ॥

Sloka 59. This sloka is from Garga. Please see *sloka 48* and the note thereto. वान्यराशिगे is another reading and seems to be the correct one.

Sloka 60. *cf.* सारावली

पञ्चमनवमद्यूने पापैरर्कात्तु पापसंदृष्टैः ।
बद्धः पितान्यदेशे राशिवशात् खेऽथवा मार्गे ॥

Also गुणाकर

क्रूरग्रहाः क्रूरगृहाश्रिता स्युः सूर्याद् ग्रहा धर्मसुतास्तसंस्थाः ।
बद्धस्तदा स्याज्जनकोऽन्यदेशे खे वाऽथवा वर्त्मनि भस्वभावात् ॥

From the plural numbers used in the above two quotations, it would appear that the term "malefics" need not necessarily be confined to Saturn and Mars, but may be extended to weak Moon, Rahu and Ketu. But it is not so. And by "क्रूरर्क्ष" all the five houses of malefics, viz मेष, सिंह, वृश्चिक, मकर and कुंभ are not meant, but only मेष, सिंह and कुंभ. Here the difference between the terms पापर्क्ष and क्रूरर्क्ष may be noted.

The one means "all the houses owned by malefics" while the other confines them to "their odd signs." *cf.* बृहत्प्राजापत्य

सिंहाजघटगौ (कुजमन्दौ) सूर्याद् द्यूनभाग्यसुतस्थितौ ।
स्यातां यदि तदा बन्धं जातस्य पितुरादिशेत् ॥

विवरण adds "If the Sun in the above case be in भुजग or निगलद्रेक्काण, the father is forcibly (illegally) confined; and if any other Drekkana, on account of business or legally."

Sloka 61. *cf.* सारावली

सौम्ये लग्ने पूर्णे स्वगृहगते शशिनि सलिलसंपाते ।
पातालस्थैश्चशुभैर्जलजे लग्नेऽस्तगे शशिनि ॥

The word शुभ in 'शुभे सुखे' in the text has been understood to mean only Jupiter by the commentator as there is not always a possibility of Venus occupying the 4th place from Mercury in the Lagna. "अत्रबुधात् शुक्रस्य चतुर्थगत्वासंभवात् चतुर्थगो गुरुर्ज्ञेयः" (बलभद्रः) *cf.* समुद्रजातक

पूर्णेन्दोः स्वगृहगे ज्ञे जीवे तुर्येतरीगत इति.

Cf. also गुणाकर

विलग्नगे ज्ञे सुखगे शुभाख्ये स्वर्क्षे हिमांशौ परिपूर्णगेहे ।
लग्ने जलेऽस्ते हिमरौधितौ वा प्रसूयते नावि तदाऽत्र गर्भः ॥

But the word स्वराशिगे may apply to शशिनि or सौम्ये in the text. For the latter view. *cf.* बृहत्प्राजापत्य

लग्ने नृयुग्मे कन्यायामथवा तद्गते बुधे ।
पूर्णः शशी धनस्थश्चेज्जननं नौगतौ वदेत् ॥

Also स्कन्दहोरा

पूर्णेन्दौ स्वराशिस्थे तथा सौम्ये च लग्नगे ।
बलवत्यम्भसः पृष्ठे नौकायां प्रसवं वदेत् ॥

According to the above, the word शुभे may also include Venus and पूर्णे शशिनि will mean the Moon during the ten days from शुक्लैकादशी to कृष्णपक्षपञ्चमी.

Sloka 62. cf. सारावली

सलिलभलग्ने चन्द्रो जलराशौ वीक्षते तथा पूर्णः ।
प्रसवं सलिले विन्द्याद्वन्धूदयदशमगश्च यदा ॥

Also गुणाकर

निरीक्षिते चेज्जलराशिलग्नं जलर्क्षगः पूर्णवपुर्मृगाङ्कः ।
विलग्नकर्माम्बुगतोऽथवेन्दुर्मध्ये जलस्य प्रसवस्तदानीम् ॥

Sloka 63. cf. बृहत्प्राजापत्य

लग्नस्थेन्दोर्व्ययस्थाने मन्दः सूर्यारवीक्षितः ।
गुप्तौ प्रसूतिमाचष्टे तत्कालेनोपपादितम् ॥
लग्ने कर्कटके यद्वा द्रोणे तत्र स्थिते शनौ ।
तत्सप्तमस्थः शीतांशुरवटे प्रसवं वदेत् ॥

Also स्कन्दहोरा

उदयेन्द्वोर्व्ययस्थाने मन्दः पापनिरीक्षितः ।
प्रसवं बन्धनागारे स्पष्टं वदति योषितः ॥

Also शौनकहोरा

लग्नस्थेन्दोर्व्ययस्थाने सौरः सूर्येण वीक्षितः ।
भौमेन वा वदेन्नार्याः प्रसवं बन्धनालये ॥

Also सारावली

वृश्चिककुलीरलग्ने सौरे चन्द्रेक्षिते त्ववटे ।
भवति प्रसवः स्त्रीणां वदन्ति यवनाः सह मणित्थैः ॥

Also गुणाकर

गुप्त्यां सूतिर्लग्ननीहारभांशोरंशे मन्दे वीक्षिते पापखेटैः ।
गर्त्ते सा स्यात्कर्किकौप्योर्विलग्ने तस्थे मन्दे वीक्षिते शुभ्रभासा ॥

Sloká 64. The correct reading of the last quarter is 'प्रसवं सोषरभूमिषूद्दिशेत्'. In the translation, for a "gravelly ground", read "on a saltish ground or on a sandy place."

cf. सारावली

रविजे जलजविलग्ने क्रीडोद्याने बुधेक्षिते प्रसवः ।
रविणा देवागारे तथोषरे चैव चन्द्रेण ॥

In the yoga described in the sloka in the text, the aspecting as well as the aspected planets must be strong.

cf. स्कन्दहोरा

शनिर्जलभलग्नस्थो बुधेन यदि वीक्षितः ।
क्रीडानिलय आचष्टे देवागारे विवस्वता ॥
ऊषरे शशिना दृष्टो बलिना बलवानपि ।

Sloka 65. cf. सारावली

आरण्यभवनलग्ने गिरिवनदुर्गे तथा रवौ लग्ने ।
रुधिरेक्षिते श्मशाने शिल्पकनिलयेषु सौम्येन ॥
सूर्येक्षिते गोनृपदेववासे शुक्रेन्दुजाभ्यां रमणीयदेशे ।
शक्रेड्यदृष्टे द्विजवह्निहोत्रे नरोदये सम्प्रवदन्ति सूतिम् ॥

Also समुद्रजातक

पुंलग्नगं यमं पश्येदर्कादिश्चैत्यगोकुले ।
चरे श्मशाने शिल्पीयगृहे वह्निगृहे वरे ॥

Sloka 66. cf. स्कन्दहोरा

अथवा लग्नतोंशाद्वा समाने सूतिराश्रये ।
चरस्थिराभ्यां तत्रापि वर्त्मावसथनिर्णयः ॥
असदेवोभयाकारमिहर्क्षमवधारय ।
यथार्हमभितो योगादन्यत्रोभयभागयोः ॥
तत्स्वामिना वा भेनोक्तं तद्गतेन ग्रहेण वा ।
भांशाधिपेन वा ब्रूयाद्भस्य द्रष्ट्रा ग्रहेण वा ॥
एषामभावे केन्द्रस्थखचरेण वदेत्फलम् ।

Also बृहत्प्राजापत्य

चरे स्थिरे वा द्व्यङ्गे वा लग्ने स्वर्क्षांशकस्थिते ॥
तत्स्वामिन्यथवा तत्स्थे स्वर्क्षगे स्वांशगेऽपि वा ।
जननं स्वगृहे वाच्यमुच्चेंशे राजमन्दिरे ।
बन्धुक्षेत्रगृहेबन्धोरूह्यमन्यद्दिशाऽनया ॥
पूर्वोऽत्र सर्वथा ग्राह्याः सोच्चादेस्थिरशेषता ।
इमं विभागमस्मृत्वा प्रयुञ्जानोऽपराध्यति ॥

For the last quarter of the sloka *cf.* स्कन्दहोरा

राश्यंशबलयोर्भेदे ग्रहांशफलयोस्तथा ।
बलयोगात्सलोकाच्च बाधकत्वं बलेऽधिके ॥

Also **बृहत्प्राजापत्य**

बलयुक्त्यैव वक्तव्यं बहुधा फलसंभवे ।
वलाधिकायाद्बाधन्ते बलहीनानियं हि सा ॥

Sloka 67. *cf* सारावली

कुजसौरयोस्त्रिकोणे चन्द्रेऽस्तगते वियुज्यते मात्रा ।
दृष्टे सुरेन्द्रगुरुणा सुखान्वितो दीर्घजीवी च ॥

Also **समुद्रजातक**

एकस्थार्क्यारयोः कोणेऽस्ते चन्द्रे विसृज्यतेऽम्बया ॥

चन्द्रेऽर्के is another reading for **चन्द्रेऽस्ते** and seems to be the correct one. In retaining the reading as given in the text, the translation should be " when eclipsed Moon (**अस्ते चन्द्रे=अस्तंगते चन्द्रे**) occupies the 5th or the 9th place in respect to Mars and Saturn &c." while, according to the corrected reading, the meaning will be "If the Moon or the Sun be in the 5th or the 9th place from Mars and Saturn occupying one and the same house" etc.

cf. **स्कन्दहोरा**

आरसूर्यजयोर्मूढे जातश्चन्द्रे त्रिकोणगे ।
सूर्ये वा त्यज्यते मात्रा सद्य एव विधेर्बलात् ॥

The sloka quoted above distinctly says that the Moon should be **मूढ** *i.e.*, eclipsed by the rays of the Sun and so the words **अस्तगते** and **अस्ते** in the quotations from Saravali and Samudrajataka do not mean " the 7th house " but mean "eclipsed.''

For alleviating the effects of the yoga described in the text, Jupiter must be strong:

cf. **स्कन्दहोरा.**

बलिना गुरुणा दृष्टे शशाङ्के तस्य कर्तरि ।
सूर्ये वा सोऽपि दीर्घायुः स्यात्सुखेन च संयुतः ॥

Sloka 68. *cf.* सारावली

म्रियते पापैर्दृष्टे शशिनि विलग्ने कुजेऽस्तगे त्यक्तः ।
लग्नात्स्वलाभगतयोर्वसुधासुतमन्दयोरेवम् ॥

पश्यति सौम्यो बलवान्यादृग्गृह्णाति तादृशो जातः ।
शुभपापग्रहदृष्टे परैर्गृहीतोऽपि स म्रियते ॥
सर्वेष्वेतेषु यदा योगेषु शशी सुरेज्यसंदृष्टः ।
भवति तदा दीर्घायुर्हस्तगतसर्ववर्णेषु ॥

Balabhadra adds पूर्वोक्तयोगद्वये चन्द्रे सबले शुभग्रहदृष्टे तादृग्ब्राह्मणादिवर्णो मात्रा त्यक्तं बालं गृह्णाति । उक्तं च भौमजातके

मातृसंत्यक्तयोगेषु चन्द्रं पश्यति ये शुभाः ।
ग्रहवर्णसमो बालं गृह्णाति नियतं नरः ॥
शुभपापदृष्टे चन्द्रे परहस्तगोऽपि बालो म्रियते इति ॥

Also वृहत्प्राजापत्य

शुभदृष्टे निशानाथे लग्नस्थेऽस्तगते कुजे ।
तस्माच्च गतयोरायं यद्वा मन्दारयोर्द्वयोः ॥
तथा स्थिते निशानाथे जातो मात्रा विसृज्यते ।
यादृशोऽस्य शुभोदृष्टस्तादृशस्य करं गतः ॥
स्याज्जीवेच्चाथ पापेन वीक्षितेऽत्र तथा स्थिते ।
आरस्यारार्कसुतयोरपि वा तादृशास्थितौ ॥

Sloka 69. cf. सारावली

भवनांशसदृशदेशे प्रसवो ज्ञेयः सदाऽत्र युवतीनाम् ।
मिश्रगृहांशे वर्त्मनि चरराश्यंशे तथाऽन्यगृहे ॥
स्वगृहनवांशे लग्ने स्वगृहेऽन्यस्मिन्प्रतिद्वन्द्वे ।
पितृमातृग्रहबलतस्तत्स्वजनगृहेषु बलयोगात् ॥
प्राकारतरुनदीषु च सूतिर्नीचाश्रितैः सौम्यैः ।
नेक्षन्ते लग्नेन्दू यद्येकस्था ग्रहा महाटव्याम् ॥

Also गुणाकर

मातुः पितुर्वा भवने प्रसूतिःस्याद्वीर्ययोगादिह तद्ग्रहाणाम् ।
कल्लोलिनीशालमहीरुजेषु नीचाश्रितैः साधुखगैः प्रदिष्टा ॥
एकर्क्षगैर्लग्नविधू न दृष्टौ यदा तदा स्याद्विजने प्रसूतिः ॥

Also शौनकहोरा

पित्रादिषु बलिष्ठेषु सूतिः पितृगृहादिषु ।
तरुमूलादिषु ज्ञेया नीचस्थैश्च शुभैस्त्रिभिः ॥

Also **स्कन्दहोरा**

सर्वथा लग्नमिन्दुं च न कश्चिदपि पश्यति ।
तदा वै प्रसवं जातं विजने निर्दिशेत्पदे ॥

And **बृहत्प्राजापत्य**

न कश्चिदपि यं चष्टे प्रकारेणापि केनचित् ।
शुभोऽशुभो वा पूर्णं वा विकलं चोदयं च तम् ॥
चन्द्रं च यदि जानीयाज्जन्मलक्षणचिन्तने ।
आचक्ष्व विजने सूतिं तदा नारद निश्चयात् ॥

Sloka 70. In this sloka **अब्जगे** should be taken to mean **अब्जांशगे**; for Varahamihira says: **बलयोगात्फलमंशकर्क्षयोः** *Vide* sloka 66 *supra.* Also *cf.* **स्कन्दहोरा**

सौरांशकिनि सौरेण दृष्टे सौरेण वा युते ।
जलांशकिनि वा चन्द्रे वेश्मस्थे प्रसवो यदि ॥
तदा शयनमाख्येयमन्धकारे न संशयः ।
इन्दुः सूर्येण दृष्टश्चेत्तेजस्येव तदादिशेत् ॥
चन्द्रात्स्मरगतैः पापैर्मातुः क्लेशाम्बुगैरुत ।
अथेमं केचिदिच्छन्ति पापैश्चन्द्रमसा युतैः ॥

And **बृहत्प्राजापत्य**

सौरांशकस्थः सौरेण दृष्टः सौरयुतोऽपि वा
जलराशौ जलांशे वा यदीन्दुर्वेश्मनि स्थितः ॥
तदा शयनमाचक्ष्व तस्यास्तमसि नारद ।
स इन्दुः सूर्यदृष्टश्चेत्तेजस्येव तदादिश ।
चन्द्रात्सप्तमगैः पापैर्मातुः क्लेशमुदीरय ॥
एतौ द्वौ बलिनौ योगौ चन्द्रयुक्तस्तु दुर्बलः ।
त्रिभिर्धरण्यां नीचस्थैः खेटैर्लग्नस्थितेन वा ॥
नीचेन शशिना भूमौ यद्वा हिबुकमीयुषा ॥

Also **गुणाकर**

पापैः शशाङ्कात्स्मरबन्धुयातैः क्लेशाय नूनं कथिता जनन्याः ॥
शन्यंशके शशिनि वारिचरांशके वा पातालगे रविभुवा सहिते च दृष्टे ।
सूतिस्तदा तमसि सौख्यकरा खबन्ध्वोः सौम्यैः खलैरथ शुभास्तसुतेषु कष्टा ॥

Also सारावली

सौरांशेऽथजलांशे चन्द्रेऽर्कजसंयुतेऽथवा हिबुके ।
तद्दृष्टे वा कुर्यात्तमसि प्रसवं न सन्देहः ॥
क्लेशो मातुः क्रूरैर्बन्धुवस्तगतैः शशाङ्कयुक्तैर्वा ।
चन्द्रात्सप्तमराशौ पापा मरणाय वक्रसंदृष्टाः ॥

In the translation read "when the Moon in the 4th भाव is in a Navamsa" etc and omit "or in the 4th भाव from the Lagna"

Sloka 71. Balabhadra quotes the following more detailed information from Garga:

अथार्कलग्नद्वादशांशवशेन दीपज्ञानमुक्तं गर्गेण ।

लग्नस्य प्रथभे भागे सूर्ये प्राच्यां प्रदीपकः ।
द्वादशैकादशे प्रोक्तो दीपाभावः स्वयंभुवा ॥

अन्यच्च तत्रैव ।

चरलग्ने करे दीपः स्थिरे तत्रैव संस्थितः ।
द्विःस्वभावे तथा लग्ने करेण परिचालितः ॥
द्रेष्काणे प्रथमे चन्द्रे दीपः पूर्णे द्वितीयके ।
अर्धपूर्णे हि तैलेन तैलहीनस्तृतीयके ॥

चन्द्रस्य पूर्णत्वे दीपपूर्णत्वं क्षीणत्वे तैलक्षयत्वं उक्तं तत्र यद्युक्तिसहायतोऽमावास्यायां सर्वस्यान्धकारे जन्मसंभवः स्यात् ।

लग्नभुक्तानुमानेन दृग्धवर्तिर्विनिर्दिशेत् ।
तनुस्थानगतश्चन्द्रोऽप्यष्टमस्थो यदा भवेत् ॥
बालस्य जन्मसमये दीपस्य परिपूर्णता ।

वर्तिपूर्णस्तु लग्नराशिवर्णसदृश एव वाच्यः । लग्नस्य योऽत्र वर्णो निर्दिष्टस्तेन वर्त्तिरादिशेदिति मणित्थोक्तेः । सारावल्याम्

द्वादशभागच्छन्ने वासगृहेऽवस्थिते सहस्रांशौ ।
दीपश्चरस्थिरादिषु तथैव वाच्यः प्रसवकाले ॥
यावल्लग्नादुदितं वर्त्तिर्दग्धा तु तावती भवति ।
दीपः पूर्णे पूर्णः शशिनि क्षीणे क्षयस्तु तैलस्य ॥
बलवति सूर्ये दृष्टे बहुप्रदीपान्वदेत्कुपुत्रेण ।
अन्यैरपि गतवीर्यैः सूतौ ज्योतिस्तृणैर्भवति ॥

Sloka 72. cf. सारावली

चित्रं नवं भृगुसुते च दृढं गुरौ च दग्धं कुजे दिनकरे परिपूर्णकाष्ठम् ।
चन्द्रे नवं च बहुशिल्पिकृतं बुधे च जीर्णं भवेद्गृहमिहोष्णकरात्मजे च ॥

Also बृहत्प्राजापत्य

सर्वेभ्योऽपि बलिष्ठेऽर्के काष्ठाल्पमदृढं च तत् ।
आचक्ष्व गृहमिन्दौ तु नवं भौमेऽग्निशोषितम् ॥
बहुभिः शिल्पिभिः सौम्ये रचितं चादृढं वद ।
जीवे दृढं भृगोः पुत्रे रम्यमालेख्ययोजितम् ॥
नवं च नारदाख्या हि शनौ जीर्णं च संस्कृतम् ।
सूतिकाभवनस्येत्थं स्वरूपमवधारय ॥
तदेव स्थिरचक्रं च कल्पयित्वास्थ तद्गतैः ।
यथाभागं ग्रहैस्तैश्च समन्तान्मन्दिरं वद ॥
देवालयादीन्यन्यानि ग्रहावस्थानुरोधतः ।
आख्येयानि समन्ताद्वा तान्यमून्युभयानि वा ॥

And यवन

सूर्येण चित्रं बहुगैरिकाद्यैः प्रभासमेतं बहुभूमिकं च ।
एकत्र रम्यं त्वपरत्र शीर्णं पापेक्षिते वा तपनस्वभावम् ॥
गृहं शशाङ्केन सुदारुसंभवं मनोज्ञरूपं विबुधान्वितं च ।
सत्सूत्रयुक्तं मणिकुट्टिमान्वितं षड्वर्गशुद्धेन च तुङ्गगेन ॥
भौमेन दग्धं स्वनवांशकस्थे परांशकस्थे शिथिलस्वभावम् ।
क्रूरैस्तु युक्ते यदि पापदृष्टे सौम्येक्षिते वा धनधान्ययुक्तम् ॥
बुधेन चोक्तं बहुवंशयुक्तं पट्टावृतं भूरि धनाढ्यमेव ।
शुचिप्रगल्भैः पुरुषैः समेतं विचित्ररूपं प्रभया समेतम् ॥
जीवेन नानाविधरत्नयुक्तं सुभूरिशालं बहुमण्डलाद्यम् ।
वितानतूलध्वजवस्त्रसंघैः प्रमण्डितं धातुरसैर्विशालैः ॥
स्वभावरम्यं सुविदग्धलोकं मनोरमं स्फाटिककाञ्चनाढ्यम् ।
समं विशालं सुविभक्तमार्गं विचित्ररूपं प्रवदन्ति शुक्रे ॥
जीर्णं कुचेलैर्मनुजैः प्रयुक्तं रक्तान्वितं भानुसुते किलाथ ।
भवेद्गृहं कण्टकसंप्रयुक्तं रौद्रं करालं विकृतं बलाढ्यम् ॥
अंशाधिनाथे स्वनवांशसंस्थे मित्रांशगे सौम्यखगेंशके वा ।
परांशकस्थे त्वतिशीर्णमुक्तं मिश्रांशके मिश्रमिति ब्रुवन्ति ॥

Sloka 73. *cf.* गुणाकर

क्रियकुलीरतुलालिघटैर्भवेन्मृगमृगेश्वरयोर्वृषभेण वा ।
झषधनुःप्रमदामिथुनाभिधैरमरनाथककुप्क्रमतः स्थितिः ॥

Also बृहत्प्राजापत्य

मेषकर्कटकौ तौलिवृश्चिकौ कलशाह्वयः ।
प्राग्भागसूचकाः पञ्च राशयः प्रसवे मताः ॥
वीणा कन्या धनुश्चेत्थ उत्तरं सूचयन्त्यमी ।
वृषः पश्चिममाचष्टे मृगसिंहौ तु दक्षिणम् ॥
अथैतेषां लग्नभावेन सह मेषादिदर्शनम् ।
तद्ध्वनिश्रवणं यद्वा तद्वाचकपदश्रुति ॥
प्रतिमादर्शनं वैषां संभवेद्यति वै तदा ।
तत्र तत्र दृढं तावत् प्रसवं ब्रूहि नारद ॥
अथ नो लग्नभावेन केवलेन तथा क्वचित् ।

Also शौनक

अथैषां लग्नभावेन लग्नांशकतयाऽपि वा ॥
मेषादिदर्शनध्वानतच्छब्दश्रवणे पुनः ॥

Sloka 74. *cf.* सारावली

प्राच्यादिगृहद्वितयं भद्वितयं राशयश्च गात्राणि ।
आजानुशिरःशयनं ग्रहतुल्यं लक्षणं तत्र ॥
ग्रहयुक्तं वा नियतं विनतत्वं च द्विमूर्तिराशिषु च ।
षट्त्रिनवान्त्याः पादाः पर्यङ्केऽङ्गानि राशयः शेषाः ॥

Sloka 75. *cf.* सारावली

शशिलग्नविवरयुक्तग्रहतुल्याः सूतिका ज्ञेयाः ॥
अनुदितचक्रार्द्धयुतैरन्तर्बहिरन्यथा वदन्त्येके ।
लक्षणरूपविभूषणयोगस्तासां शुभैर्योगात् ॥
क्रूरैर्विरूपदेहा लक्षणहीनाः सुरौद्रमलिनाश्च ।
मिश्रैर्मध्यमरूपा बलसहितैः सर्वमेवमवधार्यम् ॥

Also लघुजातक

शशिलग्नान्तरसंस्था ग्रहतुल्याः सूतिकाश्च वक्तव्याः ।
उदगर्द्धेऽभ्यन्तरगा बाह्याश्चक्रस्य दृश्येऽर्द्धे ॥

And **सूर्य**

चन्द्रलग्नान्तरस्थैर्हि ग्रहैर्वाच्याश्च योषितः ।
मध्ये षट्के मध्यगास्ता बाह्ये षट्के च बाह्यगाः ॥

For visible and invisible portions of the zodiac at any time, **शौनक** says

भागो लग्नोदितो रि:फे आयः कर्म तपो मृतिः ।
द्यूने लग्नेष्यतुल्योंश इति दृश्यार्द्धमुच्यते ॥

The text gives the generally accepted rule for ascertaining the actual number of persons present at the time of confinement. Some authorities view it otherwise, *viz.*, that the number of persons within the lying-in-chamber should be guessed by the number of planets in the visible hemisphere, while the number without should be reckoned by the number of planets in the invisible portion of the zodiac. *Cf.* **गीतिहोरा.**

उदयेन्दुमध्यवर्त्तिग्रहतुल्याश्चोपसूतिका वाच्याः ।
दृश्येऽर्द्धेऽभ्यन्तरगा बाह्यास्ताश्च ग्रहैरदृश्येऽर्द्धे ॥

Also **जीवशर्मा**

उदयशशिमध्यस्थैर्ग्रहैः स्युरुपसूतिकास्तत्र ।
उदगर्द्धस्थैर्बाह्ये दक्षिणगैरन्तरे ज्ञेयाः ॥

This view is not accepted by Varahamihira and that is why he said **परेऽन्यथा** in the sloka in the text.

But when the Lagna and the Moon are in one and the same Rasi, the number will be as stated in **चन्द्रिका**, *viz.*

योषितो लग्नगे चन्द्रे तिस्रः स्युः सूतिकोद्भवाः

Balabhadra adds in his Horaratna

लग्ने तदीशपार्श्वे वा यावन्तः स्युः खयामिनः ।
धनस्था व्ययगा ये च तावतीः सूतिका वदेत् ॥ इति
गृहस्थेऽपि त्रिसूतिकायोगयोर्विशेषः ज्ञानप्रकाशे
तुर्ये दृष्ट्वा सूतिकाः खेटतुल्याः खेशे खस्थे तत्पिता तद्गृहेऽस्ति इति
अत्रायुर्दायोक्तविधिना द्वित्रिगुणत्वं विज्ञेयम्। चन्द्रलग्नयोर्मध्ये ग्रहाभावे एते योगाः विचार्याः ॥ जन्मलग्नवशादुपसूतिकाज्ञानमुक्तं ग्रन्थान्तरे ।

मीने मेषे भवेदेका चत्वारि वृषकुंभयोः ।
संख्याश्च सप्तबाणाश्च धनुःकर्कटयोरपि ॥
अन्ये लग्ने भवेत् त्रीणि सूतिकायाः प्रमाणकम् ।

राजादिगृहे बहुस्त्रीसंभवे लग्नवशेन उपसूतिकाज्ञानम् ।

खनन्दा (90) मेषतुलयोस्त्रिनन्दा (93) वृषकन्ययोः ।
सप्तनागा (87) त्रिनन्दाश्च (93) प्रोक्ता मिथुनसिंहयोः ॥
नन्दाङ्काः (99) कर्कमृगयोर्विज्ञेयाः सूतिकाः स्त्रियः ।
बहुस्त्रीसंभवे वाच्या नृपादीनां गृहे बुधैः ॥ इति.

अत्र विशेषो जातकोत्तमे ।

युग्मायुग्मविलग्नस्य वशात्प्रसवकारिणी ।
विधवा सधवा ज्ञेयाः क्रमात् खलु विचक्षणैः ॥
लग्नादष्टमगः पापः पापादष्टमगः शशी ।
उपसूती भवेद्रण्डा रण्डा चैवोपसूतिका ॥
पञ्चमे सूर्यपुत्रश्च शशिशुक्रौ च कर्मगौ ।
तत्रैका कन्यका ज्ञेया शिशोर्जन्मनि निश्चितम् ॥
चतुर्थस्थानगश्चन्द्रश्चतुर्थस्थानगो बुधः ।
तत्काले जातबालस्तु छिक्कां प्रकुरुते सदा ॥
एकः पापो यदा लग्ने पापश्चैव रसातले ।
ज्ञेयो नालाङ्कितो बालो लशुनेनाङ्कितोऽपि वा ॥
इन्दुपुत्रे धनस्थे च द्वादशे च निशापतौ ।
सूर्यपुत्रे च लग्ने च जातो बालः षडङ्गुलः ॥
नवमे भूमिपुत्राच्च योगे जीवेन्दुपुत्रयोः ।
केन्द्रस्थाने यदा सूर्यो जातो बालः षडङ्गुलः ॥

Sloka 76. *cf.* सारावली

लग्ननवभागतुल्या मूर्तिर्बलसंयुताद्ग्रहाद्वाऽपि ।
नवभागाद्वर्णोक्तिः शशियोगात्तत्र सूतस्य ॥

Sloka 79. Other combinations which cause moles or other marks on the person are extracted and appended below.

जातकमुक्तावल्याम्

लग्नात्सप्तमगो भौमः शुक्रो वाऽपि बृहस्पतिः ।
चिन्हं मूर्ध्नि स्थितं ज्ञेयं जातकस्य न संशयः ॥

यदा शुक्रोऽथवा भौमो लग्नस्थोऽपि निशाकरः ।
द्वादशाब्दे भवेत्तस्य मस्तके वन्हिदर्शनम् ॥

अष्टमेऽपि यदा राहौ शुक्रो वाऽपि तनुस्थितः ।
वामकर्णे भवेत्तस्य चिन्हं लग्नाद्विनिश्चितम् ॥

जायास्थाने यदा राहुर्मन्त्री वाऽपि तनुस्थितः ।
वामे भुजे भवेच्चिन्हं लग्नाच्चैव यथाक्रमम् ॥

द्वादशाष्टमगः शुक्रो मन्त्री च तनुसंस्थितः ।
बाह्वोश्चिन्हं विजानीयाज्जन्मलग्नाद्विचक्षणः ॥
त्रिषडायगते भौमे शुक्रो वाऽपि व्यवस्थितः ।
वामपार्श्वे भवेच्चिन्हं भुजदेशसमीपतः ॥
बुधे मन्दे भवेल्लग्नं कर्मगे वा दिवाकरे ।
दक्षिणे पार्श्वके तस्य चिन्हं ज्ञेयं परिस्फुटम् ॥
कुजे सौम्येऽथवा लग्ने राहुः षष्ठत्रिकोणगः ।
लिङ्गे गुदे भवेच्चिन्हं तिलमाषादिकं स्फुटम् ॥
त्रिकोणेऽपि भवेच्छुक्रो जीवे सौम्ये मृतिस्थिते ।
पाताले हिबुके मन्दे कुक्षौ चिन्हं समादिशेत् ॥
धनस्थाने यदा शुक्रे त्वष्टमेऽपि दिवाकरे !
कर्मगौ राहुमन्दौ चेन्नाभौ चिन्हं समादिशेत् ॥
कर्मगोऽपि यदा मन्त्री द्वितीयेऽपि निशाकरः ।
सहजे शुक्रराहुभ्यां कट्यां चिन्हं समादिशेत् ॥
व्ययस्थाने यदा मन्त्री बुधोऽपि त्रिषडायगः ।
सहजस्थो यदा शुक्रो हृदि चिन्हं समादिशेत् ॥
सहजस्थो यदा शुक्रो मन्त्री वाऽपि षडायगः ।
धर्मस्थाने निशानाथे गुदे गोलकमादिशेत् ॥
पाताले शुक्रराहुभ्यां कुजे मन्दे तनुस्थिते ।
गुल्फयोः पादबाहुभ्यां मत्स्यचिन्हं समादिशेत् ॥

Also भावकुतूहल

जनुषि लग्नगतो वसुधासुतो दमनगोऽपि गुरुः कविरेव वा ।
भवति तस्य शिरोव्रणलाञ्छितं निगदितं यवनेन महात्मना ॥
भवति लग्नगते क्षितिनन्दने भृगुसुतेऽपि विधाविह जन्मनाम् ।
शिरसि चिन्हमुदाहृतमादिभिर्मुनिवरैर्द्विरसाब्दसमासतः ॥

भार्गवे जनुरङ्गस्थे चाष्टमे सिंहिकासुते ।
मस्तके वामकर्णे वा चिन्हदर्शनमादिशेत् ॥
मदनसदनमध्ये सिंहिकानन्दने वा सुरपतिगुरुणा चेदङ्कराशौ युते नुः ।
प्रकथितमिह चिन्हं चाष्टमे पापखेटे कविरपि गुरुरङ्गे वामबाहौ मुनीन्द्रैः ॥
लाभारिसहजे भौमे व्यये वा शुक्रसंयुते ।
वामपार्श्वे गतं चिन्हं विज्ञेयं व्रणजं बुधैः ॥
लग्ने क्षितिसुते मन्दे शुक्रदृष्टे त्रिकोणभे ।
लिङ्गे गुदसमीपे वा तिलकं संदिशेद्बुधः ॥
सुतालये भाग्यनिकेतने वा कविर्यदा चाष्टमगौ ज्ञजीवौ ।
शनौ चतुर्थे तनुभावगे वा तदा सचिन्हं जठरं नरस्य ॥
धने कवावष्टमलग्नभे वा दिवाकरे मन्दकुजौ तृतीये ।
कटिप्रदेशे प्रवदेन्नराणां चिन्हं विशेषादिह जातकज्ञः ॥
पातालस्थौ राहुशुक्रौ लग्ने मन्दः कुजोऽपि वा ।
पादमूलेऽथवा पादे वामे चिन्हं विनिर्दिशेत् ॥
व्यये गुरौ विधौ भाग्ये लाभारिसहजे बुधे ।
गोलकं गुदमध्यस्थं व्रणं वा प्रवदेद्बुधः ॥

Adhyaya IV.

Slokas 1–3. Mantreswara in whose work (**फलदीपिका**) also these three slokas appear *verbatim* suggests in the following sloka the methods to be adopted for palliating the evil effects described.

तद्दोषशान्त्यै प्रतिजन्मतारमाद्वादशाब्दं जपहोमपूर्वम् ।
आयुष्करं कर्म विधाय तातो बालं चिकित्सादिभिरेव रक्षेत् ॥

Regarding the three divisions of Ayus mentioned in Sloka 3. he adds

नरोऽल्पायुर्योगे प्रथमभगणे नश्यति शने-
र्द्वितीये मध्यायुर्यदि भवति दीर्घायुषि सति ।
तृतीये निर्याणं स्फुटजशनिगुर्वर्कहिमगून्
दशां भुक्तिं कष्टामपि वदति निश्चित्य सुमतिः ॥

Vide also the following from **प्रश्नमार्ग**

परागपर्ययेष्वार्कैरल्पमध्यचिरायुषाम् ।
मरणं निर्दिशेन्नृणां चतुर्थेऽप्यमितायुषाम् ॥

Sloka 4. cf. **कश्यपः**

षष्ठाष्टरिःफगश्चन्द्रः क्रूरैश्च सह वीक्षितः ।
जातस्य मृत्युदः सद्यस्त्वष्टवर्षैः शुभेक्षितः ॥

Sloka 5. The words **समृत्युभागे चन्द्रे** ought to be translated thus : " When the Moon happens to be in the **मृत्यु** or fateful portions of the several Rasis (*Vide Adhyaya* I, *sloka 57*, *supra*)".

cf. **फलदीपिका**

पापाप्तेक्षितराशिसन्धिजनने सद्यो विनाशं ध्रुवं
गण्डान्ते पितृमातृहा शिशुमृतिर्जीवेद्यदि क्ष्मापतिः ।
जातः सन्धिचतुष्टयेऽप्यशुभसंयुक्तेक्षिते स्यान्मृतिः
मृत्योर्भागगते च सा सति विधौ केन्द्रेऽष्टमे वा मृतिः ॥

Sloka 6. This is evidently taken from **वृद्धगर्गजातक**. The reading in that work is slightly different, *viz.*,

ताताम्बिकामातुलसोदरांश्च मातामहीमातृपितुश्च सूनुम् ।
सूर्यादिखेटाः खलु पञ्चमस्थाः निघ्नन्ति सर्वे क्रमशः प्रसूतौ ॥

Sloka 7. (First half) cf. **वृद्धगर्गजातक**

लग्नाच्चतुर्थगः पापो यदि स्याद्बलवत्तरः ।
तदा मातृवधं कुर्यात्तत्केन्द्रे ह्यपरो यदि ॥

(*Latter half.*)

For the same effect, i.e., **सोदरनाश**, the following sloka from **भावकुतूहल** will be found useful.

यदा पापखेचारिणो जन्मकाले धरानन्दनाक्रान्तभावात्सहोत्थे ।
तदैवाशु नाशं सहोत्थस्य धीरा मणित्थादयः प्राहुराचार्यमुख्याः ॥

Sloka 8. cf. **वृद्धगर्गजातक**

चन्द्रमा यदि पापानां त्रितयेन प्रदृश्यते ।
मातृनाशो भवेत्तस्य शुभदृष्टे शुभं वदेत् ॥

Sloka 10. cf. सारावली

क्रूरान्तस्थः सूर्यश्चन्द्रो वा युगपदेव मरणाय ।
सौम्यैरदृष्टमूर्तिर्युवतीनां गर्भसहितानाम् ॥

अत्र लग्नेन्दू पापान्तस्थौ ज्ञेयौ इति वराहः । तद्यथा

पापद्वयमध्यसंस्थितौ लग्नेन्दू न च सौम्यवीक्षितौ ।
युगपत्पृथगेव वा वदेन्नारीगर्भयुता विपद्यते ॥

Also गुणाकर

क्रूरान्तस्थौ युगपत्पृथग्वा विलग्नचन्द्रौ भवतो निषेके ।
शुभग्रहालोकनवर्जितौ चेत् तदा सगर्भैव विपद्यते स्त्री ॥

Sloka 13. मानस्थितैः शोभनदृष्टिमुक्तैः is another reading in the 2nd quarter of the sloka.

Sloka 16. cf. गुणाकर

मातुर्मृतिं दिनकरः सखलं विधोः खे
शुक्रात्करोति तनये शनिदृष्टयुक्तः ।
राशौ त्रिकोणगृहगो रविजः शशाङ्कात्
कुर्याद्भृगोस्तु कुसुतोऽह्नि खलेक्षितश्चेत् ॥

Also सारावली

चन्द्रात् त्रिकोणराशौ रविजो मातुर्वधं दिशति रात्रौ ।
शुक्रात्तथैव दिवसे भौमः पापेन संदृष्टः ॥

ग्रन्थान्तरे

निशि चन्द्रात् त्रिकोणस्थे मन्दे पापनिरिक्षिते ।
दिवा शुक्रात्तथा भौमे जननी म्रियते ध्रुवम् ॥

But according to Garga, if Mars and Saturn be in the 5th or the 9th house from Venus and unaspected by Jupiter and Venus, the child does not promote the well being of the father.

भौमसूर्यात्मजौ शुक्रात्सुतभे धर्मभेऽपि वा ।
नेक्षितौ गुरुशुक्राभ्यां नेक्षते पितरं शिशुः ॥

Sloka 17. This as well as the next sloka are from बृहज्जातक. In line 18 of the translation of this sloka, for the words " first month " read " Lagna " *cf.* सारावली

मासेष्वाधानादिषु गर्भस्य यथा क्रमेण जायन्ते ।
सप्तसु कलिलाण्डकशाखास्थित्वग्रोमचेतनताः ॥

मासेऽष्टमे च तृष्णा क्षुधा च नवमे तथोद्वेगः ।
दशमे त्वथ संपूर्णः पक्वमिव फलं पतति गर्भः ॥

शुक्रारजीवरविशशिसौरिबुधविलग्नपोडुपादित्याः ।
मासपतयः स्युरेतैर्गर्भस्य शुभाशुभं चिन्त्याः ॥

According to Yavanacharya, the lords of the first and second months are Mars and Venus respectively; for he says:

कुजास्फुजिज्जीवरवीन्दुसौरशशाङ्कलग्नेन्दुदिवाकराणाम् ।
मासाधिपत्यप्रभवो न चैषां जयो यथा तैर्ग्रहवद्ब्रुवन्ति ॥

Vasishta holds the former view, *cf.*

सितावनेयामरपूज्यसूर्यचन्द्रार्किसौम्योदयपेन्दुसूर्याः ।
मासाधिपाः स्युः क्रमशो दशैते निपीडितो नाशयति स्वमासि ॥

Balabhadra says with regard to the above two contradictory views " अत्रान्योन्यविरुद्धयोर्वृद्धयवनवसिष्ठयोरेकवाक्यता कथमर्हति । परंतु बहुसंमतत्वात् वसिष्ठोक्तपक्ष एव प्रमाणम् । तथा च गर्गः

कललं प्रथमे मासि तस्य मासाधिपो भृगुः ।
द्वितीये मासि भूसूनुर्गर्भपिंगाक्षबीजवत् ॥

गर्भाङ्कुरस्तृतीये स्यात्तस्य मासाधिपोऽङ्गिराः ।
मज्जास्थिसंभवो मासि चतुर्थे भास्करोऽधिपः ॥

पञ्चमे मासि सोमेशस्त्वचस्तत्रापि संभवः ।
सर्वाङ्गसंभवः षष्ठे तस्य मासाधिपः शनिः ॥
ज्ञानेन्द्रिययुतः पश्चात्सप्तमे त्वीश्वरो बुधः ।
आधानेशोऽष्टमे मासि क्षुत्तृष्णासंभवो भवेत् ॥
ऊर्द्धगो गर्भसंस्थश्च मासेशो नवमे शशी ।
प्रसूतिर्दशमे मासि मासेशो भास्करो मतः ॥
यस्य मासाधिपो रिक्तो नीचो वाऽस्तङ्गतोऽपि वा ।
तस्मिन्वाभक्षयं याति प्रसवोऽथ भविष्यति ॥

Sloka 18. In the fourth quarter of this sloka some books read **गुरूणा निरीक्षितः** for **रविणा निरीक्षितः** The commentator Bhattotpala does not accept this : for, he says **केचिद्गुरुणा निरीक्षितः इति पठन्ति तदयुक्तम् । यस्मात्सारावल्यामुक्तम् ॥**

होरेन्दुयुतैः सौम्यैस्त्रिकोणजायासुखाम्बरार्थस्थैः ।
पापैस्त्रिलाभयातैः सुखी च गर्भो निरीक्षितो रविणा ॥

This is also supported by the following sloka from **गुणाकर**

लग्नेन्दुभ्यां वित्तकेन्द्रत्रिकोणे प्राप्तैः सौम्यैस्त्र्याययातैश्च पापैः ।
गर्भः सौख्येनान्वितः स्यात्तदानीं वीर्योपेतस्योष्णरश्मेश्च दृष्ट्या ॥

But the other reading is supported by the following works.

cf. **स्कन्दहोरा**

समीयिवद्भिरेणाङ्कं लग्नं वा विहगैः शुभैः ।
पापैरायतृतीयस्थैस्तत्सप्तमगते गुरौ ॥
अथवा सुतभाग्यर्क्षकर्मार्थमदनास्थितैः ।
सौम्यैः प्राग्वत् स्थितैः पुष्टिं तथा गर्भस्य निर्दिशेत् ॥

Also **बृहत्प्राजापत्य**

अक्षीण इन्दौ तेनैव युतयोर्बुधशुक्रयोः ।
लग्नेऽथवेन्दुनानेन ताभ्यामपि समन्विते ॥
पापाधिष्ठितयोर्भ्रातृलाभयोश्च तयोर्मदे ।
तस्थिवानथवा सौम्यैस्तत्त्रिकोणार्थबन्धुषु ॥
अधिष्ठितेष्वथाज्ञायां तयोर्वा सप्तमे गृहे ।
पापेष्वायतृतीयस्थेष्वाभ्यां मदमधीयिवान् ॥
जीवस्तत्राहितं गर्भं संपुष्णीयादनुक्रमात् ॥

In the light of the above quotations, **गुरुणा निरीक्षितः** would appear to be the original and correct reading : and **रविणा निरीक्षितः** must be an interpolation in Varahamihira's work and must have been followed by later authors like **कल्याणवर्मन्** and **गुणाकर**. Varahamihira has used **अशोभनैः–पापकैः** is another reading———which means more than two malefics, *i.e.*, three or more. Rahu and Ketu are not reckoned as forming part of the malefics in this yoga, for, at the end of the **निषेकाध्याय,** Skanda has said.

एते सप्तसुविश्रान्ता योगाः सर्वे मयोदिताः ।
तेनात्र नेतरापेक्षः कश्चिदित्यवधारय ॥

The three malefics can therefore be none other than the Sun, Mars and Saturn.

Sloka 20. for the latter half, *cf.* शुकजातक

सूर्यमन्दौ चरर्क्षस्थौ भौमेन युतवीक्षितौ ।
परदेशेऽपि वा तस्य मृतो वाच्यो विनिश्चयात् ॥

Also सारावली

चरराशिगतं सौरं यद्यर्को रात्रिजन्मनीक्षेत ।
अत्रापि विदेशस्थं कथयति पितरं प्रसूतस्य ॥
रुधिरसहितस्तु सौरश्चरभवने रात्रिजन्मनिरतस्य ।
कथयति पितरमतीतं परदेशे नात्र संदेहः ॥

Sloka 21. *cf.* सारावली

क्षीणे शशिनि विलग्ने पापैः केन्द्रेषु मृत्युसंस्थैर्वा ।
भवति विपत्तिरवश्यं यवनाधिपतेर्मतं चैतत् ॥
क्षीणे शशिनि विलग्ने कण्टकनिधनाश्रितैस्तथा पापैः ।
सौम्यादृष्टे मृत्युः सद्यः सत्यस्य निर्देशः ॥
सौम्याः षष्ठाष्टमगाः पापैर्वक्रोपसङ्गतैर्दृष्टाः ।
मासेन मृत्युदास्ते यदि न शुभैस्तत्र संदृष्टाः ॥

Also यवनजातक

सप्तमस्थो भूमिपुत्रो लग्ने भवति चन्द्रमाः ।
आत्मानं पितरं हन्ति मातरं च न संशयः ॥
सप्तमे च यदा राहुर्मूर्त्तौ भवति चन्द्रमाः ।
वर्षे चतुर्थे मरणं जातस्य च न संशयः ॥
अष्टमे द्वादशे जीवः लग्ने भवति चन्द्रमाः ।
अष्टमे मङ्गलश्चैव स याति यममन्दिरम् ॥

Sloka 26. From the following quotation from **शुकजातक** it will be seen that the translation of the sloka in the text requires slight modification.

विलग्नाधिपतौ नीचे निधने चार्कजो भवेत् ।
कृच्छ्रेण जीवितं विद्याद्व्रणप्रायो विनश्यति ॥

Sloka 27. cf. शुकजातक

आपोक्लिमे स्थिताः सर्वे ग्रहा बलविवर्जिताः ।
षण्मासं वा द्विमासं वा तस्यायुः समुदाहृतम् ॥

Sloka 28. This sloka appears to have been taken from सारावली. In that work the first half reads thus:

व्ययाष्टषष्ठोदयगे शशाङ्के पापेन युक्ते शुभदृष्टिहीने ।

Vide also sloka 34 *infra.*

Sloka 31. cf. सारावली

भौमदिवाकरसौराश्छिद्रे जातस्य भौमगृहे ।
म्रियतेऽवश्यं स नरो यमकृतरक्षोऽपि मासेन ॥
केतुर्यस्मिनृक्षेऽभ्युदितस्तस्मिन् प्रसूयते यो हि ।
मासद्वयेन मरणं विनिर्दिशेत्तस्य जातस्य ॥

Sloka 32. This and the next seven slokas are taken from बृहज्जातक. *cf.* स्कन्दहोरा

यदा लग्नगतः पापस्तथैवास्तगतोऽपरः ।
क्रूरयुक्तश्च चन्द्रश्चेच्छुभदृष्ट्या च वर्जितः ॥
तदा जातस्य सद्यः स्यान्मरणं नान्यथा भवेत् ।

Sloka 33. cf. सारावली

होरानिधनास्तगतैः पापैः क्षीणे व्ययस्थिते चन्द्रे ।
जातस्य भवेन्मरणं सद्यः केन्द्रेषु चेदशुभाः ॥

Also गार्गिः

क्षीणे चन्द्रे व्ययगतैः पापैरष्टमलग्नगैः ।
केन्द्रे बाह्यगतैः सौम्यैर्जातस्य निधनं भवेत् ॥

Sloka 34. क्रूरसंयुतः शशी is another reading. *Cf.* the sloka quoted from सारावली in the notes to *sloka 28, supra.*

Also स्कन्दहोरा

इन्दुः पापेन संयुक्तो मदरन्ध्रान्त्यलग्नगः ।
अकेन्द्रस्थेषु सौम्येषु तैरदृष्टश्च मृत्युदः ॥

Also **लघुप्राजापत्य**

लग्नद्यूनाष्टमान्त्येषु चन्द्रश्चेत्पापसंयुतः ।
शुभदृष्टिविहीनश्च केन्द्रादन्यगतैः शुभैः ॥
आचष्टे मरणं सद्यो जातस्येत्यवधारय ।

Also **शौनकहोरा**

चन्द्रमाः पापसंयुक्तो लग्नास्तनिधनान्त्यगः ।
अकेन्द्रस्थेषु सौम्येषु तदृष्टश्च मृत्युदः ॥

Sloka 35. The commentator (भट्टोत्पलः) says in connection with this sloka:

" अर्थादेव षष्ठाष्टमस्थे चन्द्रमसि न केनचिद्दृश्यमाने रिष्टयोगाभावः । चन्द्रमा यदि षष्ठाष्टमस्थः सौम्यक्षेत्रगतो भवत्यथवा पापक्षेत्रगतः सौम्ययुक्तो भवति तदा न मरणप्रदः । That is, if the Moon in the 6th or the 8th place be not aspected by any planet, the child will not die. Again, when the Moon in the 6th or the 8th भाव happens to be in the house owned by a benefic planet, or, being in a Rasi of a malefic planet, be at the same time in conjunction with benefic ones, then too, the child will not die. In support of the above, he quotes from यवनेश्वर the following sloka:

लग्नाच्छशी नैधनगोऽशुभर्क्षे षष्ठेऽथवा पापनिरीक्षितश्च ।
सर्वायुराहन्ति शुभैर्विमिश्रस्तदीक्षितोऽब्दाष्टकमर्द्धकं वा ॥

He also adds that the Moon in the 6th or the 8th house from the Lagna and aspected by planets whether benefic or malefic does not cause death to the native when the birth happens to be in the day time during the dark half of a month, or in the night time during the bright half of a month, and quotes in support of this a sloka from Mandavya's(माण्डव्य) work [The same appears in the text as sloka 75]. The commentator adds अत्रास्मिन्नेव षष्ठेऽष्टमे वा स्थाने शुभे सौम्यग्रहे स्थिते तस्मिंश्च वीर्ययुक्तैः पापैर्दृष्टे जातस्य मासं स्थितिः जीवितं वक्तव्यम् । ततो मरणमिति अत्र निर्दिष्टयोगस्थे चन्द्रमसि शुभदृष्टे रिष्टयोगाभावः । यस्मादनेनैव स्वल्पजातके उक्तम् ।

शशिवत्सौम्याः पापैर्वक्रिभिरवलोकिता न शुभदृष्टाः ।
मासेन मरणदाः स्युः पापजितो लग्नपश्चास्ते ॥

Cf. **गुणाकर**

निधनरिपुगृहस्थः पापदृष्टः शशाङ्को झटिति निधनकारी सौम्यदृष्टोऽष्टवर्षात् ।
अशुभशुभसमानालोकनेऽब्दैश्चतुर्भिर्भवति खलु विमिश्रैश्चानुपातो विधेयः ॥

Also **शौनकहोरा.**

क्षीणेन्दौ रिपुरन्ध्रस्थे सद्यः पापेक्षिते मृतिः ।
स्यात्प्रजातस्य बालस्य शुभदृष्टे समाष्टकम् ॥
जीवेत्समिश्रदृष्टेऽस्मिन् जातो वर्षचतुष्टयम् ।
अक्षीणेऽप्यरिरन्ध्रस्थ इन्दौ बलिभिरीक्षिते ।
पापैर्जातस्य बालस्य माससमायुः परं मुने ॥
तस्मिन्नेव विलग्नेशे पापेन विजिते युधि ।
सप्तमस्थे च जातस्य माससमायुरुदीरितम् ॥

Again, some take the words **अरि विनाश** to mean the 8th from the 6th house, *i.e.*, the Lagna, and **आशुपापेक्षिते** when aspected by the Sun (also called **आशुगामी** or **शीघ्रगामी**) and in support of the above quote the following from **शौनक**.

क्षीणेन्दौ लग्नसंस्थे वा दृष्टे खरगभस्तिना ।
सद्य एव प्रजातस्य मरणं नात्र संशयः ॥

The word **अथ** in the 2nd **पाद** of the text has been understood to mean "with the condition above given (in the first quarter of the sloka)"—*i.e.*, when the weak Moon in the Lagna is aspected by the Sun and further by **शुभैः**—*i.e.*, Mercury, Jupiter and Venus, then the child will live for 8 years.

cf. **शौनक**

तस्मिन् बुधादिभिः सौम्यैरखिलैरवलोकिते ।
आयुरब्दाष्टकं विद्धि जातस्य परमं मुने ॥

By **दलमतश्च मिश्रेक्षिते** is meant "when the weak Moon in the Lagna is aspected by the 3 benefics and also by the 3 malefics, the child will in this case live only for 4 years."

cf. **शौनक**

तस्मिन् सर्वैः शुभैः सर्वैः पापैरप्यवलोकिते ।
लग्नाश्रिते प्रजातस्य प्रायुर्वर्षचतुष्टयम् ॥

In the 3rd **पाद्** of the sloka in the text, if the **पदच्छेद** be made as **अबलिभिः** the meaning will be "when the full Moon in the Lagna (being benefic) is aspected by 3 weak malefics, the child will live only for one month. *cf.* **शौनक.**

अक्षीणेऽपि विलग्नस्थ इन्दौ बलविवर्जितैः ।
अशुभैरीक्षितेऽर्काद्यैस्त्रिभिर्मासमुदीरयेत् ॥

The 4th quarter may also be interpreted thus: "When the lord of the Lagna is defeated by a malefic planet in planetary war, and the benefic Moon occupies the 7th house being aspected by the 3 weak malefics, the maximum life of the child will be one month, *cf.* **शौनक.**

अक्षीणेऽस्तस्थिते चन्द्रे बलहीनैस्त्रिभिः खरैः ।
दृष्टे विलग्नाधिपतौ पापेन विजितेऽपि च ॥

For planetary war, see **श्रीपतिपद्धतिः** Adhyaya III slokas 16-17. and also the following from the commenatry.

विजितलक्षणम्

दक्षिणदिक्स्थः परुषो वेपथुरप्राप्य संनिवृत्तोऽणुः ।
अधिरूढो विकृतो निष्प्रभो विवर्णश्च यः स जितः ॥

भौमादीनामाकाशे युद्धं भवति यः दक्षिणाशास्थः स ग्रहः जितः । कुसुतादीनां युद्धमित्युक्तत्वाच्चन्द्रदीपिकायाम् । परुषो रूक्षः वेपथुः कम्पमानः अन्यगृहमप्राप्य सन्निवृत्तः विपरीतगतिमापन्नः अणुः सूक्ष्मः अधिरूढः अन्येन आक्रान्तः विकृतः विकारसहितः निष्प्रभो दीप्तिरहितः विवर्णः वर्णरहितः स जित इति ।

Sloka 36. *cf.* **गुणाकर**

ग्रस्तेन्दौ साशुभे लग्ने भौमे रन्ध्रे सहाम्बया ।
मृत्युः स्यादिन्दुवत्सूर्ये स्वशस्त्रोत्थो निगद्यते ॥
धर्ममृतिप्रतिभास्वशुभाख्यैर्वीर्ययुतैः शुभदृष्टिविहीने ।
लग्नकगे द्युमणावथ चन्द्रे स्यान्निधनाय तदा शिशुजन्म ॥

Also सर्वार्थचिन्तामणि

राहुग्रस्ते शीतरश्मौ विलग्ने क्रूरैर्युक्ते चाष्टमे भूमिपुत्रे ।
मात्रा सार्द्धं चन्द्रवद्भास्करेऽपि शस्त्रैः पातेनाशु मृत्युं प्रयाति ॥

The word अशुभ in अशुभसहिते ग्रस्ते चन्द्रे can mean only Saturn in the present instance and no other malefic planet. For an eclipse of the Moon can occur only on a full-moon day and the Sun will then be in the 7th place or in direct opposition. Consequently, Mercury will not be near the Moon.

The first half of the sloka is also capable of being translated thus: "When the Moon is eclipsed, irrespective of its position, and the Lagna is occupied by a malefic planet and Mars be in the 8th house, &c."

cf. सारावली

ग्रहणोपगते चन्द्रे सक्रूरे लग्नगे कुजेऽष्टमगे ।
मात्रा सार्द्धं म्रियते चन्द्रवदर्के च शस्त्रेण ॥
लग्ने चन्द्रेऽर्के वा पापा बलिनस्त्रिकोणनिधनेषु ।
सौम्यैरदृष्टयुक्ताः सद्यो मरणाय कीर्त्तिता यवनैः ॥

Also शौनकहोरा

पापेन सहिते चद्रे ग्रस्ते लग्नं समाश्रिते ।
अष्टमस्थेन भौमेन जननीसुतयोर्द्वयोः ॥
मरणं स्कन्द आशास्ते तथा ब्रह्मा प्रजापतिः ।
अङ्गिराश्च वसिष्ठश्च मम तावन्मतं शृणु ॥
अलग्नस्थेऽपि शीतांशौ तथाभूतेऽष्टमे कुजे ।
जातः प्रसवयोर्मृत्युमद्राक्षमसकृत्तमाम् ॥
तस्मादनास्था चन्द्रस्य लग्नस्थितिनियन्त्रणे ।

Second quarter. *cf.* शौनक

लग्नस्थे पापसंयुक्ते ग्रस्ते सूर्येऽष्टमे यदि ।
स्थितिः कुजस्य शस्त्रेण तयोर्मरणमादिशेत् ॥

Third and fourth quarters. *cf.* शौनक

लग्ने भास्वति चन्द्रे वा शुभस्य बलशालिनः ।
रहिते योगवीक्षाभ्यां पञ्चमे च मृतौ तथा ॥
नवमे चैकदा पापैर्जातस्य मृतिमादिशेत् ।
त्रिभिः पापैः पञ्चमस्थैरथवाऽष्टममाश्रितैः ॥

नवमं वा तथा सूर्ये चन्द्रे वा लग्नमाश्रिते ।
मरणं केचिदिच्छन्ति मुनयो दोषदर्शिनः ॥

Sloka 37. From the 2 quotations given below, it will be seen that the same effect is produced if Saturn & the Sun interchange places in the yoga described in the text.

सर्वार्थचिन्तामणौ

लग्नान्त्याष्टमधर्मभेषु सहिताश्चन्द्रार्कभौमार्कजाः
क्षिप्रं गच्छति चान्तकं सुरपतेर्मन्त्री न चेद्वीक्षते ॥

सारावल्याम्

लग्नान्त्यनवमनैधनसंयुक्ताश्चन्द्रसूर्यसौरारा: ।
जातस्य वधकृतः स्युः सद्यो गुरुणा न चेद् दृष्टाः ॥

In order that the four planets may be aspected by Jupiter, the latter must occupy the 5th house from the Lagna. If he should aspect only some of them, or be weak though he might aspect all the four planets, the child will die. It will escape death only in case Jupiter in full strength aspects all the four planets. *cf.* बृहत्प्राजापत्य

लग्नाष्टमतपोरिःफाण्यास्तवद्भिर्यथाक्रमम् ।
शशिभौमार्कमन्दैस्ते बलिना यदि नेक्षिताः ॥
गुरुणा मरणं ब्रूयाद्देहिनामाशु नारद ।
व्यामोहो मास्तु तान् सर्वान् पश्येत्पञ्चमगे गुरुः ॥

The planets mentioned in the sloka in the text as respectively occupying the 12th, the 9th, the 1st and the 8th houses may also be taken in the following order, *viz.*, Saturn in the 8th, the Sun in the 1st, the Moon in the 9th and Mars in the 12th. *cf.* बृहत्प्राजापत्य

अथवा लग्नरन्ध्रत्रित्रिकोणव्ययसंस्थितैः ।
अर्कार्किशशिभूपुत्रैस्तादृशैस्तत्तथा वदेत् ॥

The same sloka is also capable of the following interpretation:—Split up व्ययनवमोदयनैधन into two, thus: व्ययनवम and उदयनैधन; also असितरविशशाङ्कभूमिज into two thus: असितरवि and शशाङ्कभूमिज, When Saturn and the Sun are in the 12th and the Moon and Mars are in the 9th, or when Saturn and the Sun are in the Lagna and the Moon and Mars are in the 8th unaspected by powerful Jupiter in either case, the result will be the same. *cf.* बृहत्प्राजापत्य

यदा व्ययगतौ सूर्यमन्दौ चेन्नवमं गतौ ।
तदा चन्द्रश्च भौमश्च तथा मरणमादिशेत् ॥
यदा लग्नगतौ सूर्यमन्दौ चेन्निधनं गतौ ।
तदा चन्द्रश्च भौमश्च तथा मरणमादिशेत् ॥

The inverse order may also be applied to the above view. *cf.* शौनक

अथवा व्ययगौ यावच्चन्द्रभौमौ तदा तपः ।
संप्राप्तौ सूर्यमन्दौ चेत्तथा मरणमादिशेत् ॥
तथा लग्नगतौ यावच्चन्द्रभौमौ तदाऽष्टमम् ।
संप्राप्तौ सूर्यमन्दौ चेत्तथा मरणमादिशेत् ॥

The words व्ययनवमोदयनैधन may also mean the 8th house counted from the 12th, 9th and the 1st; *i.e.*, the 7th, 4th and the 8th from the Lagna. *cf.* बृहच्छौनक

चतुर्थमदरन्ध्रेषु कुत्रचिद्बलशालिना ।
अदृश्यमाना जीवेन वर्त्तन्ते चेत्तथा मृतिः ॥
बोद्धव्या मन्दसूर्येन्दुभू पुत्राः सहिता मिथः ।
वात्स्यायनान्यथा चेत्ता जानीहि त्वमतोऽन्यथा ॥

Again, the words असितरविशशाङ्कभूमिजाः are capable of being interpreted as असितसहितरविशशाङ्कभूमिजाः, that is, Saturn and the Sun, Saturn and the Moon, and Saturn and Mars placed in the 7th, the 4th and the 8th houses from the Lagna: *cf.*

चतुर्थे मन्दसंयुक्तश्चन्द्रमाः सप्तमे तथा ।
सूर्योऽष्टमे स्थितस्तद्वत् भौमश्चाशु मृतिप्रदः ॥
अत्रोऽपि बलयुक्तस्य दृष्टिरेका बृहस्पतेः ।
योगेषूक्तेष्विवेतः प्रागपवादाय कल्पते ॥

Sloka 38. *cf.* गुणाकर

त्रिकोणरन्ध्रास्ततनुव्ययेषु चन्द्रे सपापे म्रियते प्रसूतः ।
वीर्यान्वितैर्जीवबुधास्फुजिद्भिरालोकिते चेन्नयुतेऽथवा स्यात् ॥

Also **सारावली**

निधनास्तव्ययलग्नत्रिकोणगाः क्षीणचन्द्रसंयुक्ताः ।
पापा बलिभिः शुभदैरदृश्यमाना गतायुषं कुर्युः ॥

Also **बृहत्प्राजापत्य**

पञ्चमद्यूननवमरिःफलग्नाष्टमेषु चेत् ।
एकत्र पापसंयुक्त इन्दुर्मरणमादिशेत् ॥
बलवान् भृगुपुत्रो वा बलवानिन्दुनन्दनः ।
बळवान् धिषणो वेन्दुं वीक्षते चेन्न चादिशेत् ॥

Also **शौनक**

क्षीणेन्दुः पापसंयुक्तः पञ्चमादिषु चेत्तथा ।
मरणं नान्यथा केचिद्वात्स्यायन विचक्षते ॥

Sloka 39. The time taken by the Moon for making one revolution is 27·32305 days approximately. The Moon therefore makes about 13 revolutions in the course of a year. Whenever the Moon in the course of his orbit becomes powerful and is aspected by strong malefic planets on reaching any one of the three places referred to in the text, death will happen.

Also *cf.* **सारावली**

योगे बलिनः स्थानं स्वं वा लग्नं गतेऽपि वा चन्द्रे ।
बलवति पापैर्दृष्टे वर्षान्ते मृत्युकालः स्यात् ॥

Also **शौनक**

योगकारकखेटेषु बलिनाऽधिष्ठितं गृहम् ।
स्वेनैव वाऽथवा लग्नं चन्द्रमाः संश्रयेद्यदा ॥
पापैर्निरीक्ष्यमाणश्च वलवांश्च भवेत्तदा ।
प्राक्तनैर्मुनिभिः प्रोक्तमरिष्टे मरणं भवेत् ॥
सर्वथा तदनिर्दिष्टकालं नात्येति वत्सरम ।
बलवद्भिर्विनायुष्यैः कर्मभिर्विधिवत्कृतैः ॥

Slokas 40–41. *cf.* **गुणाकर**

मेषालिगः सुरगुरुर्निधने विशुक्रैरालोकितो गगनगैर्मृतिकृत् त्रिवर्षात् ।
वर्षद्वयेन रिपुनाशगतस्तथैव वक्रीशनिर्बलवता कुसुतेन दृष्टः ॥

These two sloka's as well as slokas 43, 45, 46 and 50 are from **सारावली**.

Sloka 42. cf. सारावली

कर्कटधामनि सौम्यः षष्ठाष्टमसंस्थितो विलग्नर्क्षात् ।
चन्द्रेण दृष्टमूर्तिर्वर्षचतुष्केण मारयति ॥

Sloka 43. cf. गुणाकर

तिग्मांशुनीहारकरावनीजयुक्तैः क्रमादेकगृहाश्रितैस्तैः ।
सूर्यात्मजेनाङ्गिरसा सितेन स्यात्पञ्चता पञ्चभिरेव वर्षैः ॥

Sloka 45. cf. गुणाकर

द्रेष्काणा लग्नगाः सर्पशृगालपाशपक्षिणाम् ।
सपापा मृत्युदा वर्षैः सप्तभिर्नेशवीक्षिताः ॥

Sloka 46. The last quarter of this sloka reads as सप्तभिरब्दैर्विनाशयति in सारावली.

Sloka 47. cf. सर्वार्थचिन्तामणि

तरणीन्दुकुजाः पुत्रस्थाने युक्ता न सौम्यगाः ।
जातो यमपुरं याति नवमेऽब्दे न संशयः ॥

Sloka 48. cf. सारावली

लग्नाधिपतिः पापः शशिनोंशे रिःफगो यदि च चन्द्रात् ।
क्रूरैर्विलोक्यमानो मारयति शिशुं नवभिरब्दैः ॥

Also गुणाकर

पापो लग्नपतिर्गतः शशधरः स्वांशे विधोरन्त्यगः
क्रूरैर्दृश्यतनुः करोति नवभिर्वर्षैः शिशोः पञ्चताम् ॥

Sloka 50. The latter half of this sloka reads thus in सारावली

एकादशभिर्वर्षैर्देवाङ्केऽपि स्थितं जातम् ॥

Sloka 51. cf. गुणाकर

होरेश्वरो निधनगो बलिभिश्च पापैर्दृष्टः करोति खलु मासि मृतिं चतुर्थे ।
जन्मेश्वरो दिनकरः ससुतस्तथैव दृष्टः सितेन नवमप्रमितैश्च वर्षैः ॥

Sloka 58. The 3rd पाद of this sloka reads as रिःफारिभे बागधिपेन युक्ते in सर्वार्थचिन्तामणि.

Slokas 59-60. Some more yogas restricting the period of life to within 20 years are extracted below from यवनजातक.

होरेश्वरेऽर्कयुक्ते जन्मेशे चापि सौम्यदृग्हीने ।
केन्द्रगतैः पापैः स्याज्जातस्याविंशतेर्मृतिर्भवति ॥
कुजरवियुक्ते लग्ने चरराशौ मध्यसंस्थिते जीवे ।
सुतधर्मगते चन्द्रे जातस्याविंशतेर्मृतिर्भवति ॥
चन्द्राष्टमगैः पापैः सौम्यैरापोक्लिमस्थितैर्जन्म ।
निधनारिगते चन्द्रे तस्यायुर्विंशतिः परमम् ॥
भौमे लग्नं याते रविमन्दौ केन्द्रगौ बलाद्रिक्तौ ।
आविंशतेर्मृतिः स्याद्भङ्गो वा रोगयुक्तो वा ॥

Sloka 61. The following yogas from यवनजातक fixing the length of life to a period ranging from 22 to 26 years will be found to be useful:

पापोदये सुरगुरौ शनिदृष्टे राहुणा समेते वा ।
यः कश्चिन्निधनगतो मरणं जनयेद्द्विरुद्रसंख्याब्दे ॥
रन्ध्रेश्वरो भाग्यलग्नात्मजस्थो लग्नाधिपे क्रूरदृष्टेऽष्टमस्थे ।
जातश्चतुर्विंशतिवर्षमायुः शुभेक्षितैस्तैरपमृत्युरेषः ॥
नीचांशगतश्चन्द्रोऽप्यष्टमसंस्थः क्षयी च मरणकरः ।
मन्दकुजाभ्यां दृष्टस्तस्यायुः पञ्चविंशतिः परमम् ॥

Slokas 62-65. For additional information see the following slokas from यवनजातक.

होराजन्माधिपयोः स्फुटयोगः केन्द्रमृत्युराशिस्थः ।
तत्र समेतः पापो निधनं स्यात्सप्तविंशवर्षेषु ॥
अष्टाविंशतिवर्षैर्मरणं चन्द्रार्कराहवो युक्ताः ।
कुर्वन्ति लग्नसंस्था जीवे व्ययभे तदा नियतम् ॥
अर्थव्ययर्क्षसंस्थौ क्रूरौ जीवोऽहिना च संयुक्तः ।
सप्ताष्टमकश्च तदा जातस्यायुः परं त्रिंशत् ॥
चन्द्रे क्षीणे स्वर्क्षे निधनेशे केन्द्रगेऽष्टमे पापे ।
लग्नेशे बलहीने जातस्यायुः परं त्रिंशत् ॥
होरेशे षष्ठगते सक्रूरौ चन्द्रभार्गवौ सुतगौ ।
निधनेशे केन्द्रगते जातस्यायुः परं त्रिंशत् ॥

Slokas 66-67. *Vide* also the following from यवनजातक

आपोक्लिमस्थिते चन्द्रे लग्नेशे च तथैव हि ।
पापेक्षिते बलैर्हीने जीवत्यष्टचतुर्गुणम् ॥
चन्द्रलग्नाष्टमपती केन्द्रगतावष्टमे ग्रहः कश्चित् ।
आद्वात्रिंशान्मरणं नान्यच्छुभसंयुते केन्द्रे ॥

Slokas 69-70. The following is another अल्पायुर्योग mentioned in यवनजातक.

गुरुणा युक्तः शुक्रो लग्नगतः पञ्चमे कुजार्कसुतौ ।
बलरहितश्चेच्चन्द्रो जातोऽल्पजीवितो नियतम् ॥

Sloka 71. *cf.* दक्ष

बलपुष्टिर्विलग्नस्य पत्युः पापैरदर्शनम् ।
शुभकेन्द्रस्थितिस्तेषां दृष्टिश्चेति चतुष्टयम् ॥
प्रोक्तानेतानतोऽन्यांश्च सकलानपि नारद ।
बाधते सम्यगालोच्य तस्मान्मरणमादिश ॥

Sloka 72. The last पाद of this sloka should read as विशेषाच्छुक्रवीक्षितः । In support of this, we have the following from बृहत्प्राजापत्य

परिपूर्णतनुश्चन्द्रः शुभर्क्षे शुभमध्यगः ।
अरिष्टं बाधते सर्वं शुक्रदृष्टो विशेषतः ॥

Again *cf.* माण्डव्यजातक

चन्द्रः संपूर्णतनुः सौम्यर्क्षगतः स्थितः शुभस्यांशे ।
प्रकरोति रिष्टभङ्गं विशेषतः शुक्रसंदृष्टः ॥

Also सारावली

चन्द्रः संपूर्णतनुः शुक्रेण निरीक्षितः सुहृद्भागे ।
रिष्टहराणां श्रेष्ठो वातहराणां यथा वस्तिः ॥

Sloka 73. *cf.* माण्डव्यजातक

बुधभार्गवजीवानामेकतमः केन्द्रमागतो बलवान् ।
यद्यपि क्रूरसहायः सद्यो रिष्टस्य भङ्गाय ॥

Also कश्यप

एकोऽपि ज्ञार्यशुक्राणां लग्नात्केन्द्रगतो यदि ।
अरिष्टं निखिलं हन्ति तिमिरं भास्करो यथा ॥

Also **यवन**

एकोऽपि यदि केन्द्रस्थः शुक्रो ज्ञो वाऽङ्गिरापतिः ।
नवमे वा सुतस्थाने सर्वारिष्टं निवारयेत् ॥

Sloka 74. This sloka is taken from **सारावली**.

Also *cf.* **जातकादेश**

चन्द्रः पूर्णतनुः शुभेष्टगणगः स्वोच्चे स्वभे वा स्थिते
मित्रैः स्वाश्रितवर्गपैर्बलयुतैः सौम्यैश्च वा वीक्षितः ।
सौम्यैः स्वान्त्यगतैः स्मरारिमृतिगैः केन्द्रत्रिकोणेऽथवा
सम्प्राप्तैर्विनिहन्त्यरिष्टमखिलं ध्वान्तं यथा भास्करः ॥

Sloka 75. This is from **माण्डव्यजातक**. The reading there is as follows:

पक्षे सिते भवति जन्म यदि क्षपायां कृष्णेऽथवाऽहनि शुभाशुभदृश्यमानः ।
तं चन्द्रमा रिपुविनाशगतोऽपि यत्नादापत्सु रक्षति पितेव शिशुं न हन्ति ॥

Vide also notes to sloka 35, *supra.*

Also *cf.* **सर्वार्थचिन्तामणि**

शुक्ले च पक्षे यदि रात्रिजन्म चन्द्रोऽपि षष्ठाष्टमराशियुक्तः ।
शुभेक्षिते सन्निह कृष्णपक्षे दृश्यः सपापैरवति प्रसूतम् ॥

Also **जातकाभरण**

वलक्षपक्षे यदि जन्म रात्रौ कृष्णे दिवाष्टारिगतोऽपि चन्द्रः ।
क्रमेण दृष्टः शुभपापखेटैः पितेव बालं परिपालयेत्सः ॥

Also **कश्यपः**

शुक्लपक्षे क्षपां जन्म लग्ने सौम्यनिरीक्षिते ।
विपरीतं कृष्णपक्षे तथा रिष्टविनाशनः ॥

Sloka 76. This is from **सारावली**. The reading of the first half there is different, *viz.,*

सर्वातिशाय्यतिबलः स्फुरदंशुमाली लग्ने स्थितः प्रशमयेत् सुरराजमन्त्री ॥

Jupiter is considered to be the strongest among the benefics in the matter of warding off all evils and increasing the happiness of the native. *cf.* **यवन**

निःशेषदोषहरणे शुभवर्धने च वीर्यं गुरोरधिकमस्त्यखिलग्रहेभ्यः ।
तद्वीर्यपाददलशक्तिभृतौ ज्ञशुक्रौ चान्द्रं बलं तु निखिलग्रहवीर्यबीजम् ॥

Also जातकादेश

लक्षान् दोषान् हन्ति देवेन्द्रपूज्यः केन्द्रं प्राप्तो दैत्यमन्त्री तदर्द्धम् ।
वीर्योपेतः सोमपुत्रस्तदर्द्धं चान्तं वीर्यं वीर्यबीजं ग्रहाणाम् ॥

Sloka 77. cf. कश्यप

एक एव हि लग्नेशः केन्द्रसंस्थो बलान्वितः ।
अरिष्टं निखिलं हन्ति पिनाकी त्रिपुरं यथा ॥

Sloka 78. This sloka is taken from कश्यप

Sloka 79. This is from सारावली.

cf. सर्वार्थचिन्तामणि

लग्नात् तृतीयारिभवे सराहौ पापैर्विमुक्तः शुभदृश्यमानः ।
विनाशयत्याशु समस्तरिष्टं तूले यथा वायुबलस्य वेगात् ॥

Also जातकाभरण

मूर्त्तेस्तु राहुस्त्रिषडायवर्त्ती रिष्टं हरत्येव शुभैः प्रदृष्टः ॥

Also शौनक

राहुस्तृतीयषष्ठे वा लाभे वा शुभसंयुतः ।
तद्दृष्टो वा तथा रिष्टं सर्वं शमयति ध्रुवम् ॥

Also गुणाकर

राहुर्विलग्नात् त्रिषडायवर्त्ती दृष्टः शुभै रिष्टहरः प्रदिष्टः ॥

Sloka 80. This sloka is also from सारावली.

cf. जातकाभरण

वृषाजकर्काख्यविलग्नसंस्थो राहुर्भवेद्रिष्टविनाशकर्त्ता ॥

Also जातकादेश

खस्थानगाः सर्वनभश्चरेन्द्रा निघ्नन्त्यरिष्टं स्वकृतं क्षणेन ।
सौम्येक्षितः षट्त्रिभवेषु राहुः कुलीरमेषोक्षविलग्नगो वा ॥

Sloka 81. The reading of this sloka is slightly different in सर्वार्थचिन्तामणि *viz.*,

निशाकरे शोभनखेचरांशे शुभेक्षिते पूरितदीप्तिजालः ।
जातस्य निःशेषमरिष्टमाशु यथा विषं निघ्नति वैनतेयः ॥

Sloka 83. This sloka is from माण्डव्यजातक.

Sloka 84. A few of the Madhyamayur (मध्यमायुस्) yogas culled from other works are given below for the reader's information as the same appears to have been either lost or omitted from this work.

सौम्यैः पापांशकर्कस्थैः पापैः केन्द्रगतैस्तथा ।
मध्यमायुरयं योगः सौम्यैः केन्द्रविवर्जितैः ॥

चतुरस्रगताः पापा लग्नात्कुर्वन्ति मध्यमायुष्यम् ।
चन्द्रात्तथैव दिवसैः सौम्यैरनवीक्षिता न शुभयुक्ताः ॥

सुतदशमे सौम्यैः स्यान्निधनै रव्यन्विते व्यये चन्द्रे ।
गुरुशुक्रावेकगतौ जातस्तत्रैव मध्यायुः ॥

चन्द्रे कुजर्क्षे तनुगे प्रदृष्टे क्रूरग्रहैः शोभनखेचरेन्द्रैः ।
केन्द्राद्बहिष्ठैर्निधनं प्रयाति वर्षैस्त्रयस्त्रिंशसमानकैस्तु ॥
पापग्रहे रन्ध्रपतौ सचन्द्रे केन्द्रस्थिते वा यदि वा त्रिकोणे
निरीक्षिते पापखगैर्नभस्थैर्जातस्त्रयस्त्रिंशदुपैति वर्षम् ॥
लग्ने शनौ रात्रिकरेण युक्ते भौमे घटस्थे सुरसंख्यवर्षैः ॥
गुरुशुक्रौ च केन्द्रस्थौ लग्नेशे पापसंयुते ।
आपोक्लिमस्थे सन्ध्यायां जातस्यायू रवित्रयम् ॥
पापमध्यगते सूर्ये लग्नस्थे शत्रुवेश्मनि ।
जातश्च रोगपीडार्त्तः परमायू रवित्रयम् ॥
भौमेन्दू लग्नगौ यस्य केन्द्राष्टमविवर्जितैः ।
सौम्यैर्गुलिकवेलायां जातस्यायू रवित्रयम् ॥

क्रूरान्तरे लग्नगते तदीशे युग्मस्थिते देवगुरौ रिपुस्थे ॥
जातस्तु मृत्युं मुनिवह्निवर्षैः प्रयाति शास्त्रज्ञपरैः प्रदिष्टम् ।
अष्टमपतौ विलग्ने स्थिरराशौ जायते नरो यस्तु ।
चत्वारिंशद्वर्षैर्मरणं रन्ध्रे न शुभयुक्ते ॥
लग्नेश्वरे रन्ध्रगते सपापे केन्द्राद्बहिष्ठे यदि सौम्यखेटे ।
चत्वारिंशद्वत्सरे मृत्युमेति जातः पुत्रो नान्यथा शास्त्रमेतत् ॥
सभूमिजे रन्ध्रपतौ विलग्ने राशौ स्थिरे वा यदि वा धराजे ।
रिःफेऽष्टमे मृत्युमुपैति जातस्त्वब्दैर्द्विचत्वारिसमानकैर्वा ॥
केन्द्रे गुरौ कर्मणि सूर्यपुत्रे लग्ने चरे वेदयुगैः समानैः ॥

अष्टमाधिपतौ केन्द्रे भौमे लग्नं समाश्रिते ।
अर्कार्कजौ त्रिषष्ठस्थौ जीवेद्रुद्रचतुष्टयम ॥

स्वोच्चे विलग्ने क्षितिनन्दने च जीवेऽस्तगे कर्मणि सूर्यपुत्रे ।
जातो धनाढ्यो बहुशास्त्रवेत्ता वेदाब्धिवर्षैर्निधनं प्रयाति ॥

जन्माधिपे रन्ध्रगते सपापे पापान्विते लग्नपतौ रिपुस्थे ।
बलान्विते वा शुभदृग्विमुक्ते पञ्चाब्धिवर्षैर्निधनं प्रयाति ॥

मेषे शशाङ्के तनुगे सुपूर्णे सौम्येक्षिते भूपतिरत्र जातः ।
पापग्रहाणां च दृशा विहीने नागाब्धिवर्षैर्निधनं प्रयाति ॥

वर्गोत्तमांशगे चन्द्रे लग्नस्थे पापवीक्षिते ।
सौम्यैर्बलविहीनैश्च द्वादशाब्दचतुष्टयम् ॥

लग्नेशे निधनांशस्थे लग्नांशे निधनेश्वरे ।
पापयुक्तौ तदा जातः पञ्चाशद्वर्षजीवितः ॥

द्विशरीरोदययाते मन्दे चन्द्रे व्ययेऽष्टमे वाऽपि ।
जातस्तत्र मनुष्यो जीवेद्वर्षाणि द्विपञ्चाशत् ॥

शनैश्चरो लग्नगतः सहायस्त्वन्येन चन्द्रो व्ययभेऽष्टमाः स्युः ।
वेदान्तविज्ञानसुशीलवृत्तो जातस्तु मृत्युं नयनेषुवर्षे ॥
चापे गुरौ लग्नगतेऽष्टमस्थे भौमे सराहौ मुनिबाणवर्षे ।
रन्ध्रेश्वरे कामगते शशाङ्के पापान्विते षण्मृतिगेऽष्टबाणे ॥
शन्यंशे लग्नेशे निधनेशसमन्विते निशानाथे ।
षष्ठेऽष्टमे व्यये वा जातस्तस्याष्टपञ्चाशत् ॥
षष्ठाष्टमव्ययगतैर्ग्रहैः समस्तैर्नृपालयोगे च ।
अस्मिन्योगे जातः परमायुश्चाष्टपञ्चाशत् ॥
यस्य केन्द्रे पापयुक्ते लग्ने क्रूरविवर्जिते ।
षष्टिवर्षात् परं नास्ति पापैः पञ्चमसंस्थितैः ॥
लग्नेशे व्ययसंस्थिते क्षीणे पापयुतेऽपि वा ।
षष्टिवर्षात्परं नास्ति न लग्ने च बृहस्पतिः ॥
लग्नाधीशान्मृत्युषष्ठव्ययस्थाः पापाः सन्तो नैधनं वर्ज्यसंस्थाः ।
अस्मिन्योगे जायते यो मनुष्यस्तस्यायुः स्यात् षष्टिवर्षं प्रदिष्टम् ॥
सौरौ विलग्ने हिबुके शशाङ्के कुजे कलत्रे गगने दिनेशे ।
कवीज्यसौम्येष्विह तैर्युतेषु नरेश्वरो जीवति वर्षषष्ट्या ॥
लग्नाधिमाने विबुधारिपूज्ये बुधेज्यचन्द्रैः परिपश्यमाने ।

जातं नरं भूमिपतिं धनाढ्यं करोति षष्ठ्या सुतभेन्द्रपूज्ये ॥
सिते विलग्ने बुधभास्करात्मजौ चतुष्टयस्थाः परमोच्चखेचराः ।
तृतीयलाभर्क्षगतास्तु योगे महीपतिः स्यान्निधनं च षष्ठ्या ।
सरन्ध्रगे देवगुरौ विलग्ने कुम्भे सपापे यदि केन्द्रराशौ ।
सर्वज्ञानां पुण्यवान् शास्त्रवेत्ता जातस्तु षष्ठ्या निधनं प्रयाति ॥
केन्द्रे सपापे तनुपे व्ययस्थे लग्नेश्वरे रन्ध्रगते हि वह्नौ ।
लोकान्तरं प्रापयति स्म जातं कुशीलवृत्तं कुलपांसनं तम् ॥
होराजन्माधिपती केन्द्रगतौ मृत्युनाथसंयुक्तौ ।
लग्नचतुष्टयहीने देवगुरौ पञ्चषष्टिवर्षान्तम् ॥
चन्द्रे विलग्ने स्वगृहं प्रयाते नीचे शनौ भास्करे सप्तमे च ।
अस्मिन् जातो मानुषो ज्ञानिमुख्यो जीवेत् षष्टिः पञ्चभिः संप्रयुक्तः ॥
होराजन्माधिनाथौ निधनमुपगतौ मृत्युनाथे च केन्द्रे
योगे जातो नरोऽस्मिन् जनयति न परं कीर्त्तिवित्तान्वितं च ।
षष्ठ्यां षड्भिर्युतायां निधनमभिहितं नन्दकोक्ते तदिष्टं
वर्षे त्रिंशेऽथवा स्यास्त्वखिलमिति खगैर्जायते पार्थिवेन्द्रः ॥
जीवे विलग्ने बुधसूर्ययुक्ते मीने शनौ द्वादशे शीतरश्मौ ।
जातो योगे चार्थवान् मृत्युभाक् च जीवेत् षष्ठ्या षट्सहायो मनुष्यः ॥
नक्षत्रनाथसहितः सविता नभस्थः सौरिर्विलग्नसहितो हिबुके सुरेज्यः ।
अस्मिन्योगे जायमानो मनुष्यः क्षोणीपतिर्नैधनमष्टषष्ठ्या ॥
अर्ककुजमन्दयुक्ते बलवर्जिते देवराट्पूज्ये ।
चन्द्रो व्यये सुते वा सप्ततिवर्षाणि जीवति प्रायः ॥
नीचे मन्दे केन्द्रगे वा त्रिकोणे सौम्ये केन्द्रे भास्करे वा ससौम्ये ।
योगे जातः पण्डितो धर्मशीलो ज्ञानी प्राज्ञः सप्ततेर्वत्सराणाम् ॥
प्रबले केन्द्रगे सौम्ये निधने सौम्यवर्जिते ।
लग्नाधिपेन दृष्टश्चेत्पापैर्जीवति सप्ततिम् ॥

पञ्चमस्थे धरासूनौ नीचे मन्देऽस्तगे रवौ ।
अस्मिन् जातो मनुष्यस्तु सप्तत्यां निधनं व्रजेत् ॥

Sloka 96. This appears to be from शुकजातक. The yoga quoted there is slightly different, *viz.*,

चरांशकस्थाः कविमन्दभौमाः स्थिरांशकस्थौ रविदेवपूज्यौ ।
शेषौ तु युग्मांशकसंप्रयुक्तौ दीर्घायुरस्मिन् जनने नृपालः ॥

One of the means of finding out the **अल्प, मध्य** and **दीर्घायुस्** in horoscopes has been taken from Parasara and given below in a tabular form for easy reference.

	दीर्घायुः	मध्यायुः	अल्पायुः
I	चरगृहे लग्नेशः चरगृहे अष्टमेशः	चरगृहे लग्नेशः स्थिरगृहे अष्टमेशः	चरगृहे लग्नेशः उभयराशौ अष्टमेशः
II	स्थिरगृहे लग्नेशः उभयराशौ अष्टमेशः	स्थिरगृहे लग्नेशः चरराशौ अष्टमेशः	स्थिरगृहे लग्नेशः स्थिरगृहेऽष्टमेशः
III	उभयराशौ लग्नेशः स्थिरगृहेऽष्टमेशः	उभयराशौ लग्नेशः उभयराशावष्टमेशः	उभयराशौ लग्नेशः चरराशावष्टमेशः

Explanation :—There are three sets of yogas under each of **दीर्घ, मध्य** and **अल्पायुस्**. That particular kind of Ayus will have to be predicted under which both the conditions which constitute each set are satisfied. Thus, taking the first set under each of the heads of Ayus, (i) if the lords of the Lagna and the 8th house are both in moveable Rasis, **दीर्घायुस्** will have to be predicted; (ii) if they occupy moveable and fixed signs respectively, **मध्यमायुस्** will have to be stated; (iii) if they are in **चर** and **उभय** Rasis, then the native will be **अल्पायुस्**. Similarly with reference to the remaining two sets.

Sloka 97. The reading of this sloka is slightly different in **होराप्रकाश** *viz.*,

मन्दांशकस्था रविभौमजीवा धर्माश्रिताः कर्मयुता बलाढ्याः ।
राश्यावसाने हिमगौ विलग्ने युगान्तमायुः श्रियमादधाति ॥

Sloka 99. This sloka is from **बृहज्जातक**. *cf.* **सारावली**

बन्ध्वास्पदोदयविलग्नगतौ कुलीरे गीर्वाणनाथसचिवः सकलश्च चन्द्रः ।
जूके रवीन्दुतनयावपरे च लाभे दुश्चिक्यशत्रुभवनेष्वमितं तदायुः ॥

Also

कर्किलग्ने गुरुः सेन्दुः केन्द्रगौ बुधभार्गवौ ।
शेषैस्त्रिलाभषष्ठस्थैरमितायुर्भवेन्नरः ॥

Also **गुणाकर**

शीतकराङ्गिरसावलिरङ्गे केन्द्रगतावुशनःशशिसूनू ।
लाभरिपुत्रिगताः परिशेषाः प्रोक्तमिहामितमायुरितीदम् ॥

Sloka 100. This sloka leads to the inference that malefics are worse in Konas than in Kendras—*cf.*

त्रिकोणस्थेषु पापेषु कुष्ठं शूलं मतिभ्रमः ।
स्थानभ्रंशः कुलभ्रंशो वंशच्छेदोऽथवा भवेत् ॥

The sloka in the text is also capable of being interpreted thus: "When Aries or Pisces happens to be the Lagna with Jupiter or Venus occupying it, and the Moon in the middlemost Navamasa of Taurus, or Mars has gained a **सिंहासनांश,** the person &c.,"

Sloka 105. The same yoga is again referred to in *sloka 122.* of the next Adhyaya.

Sloka 106. For the same yoga, see *Adhyaya V-sloka-123 infra.*

Adhyaya—V.

Sloka 2. *Vide* **श्रीपतिपद्धति.** V.—28.

Also *cf.* **सारावली**

विंशतिरेकं द्वितयं नव धृतिरिह विंशतिश्च पञ्चाशत् ।
वर्षाणामपि संख्याः सूर्यादीनां निसर्गभवाः ॥

Sloka 3. *Vide* **श्रीपतिपद्धति** V.—19.

Also *cf.* **बृहज्जातक**

मययवनमणित्थशक्तिपूर्वैर्दिवसकरादिषु वत्सराः प्रदिष्टाः ।
नवतिथिविषयाश्विभूतरुद्रदशसहिता दशभिः स्वतुङ्गभेषु ॥

Also **सारावली**

एकोनविंशतिर्भानोः शशिनः पञ्चविंशतिः ।
तिथयः क्षितिपुत्रस्य द्वादशैव बुधस्य तु ॥

गुरोः पञ्चदशाब्दानि शुक्रस्याप्येकविंशतिः ।
त्रिंशती रविपुत्रस्य पिण्डायुः स्वोच्च संस्थितेः ॥

Slokas 4–5. Vide श्रीपतिपद्धति V.—20, 21.

Sloka 7. This sloka as well as slokas 9, 11, 17–21, have been taken from बृहज्जातक.

First quarter. ततश्चान्तरस्थे is the reading adopted in the commentaries of भट्टोत्पल and विवरण but in मिताक्षरी it is तयोरन्तरस्थे which clearly means नीचोच्चयोरन्तरस्थे.

Second quarter. By the word अपरे in this sloka is meant (मणित्थ) Manittha (some call him Manintha) and men of his school. For, according to them, the number of years contributed by the Lagna is thus found :

लग्नराशिसमाश्चाब्दा मासाद्याननुपाततः ।
कृत्वा यत्तद्भवेत्कालं वर्षादिर्लग्नजीवितम् ॥

Also *vide* slokas 14 and 15 *infra.*

Thus if 15° 47′ 24″ of वृश्चिक have risen at the birth time of a person, the number of years given by the Lagna according to Varahamihira's view will be $\frac{947{\cdot}4}{200}$ or 4·737 years.

But if मणित्थ's view be adopted, the लग्नायुस् will be 7 years (number of rasis that have elapsed counted from मेष) *plus* $\frac{15^\circ{\cdot}79}{30^\circ}$ years or 7·5263 years.

Both the methods of calculating लग्नायुस् existed from the very beginning. राश्यायुस् was not a new method found by मणित्थ or men of his school. For, we see in स्कन्दहोरा

अथैके लग्नभांशेन राशिनेत्यपरे विदुः ॥

But मणित्थ and men of his school followed the latter while others preferred the former. Both the methods are equally authoritative and the best course to adopt is perhaps to find the लग्नायुस् by both the methods and take the average. Under the two methods, the past Navamsas and Rasis and their fractions represent the years months, &c. Bhattotpala adds that Manittha's method should be followed if the lord of the rising sign be powerful, and the first method should be adopted if the lord of the rising Navamsa be strong, and quotes in support thereof the following sloka from **सारावली**

> लग्नदायोंशतुल्यः स्यादन्तरे चानुपाततः ।
> तत्पतौ बलसंपन्ने राशितुल्यं स्वभाधिपे ॥

(तत्पदे बलसंयुक्ते राशितुल्यांशभाधिपे is another reading.)

For the latter half of the sloka in the text, *cf.* **श्रीपतिपद्धति** V-22.

A planet is said to be eclipsed when he disappears within a particular limit from the Sun, his light being then overpowered by that of the Sun. This limit in the case of the several planets is as follows:

The Moon when within	12°	from the Sun.
Mars when within	17°	..
Mercury when within	14°	...
but when retrograde	12°	...
Jupiter when within	11°	...
Venus	10°	...
but when retrograde ..	8°	...
Saturn when within	15°	...

Sloka 9. cf. **सारावली**

> सर्वमर्द्धं तृतीयांशश्चतुर्थः पञ्चमस्तथा ।
> षष्ठश्चांशक्षयं याति व्ययाद्वामं ग्रहे स्थिते ॥
> सौम्ये चार्द्धमितो याति नाशं बहुभिरेकगैः ।
> एक एव बली हन्ति स्वायुषः सर्वदा ग्रहः ॥

The **चक्रपातार्द्धहानि** process is better described in detail in **श्रीपतिपद्धति** V-:3-16. Please see notes on the same-pp. 35-36.

The commentator adds that Varahamihira concurs with Satyacharya in this view *viz.*, that when several planets occupy a single sign, the reduction shall be made for the most powerful one. *cf.* **सत्य**

एकादशोत्क्रमात्सप्तमादिति प्राह हरणकर्माणि ।
एकर्क्षगेषु वीर्याधिकः स्वभागं हरेदेकः ॥
अर्धं तृतीयभागं चतुर्थकं पञ्चमं च षष्ठं च ।
आयुः पिण्डात्पापा हरन्ति सौम्यास्तथार्धानि ॥
द्वादशसंस्थः पापः स्वादायं शोभनस्ततोऽर्द्धं तु ।
अपहरति सर्वमायुर्यथा च योगस्तमपि वक्ष्ये ॥

Sloka 11. cf. सारावली

लग्नांशलिप्तिका हत्वा प्रत्येकं विहगायुषा ।
भक्त्वा मण्डललिप्ताभिर्लब्धं वर्षाद्विशोधयेत् ॥
स्वायुषो लग्नगे क्रूरे लब्धस्यार्द्धं शुभेक्षिते ।
एवमेव प्रकर्तव्यं जीवशर्मोक्तचन्द्रजे ॥

The commentator also adds "अस्मिन् सार्द्धोदितेति कर्मणि लग्ने यदा पापसौम्यौ भवतस्तदा यो लग्नोदितांशकसमीपवर्ती स एव ग्राह्यो नेतर इति

When there are two planets one malefic and the other benefic occupying the Lagna, the planet that is nearer to the rising Navamsa is alone to be considered and not the others. If the malefic planet be nearer, then the reduction enjoined has to be made; but if the benefic be nearer, then no reduction need be made. This is the view of the commentator.

Some are of opinion that the number of years of reduction is obtained by multiplying the total number of years already obtained by the number of Navamsas between मेष and the Navamasa lagna. This view is not favoured either by the commentator or by Kalyanavarman, the author of Saravali.

The word क्रूर in the sloka does not include the waning Moon, for, says the commentator: तत्र क्रूरशब्देन क्षीणश्चन्द्रमा न ग्राह्यः । तथा च बादरायणः

सूर्याङ्गारकमन्देष्वेकस्मिन् लग्नगे भवति हानिः ।
विधिना त्वनेन सौम्येक्षिते दलं पातयेल्लब्धम् ॥ इति

Slokas 12-13. Same as श्रीपतिपद्धतिः V—26, 27.

The following horoscope of a distinguished personage. who is still living, is given as an example for the पिण्डायुर्दाय method, as the Sun has been found to possess the greatest (षड्बल) Shadbala, *viz.*, 8·154 Rupas in his nativity :

Planets	Signs	Degrees	Minutes	Seconds	Total षड्बल	Remarks
Sun	1	2	55	30	8·154	Jupiter is retrograde.
Moon	11	23	35	24	7·289	
Mars	3	24	1	26	7·354	
Mercury	0	13	10	48	7·550	
Jupiter	6	25	43	23	5·678	
Venus	2	18	15	50	7·719	
Saturn	0	17	59	38	5·053	
Lagna	7	15	47	24	7·345	

According to slokas 3, 4 & 5 (or 6, or 7),

Subtracting from the Sun's highest exaltation point, *viz.* 0-10-0-0 the figures for the Sun, 1-2-55-30, we get 11-7°-4′-30″. This is greater than 6 signs and so should be kept as it is. Reducing the same to minutes we get 20224·5.

The ayus contributed by the Sun is therefore

$$\frac{20224{\cdot}5}{21600} \times 19 \quad \text{or} \quad 17{\cdot}790 \text{ years. Similarly,}$$

that contributed by the Moon is 22·263 ,,
,, ,, Mars 7·665 ,,
,, ,, Mercury 6·939 ,,
,, ,, Jupiter 10·386 ,,
,, ,, Venus 16·259 ,,
,, ,, Saturn 10·111 ,,
,, ,, Lagna 4·737 ,,

Moon	Saturn Mercury	Sun	Venus Rahu
	Rasi		Mars
	Chakra		
Ketu	Lagna	Jupiter	

The Sun in the 7th place suffers a reduction of ⅙th of his Ayurdaya period (sloka 9). He therefore gives 17·790 *minus* 2·965 or 14·825 years.

The Moon being in an inimical house suffers a reduction by ⅓rd. (Sloka-7). He therefore gives 22·263 *minus* 7·421 or 14·842 years. There is no reduction under sloka 9, as he does not occupy any one of the latter 6 houses.

Mars occupies the 9th house and therefore loses ¼th of its ayus. (sloka 9). He therefore gives 7·665 *minus* 1·916 or 4·749 years.

Mercury is not eclipsed by the Sun being more than 14 degrees apart. Nor is he in any one of the latter 6 houses. He does not therefore suffer any reduction.

Jupiter occupies the 12th house. As he is a benefic planet, he loses only half (instead of the whole) of his ayus (sloka 9). He therefore gives 5·193 years. He is occupying an inimical house and has therefore to suffer a further reduction by ⅓rd. But as he is retrograde in motion at the time he is exempt from this (sloka 7).

Venus being in the 8th house has to lose half of 1/5th (as he is benefic) of his ayus. He therefore gives 16·259 *minus* 1·626 or 14·633 years.

Saturn does not suffer any reduction under sloka 9, as he is in the 6th house. Though he is within 15 degress from the Sun and consequently eclipsed by the Sun's rays, still, he has no Astangata reduction (see sloka-7).

There being no malefic planet in the Lagna, there is no क्रूरोदयहरण—(sloka 11).

The planetary years after all reductions have been made are as follow:—

Sun	14·825	years
Moon	14·842	,,
Mars	4·749	,,
Mercury	6·939	,,
Jupiter	5·193	,,
Venus	14·633	,,
Saturn	10·111	,,
Lagna	4·737	,,
Total	76·029	years

The above is only a very rough calculation, the method in श्रीपतिपद्धति being more accurate.

Sloka 15. See notes to 2nd quarter of sloka 7.

Sloka 17. Jeevasarma's ayurdaya is to be resorted to only when the Lagna, the Sun and the Moon are all weak (*vide* श्रीपतिपद्धति V–32). It has also to be noted that just as in the पिण्डायुर्दाय the several reductions *viz.*, चक्रपातहरण, नीचार्द्धहरण, शत्रुक्षेत्रहानि, अस्तङ्गतहानिः, क्रूरोदयहरण, will have to be made and then the resulting length of life ascertained. *Vide* श्रीपतिपद्धति-V-33-34.

cf. जीवशर्मा

17व 1मा 22दि 8घ 34प

सप्तदशैको द्वियमौ वसवो वेदाग्नयो ग्रहेन्द्राणाम् ।
वर्षाण्युच्चस्थानां नीचस्थानामतोऽर्द्धं स्यात् ॥
मध्येऽनुपाततः स्यादानयनं शेषमत्र यत्किञ्चित् ।
पिण्डायुष इव कार्यं तत्सर्वं गणिततत्वज्ञैः ॥

The Amsayurdaya method has been accurately treated in श्रीपतिपद्धति, 5th Adhyaya and the reader will do well to refer to the example worked out in the notes to that work. It has to be remembered that there are no years fixed for each planet as in the पिण्ड, निसर्ग and जीवशर्मा ayurdayas, (sl. 20); There is also no क्रूरोदयहरण in this system.

Sloka 22. The रश्मिजायुर्दाय system founded by Mahendra has been in vogue from a very long time and has been recognised by eminent astrologers such as Manittha, Maya, Yavana and Badarayana. A brief description of the method of obtaining the correct number of Rasmi or rays of planets is given below:

The seven planets from the Sun onwards have respectively 10, 9, 5, 5, 7, 8 and 5 rays when they are in their full exaltation position, the corresponding number of rays when in their depression being zero in each case. The number of rays which a planet in any intermediate position is entitled to has therefore to be determined by mere rule-of-three.

When a planet has emerged from its नीच or depression and is on its way towards its exaltation, its rays are said to be अभिमुख or facing towards the front. These rays are declared to be capable of producing benefic results to the native in a very short time. The reverse is the case with the पराङ्मुख or down-looking rays of planets which have fallen from their उच्च or exaltation and are going towards their depression.

The rays have to undergo some multiplications and reductions, before their utilisation for purposes of prediction.

When a planet occupies a Dwadasamsa which is his own, his exaltation, or that of a friendly planet, his rays are to be doubled. The same remark applies when the planet is retrograde in his motion or is in his स्वक्षेत्र Rasi. But if the Dwadasamsa be that of an enemy or the planet's नीचराशि, the rays suffer a reduction by $\frac{1}{16}$th portion. All planets—Venus and Saturn excepted——lose their rays when they become अस्तंगत or eclipsed. When the retrograde motion of a planet is about to cease, the rays suffer a reduction by $\frac{1}{8}$th.

The quality of a horoscope varies directly with the total number of rays given by the planets at the time of birth. Persons with 1 to 5 rays will be very insignificant, miserable, low-minded, unlucky, etc; those born with 6 to 10 rays will be dependants with no permanent home and poor ; those with 10 to 15 rays will be somewhat better, being virtuous, of good temper, good specimens of their family &c.; those with 15 to 20 rays will in addition be rich, famous and respected by their relations, and so on.

It is also stated that the native should be declared long-lived when the number of rays exceed 25, as one of medium life when it is between 15 and 25, and short-lived when the number falls short of 15.

cf. जातकादेश

सर्वेषां रश्मियोगस्य स्सराधिक्ये चिरायुषः ।
स्वल्पायुषो मयाल्पत्वे मध्यत्वे मध्यमायुषः ॥

For detailed information the reader is referred to the several chapters on the subject in Brihat Parasarahora, Saravali, &c.

Take the case of the horoscope given under the notes to slokas 12 and 13.

The position of the Sun is 1- 2-55-30.
His **नीच** position is 6-10- 0- 0.

The distance of the Sun from his **नीच** is 5-7-4-30.

His **पराङ्मुख** rays are therefore $\frac{5{\cdot}2358}{6} \times 10$ or 8·7264.

As he is occupying a Dwadasamsa Rasi of a neutral planet, there is no reduction or multiplication of any kind.

The Moon's position is 11-23-35-24.
His **नीच** is 7- 3- 0- 0.

4-20-35-24.

His **अभिमुख** rays are $\frac{4{\cdot}6863}{6} \times 9 = 7{\cdot}0295$.

The Moon is in the Dwadasamsa Rasi of his enemy. He therefore loses $\frac{1}{16}$th of 7·0295 or ·4393.

The Moon's net rays are therefore 6·5902.

The position of Mars is	3-24- 1-26
His नीच is	3-28- 0- 0
His distance from नीच is	0- 3-58-34

His पराङ्मुख rays are $\frac{{\cdot}132537}{6} \times 5$ or ·1103475.

He is occupying his own Dwadasamsa. His rays will therefore have to be doubled.

His rays are thus ·220695.

Mercury's position is	0-13-10-48
His depression	11-15- 0- 0
Subtracting, we get	0-28-10-48

His अभिमुख rays are $\frac{0{\cdot}939\dot{3}}{6} \times 5 = {\cdot}782\dot{7}$

But as he occupies his own Dwadasamsa, his rays will be doubled.

He will thus have	1·5655 rays.
Jupiter's position is	6-25-43-23
His नीच	9- 5- 0- 0
His distance from नीच is	2- 9-16-37

His पराङ्मुख rays are $\frac{2{\cdot}30923}{6} \times 7 = 2{\cdot}6941$

He occupies the Dwadasamsa of a neutral planet, hence there is no reduction on that account. His motion is retrograde. His rays will therefore have to be doubled.

He thus gets	5·3882 rays.
Venus is in	2-18-15-50
His depression is	5-27- 0- 0
His distance from depression is	3- 8-44-10

His **पराङ्मुख** rays are $\frac{3{\cdot}2912}{6} \times 8$ or 4·38824

As he is occupying the Dwadasamsa of a very friendly planet, his rays will be doubled.

He will thus get	8·7765 rays.
The position of Saturn is	0-17-59-38
His depression is	0-20- 0- 0
His distance from depression is	0- 2- 0-22

His **पराङ्मुख** rays are $\frac{{\cdot}0669}{6} \times 5 = {\cdot}05575.$

Though he is an astangata planet, as he comes under the exception, he suffers no reduction.

Thus the sphuta rays of the several planets are

Sun	8·7264	**पराङ्मुख**
Moon	6·5902	**अभिमुख**
Mars	0·2207	**पराङ्मुख**
Mercury	1·5655	**अभिमुख**
Jupiter	5·3882	**पराङ्मुख**
Venus	8.7765	**पराङ्मुख**
Saturn	0·0557	**पराङ्मुख**
Total	31·3232	(of which only about 8 are **अभिमुख** rays).

For persons possessing 31 rays, the following **फल** is stated in **जातकाभरण**, *viz*

येषां नूनं मानवानां प्रसूतावेकत्रिंशत् संख्यकाश्चेन्मयूखाः ।
विख्यातास्ते राजतुल्याः प्रधाना नाना सेनास्वामिनः संभवन्ति ॥

cf. Also **सारावली**

एकत्रिंशद्भिस्तु प्रवराः ख्याता महीभुजामिष्टाः ॥

This has been verified and found to be true.

Next we come to the रश्मिज Ayurdaya. It has to be observed here that this system of ayurdaya has to be adopted only when Mercury possesses the greatest Shadbala (sloka 33 *infra*).

The Sun's position is 1- 2 -55′-30″ and the Sun's exaltation is 0-10 - 0 - 0

Subtracting, we get 0-22°-55′-30″

As this is less than 6 signs, we have to subtract this from 12 signs. The result is 11 signs 7° 4′ 33″. The number of years given by the Sun is $\frac{11\text{-}7^\circ\text{-}4'\text{-}30''}{12} \times 10$ or $\frac{11{\cdot}2358}{12} \times 10 =$ 9·363 years. Similarly for the other planets.

Wherever the हरण mentioned in slokas 24 and 25 have to be applied, the same should be made and then only the aggregate आयुस् should be determined.

Sloka 26. The चक्रायुर्दाय is to be calculated in the case of a horoscope in which Venus has the greatest षड्बल. The years assigned to the several planets are those mentioned in *Adhyaya XVII*, sloka 6.

Assuming the Sun's position in any nativity to be 1 sign 2° 55′ 30″, he is 1975′·5 removed from the First Point of Aries.

As each star covers 13° 20′ or 800 minutes, the Sun is in the second quarter of the Star कृत्तिका having already traversed there 375·5 minutes. The भोग्यांश or untraversed portion is 424·5 minutes. The number of years of आयुर्दाय given by the Sun is therefore $\frac{424{\cdot}5 \times 5}{800} = \frac{84{\cdot}9}{32} = 2{\cdot}653$ years. Similarly in the case of the other plants. There is no हरण in this आयुर्दाय.

Sloka 27. The nine planets referred to in this Sloka are the seven planets from the Sun onwards and the two nodes Rahu and Ketu. The years assigned to them are those mentioned in Adhyaya XVIII, Sloka 3.

Sloka 28. This Sloka is from **मणित्थ**'s work.

Slokas 29–31 The latter half of Sloka 30 reads thus in **पराशरहोरा**

चन्द्रयोगेषु त्रिषु च चन्द्रे तु बलवत्तरे ॥

and seems to be the correct one.

The translation ought to be: "When the Sun has reached his exaltation and the other planets have attained their maximum strengths and occupy Kendra and Trikona positions, when all planets are in their exaltation, in the strongest **शश** or **हंसयोग** (*Adhyaya VII, Sloka* 59), in all other yogas reckoned as those of long-lived people, in the three **चान्द्र** yogas (**सुनफा, अनफा दुरुधुरा**–*vide Adhyaya VII-Sloka* 83) when the Moon is very strong, in the **महापुरुष** yogas (*Adhyaya VII, Sloka* 59) when the yoga-producing planets are possessed of exceeding strength, and in all Rajayogas (*Adhyaya VII-Slokas* 1-58), Parasara says **पिण्डायुस्** is to be calculated."

Sloka 32. This sloka appears in **पराशरहोरा**. But the latter half there reads as follows :

पूर्णे त्रिकोणोपचये शुभेषु पापेष्वथात्रोक्तमसंस्थितेषु ॥

Sloka 33. The following slokas from **पराशरहोरा** giving some more detailed information as to the several cases where **पिण्डायुर्दाय** &c. have to be reckoned will be found to be useful :

शुभाश्च केन्द्रे त्रिषडायभेऽन्ये विपर्यये पैण्ड्यमतः प्रदिष्टम् ।
रि:फाष्टषष्ठेषु सहस्ररश्मौ भौमे क्रमाच्छीतकरे तु पैण्ड्यः ॥
पापाल्लग्ने चाष्टमे सप्तमे वा सौम्याः षष्ठे कर्मभे रि:फभे वा ।
नीचाभावे पैण्ड्यदायः प्रदिष्टो मन्दे लग्ने स्वोच्चगे च ध्रुवाख्यः ॥
वीणायां कार्मुके चक्रे गदायामर्द्धचन्द्रके ।
रवौ पैड्योंशको लग्ने ध्रुवश्चन्द्रे च भूमिजे ॥
भिन्नाष्टवर्गः सौम्ये तु नक्षत्रांशसमुद्भवः ।
गुरौ नक्षत्रदायः स्यात्प्रक्रमानुगतः सिते ॥
समुदायाष्टवर्गस्तु मन्दे तु बलवत्तरे ।
वाप्या पाशे शरे पद्मे समुद्राकादिषु क्रमात् ॥

बलिष्ठेषु नवांशोत्थो ध्रुवः पैण्ड्यः स्वरांशकः ।
भिन्नाष्टवर्ग अंशोत्थो नक्षत्रांशक ईरितः ॥

रज्जौ विहङ्गे मालायां नले च मुसले क्रमात् ।
पैण्ड्यो ध्रुवः क्रमात्प्रोक्तो रव्यादौ तु बलोत्तरे ॥

गण्डे शक्तौ च शकटे यूपे केदारशूलयोः ।
प्रक्रमानुगतश्चाथ रश्मिजौ ध्रुवसंज्ञितौ ॥

अष्टवर्गसमुद्भूतौ क्रमादेवं बलोत्तरे ।
नौछत्रवज्रदामाख्ये स्वरदायोऽतिनीचगे ॥

कूटे गण्डे शरे नागे गोले शृङ्गाटके पुनः ।
कालकूटे क्रमात्प्रोक्ताः पैण्ड्याद्याः सप्त वै द्विज ॥

पैड्यास्त्रयो ध्रुवाश्चांशदायाश्चाष्टकवर्गकौ ।
द्रेष्काणेषु नवांशेषु द्वादशांशेषु च क्रमात् ॥

कलांशेषु नव प्रोक्ता दायाश्चैव पुनः पुनः ।
त्रिंशत्सवेदाः स्वरपाचकाश्च सुराश्च दन्ताः क्षितिपावकाश्च ।
षट्त्रिंशदिष्वग्नय एव भानि छन्दासिमूर्च्छाश्च जिनाः कराश्चेत् ॥
पैण्ड्यस्तथा द्वादशधा प्रभिन्नः क्रमेण दायो नियतः प्रदिष्टः ।
तत्वाग्निनन्दाग्नय एव रत्नदस्त्रास्त्रिदस्रा ध्रुवदायभेदाः॥
एकास्त्रयश्चेत्समुदायसंज्ञतस्ततस्तु वेदा इतरोऽष्टवर्गः ।
पञ्चादिकेष्वंशकदाय उक्तो रुद्राश्च सूर्या यदि पैण्ड्य आद्यः ॥
विश्वे मनुश्चेत्स्वरभागदायो नक्षत्रदायस्तिथिसंज्ञकश्चेत् ॥

नृपेत्यष्टित्रये प्रोक्ता आद्यपैण्ड्यभिदास्तथा ।
प्रक्रमानुगतो विंशात्यष्टत्रिंशेऽष्टवर्गजः ॥

चत्वारिंशत्त्रये पैड्यो नक्षत्रांशस्त्रये ततः ।
शेषेषु षट्सु पैड्यः स्यादाद्यो गर्गोयमाह च ॥

इष्टरश्म्यधिकप्रोक्तक्रम एव कराधिके ।
केन्द्रादिषु ग्रहाणां च वलोत्तरवशात् क्रमः ॥

बलोत्तरवशादेव स्थानेतरवशात्तथा ।
इष्टात्फलक्रमादेव रश्म्युक्तविधिना क्रमात् ॥

Slokas 35-36. *Vide* श्रीपतिपद्धति-V-37-38.

Slokas 40-44. cf. सारावली

द्विघ्नाः षष्टिर्निशाः पञ्च परमं नरदन्तिनाम् ।
द्वात्रिंशद्वाजिनामायुः छागादीनां तु षोडश ॥
खरोष्ट्रयोः पञ्चवर्ग एकोपोह्यं वृषादिषु ।
शुनां तु द्वादश प्रोक्तं गणितं परमायुषम् ॥
तत्तत्परं प्रमाणेन हत्वैषामायुरादिशेत् ।

Sloka 46. cf. फलदीपिका

(दशा) कष्टा भवेद्राश्यवसानभागस्थितस्य दुःस्थानपतेस्तथैव ॥

Sloka 47. cf. गुणाकर

दशायां यदि भूसूनोर्विशेदन्तर्दशा शनेः ।
भवेत्प्राणभृतां मृत्युस्तदा दीर्घायुषामपि ॥
षष्ठाष्टमगतः क्रूरः क्रूरसंस्थो विलोकितः ।
द्विषता क्रूरभस्थेन स्वदशायां मृतिप्रदः ॥
दशारिष्टं जयी युद्धे प्रस्फुरत्किरणोत्करः ।
निजोच्चादिस्थितो वाऽपि हीनस्त्वन्तर्दशाधिपः ॥

Sloka 48. cf. फलदीपिका

शनेश्चतुर्थी च गुरोस्तु षष्ठी दशा कुजाह्योर्यदि पञ्चमी सा ।
कष्टाभवेत् … … … …

Sloka 49. The sloka is also capable of the following interpretation: —

If the dasa of a planet in its depression, or in an inimical house or when eclipsed by the Sun happens to be the 3rd, the 5th or the 7th main dasa in a person's horoscope, it will prove fatal; and this will be the case all the more when the fatal dasas are associated with malefic planets also.

Sloka 50. cf. फलदीपिका

द्वावर्थकामाविह मारकाख्यौ तदीश्वरस्तत्र गतो बलाढ्यः ।
हन्ति स्वपाके निधनेश्वरो वा बलेश्वरो वाप्यतिदुर्बलश्चेत् ॥

Also पराशर

जायाकुटुम्बकाधीशौ मारकौ परिकीर्तितौ ।

Sloka 51. This sloka also appears in फलदीपिका. but the reading there is अष्टमस्य for अष्टमस्थ.

Slokas 52-53. *cf.* मन्त्रेश्वर

मन्दमान्द्यगुखरेशरन्ध्रपास्तन्नवांशपतयोऽपि ये ग्रहाः ।
तेषु दुर्बलदशामृतिप्रदाः कष्टभे चरति सूर्यनन्दने ॥
मृतीशनाथस्थितभांशकेशयोः खरत्रिभागेश्वरयोर्बलीयसोः ।
दशागमे मृत्युपयुक्तभांशकत्रिकोणगे देवगुरौ तनुक्षयः ॥

Also प्रश्नमार्ग

लग्नाद्वा यदि जन्मतो मृतिपतिर्मृत्युस्थतद्वीक्षकौ
मन्दः क्रूरदृगाणपो गुलिकपस्तैर्युक्तराश्यंशपाः ।
राहुश्चैषु सुदुर्बलो जनुषि यो भावेनभीष्टे स्थितः
पापालोकितसंयुतोऽस्य हि दशा वाऽन्तर्दशा मृत्युदा ॥
पापानां चेद्दशायामपहृतिरसतां चिन्तनीयोऽत्रमृत्यु–
र्गमासर्क्षेश्वराणामपि निजजनिभाद्दोषदः पाककालः ।
द्वित्र्यादीनां दशानां युगपदवसतिर्यत्र कालः स कष्टः
सर्वासां वा दशानामवसतिरशुभा दोषदानां विशेषात् ॥

Also फलदीपिका

रन्ध्रस्थरन्ध्रेक्षकरन्ध्रनाथरन्ध्रदृगाणाधिपमान्दिभेशाः ।
दुःखप्रदास्तेष्वपि दुर्बलो यः स नाशकारी स्वदशापहारे ॥

Sloka 54. The reading of this sloka in फलदीपिका is as follows :

तत्तद्भावाद्व्ययस्थस्य तद्भावव्ययपस्य च ।
वीर्यहीनस्य खेटस्य पाके मृत्युमवाप्नुयात् ॥

In the last ten slokas, (*i.e. Slokas* 45-54), the author has explained the various clues to find out the अरिष्ट period of the native. It will be useful to note here certain restricting provisos mentioned by Parasara, about planets & bhavas producing the रिष्ट.

चन्द्रभानू विना सर्वे मारके मारकाधिपाः ।
अष्टमाधिपतिर्दोषस्तुलामेषे न हि क्वचित् ।
अलौ षष्ठाष्टदोषो न वृषभोऽपि न दोषभाक् ॥

The good and evil donors of the several lagnas are thus described by the same author:

मन्दसौम्यसिताः पापाः शुभौ गुरुदिवाकरौ ।
न शुभं योगमात्रेण प्रभवेच्छनिजीवयोः ॥
परतन्त्रेण जीवस्य पापकर्मापि निश्चितम् ।
कविः साक्ष्यनिहन्ता स्यान्मारकत्वेन लक्षितः ॥
मन्दादयो निहन्तारो भवेयुः पापिनो ग्रहाः ।
शुभाशुभफलान्येवं ज्ञातव्यानि क्रियोद्भवैः ॥

जीवशुक्रेन्दवः पापाः शुभौ शनिदिवाकरौ ।
राजयोगकरः साक्षादेक एव रवेः सुतः ॥
जीवादयो ग्रहाः पापाः सन्ति मारकलक्षणाः ।
बुधस्तत्र फलान्येवं ज्ञेयानि वृषजन्मनः ॥

भौमजीवारुणाः पापा एक एव कविः शुभः ।
शनैश्चरेण जीवस्य योगो मेषभवो यथा ॥
नायं शशी निहन्ता स्याल्लक्षणं पापनिष्फलम् ॥
ज्ञातव्यानि द्वन्द्वजस्य फलान्येतानि सूरिभिः ॥

भार्गवेन्दुसुतौ पापौ भूसुताङ्गिरसौ शुभौ ।
एक एव ग्रहः साक्षाद्भूसुतो योगकारकः ॥
निहन्ता रविजोऽन्ये तु मानिनो मारकाह्वयाः ।
कुलीरसंभवस्यैव फलान्युक्तानि सूरिभिः ॥

रौहिणेयः सुतौ पापौ कुजजीवौ शुभावहौ ।
प्रभवेद्योगमात्रेण न शुभं गुरुशुक्रयोः ॥
घ्नन्ति सौम्यादयः पापा मारकत्वेन लक्षिताः ।
एवं फलानि वेद्यानि सिंहे यस्य जनुर्भवेत् ॥

कुजजीवेन्दवः पापा एक एव भृगुः शुभः ।
भार्गवेन्दुसुतावेव भवेतां योगकारकौ ॥
निहन्ता कविरन्ये तु मारकास्तु कुजादयः ।
प्रतीक्षेत फलान्युक्तान्येवं कन्याभवे बुधैः ॥

जीवार्कमहिजाः पापाः शनैश्चरबुधौ शुभौ ।
भवेतां राजयोगस्य कारकौ चन्द्रतत्सुतौ ॥
कुजो निहन्ति जीवाद्याः परे मारकलक्षणाः ।
निहन्तारः फलान्येवं काव्यो न तु तुलाभवः ॥

सौम्यभौमसिताः पापाः शुभौ गुरुनिशाकरौ ।
सूर्यचन्द्रमसावेवं भवेतां योगकारकौ ॥
जीवो निहन्ता सौम्याद्या हन्तारो मारकाह्वयाः ।
तत्तत्फलानि विज्ञेयान्येवं वृश्चिकजन्मनः ॥

एक एव कविः पापः शुभौ सौम्यदिवाकरौ ।
योगो भास्करसौम्याभ्यां निहन्ता भास्वतः सुतः ॥
घ्नन्ति शुक्रादयः पापा मारकत्वेन लक्षिताः ।
ज्ञातव्यानि फलान्येवं चापजस्य मनीषिभिः ॥

कुजजीवेन्दवः पापाः शुभौ भार्गवचन्द्रजौ ।
स्वयं चैव निहन्ता स्यान्मन्दो भौमादयः परे ॥
तल्लक्षणानि हन्तारः कविरेकः सुयोगकृत् ।
ज्ञातव्यानि फलान्येवं विबुधैर्मृगजन्मनः ॥

जीवचन्द्रकुजाः पापा एको दैत्यगुरुः शुभः ।
राजयोगकरो भौमः कविश्चैव बृहस्पतिः ॥
निहन्ता घ्नन्ति भौमाद्या मारकत्वेन लक्षिताः ।
एवमेव फलान्यूह्यान्येतानि घटजन्मनः ॥

मन्दशुक्रांशवः पापाः सौम्यो भौमविधू शुभौ ।
महीसुतगुर्वोर्योगे कारणेनैव भूसुतः ॥
मारकान्कारकान्वीक्ष्य मन्दज्ञौ घ्नन्ति पापिनः ।
इत्यूह्यानि फलान्येवं बुधैस्तु झषजन्मनः ॥

एतच्छास्त्रानुसारेण मारकान्निर्दिशेद्बुधः ।
चन्द्रसूर्यौ विना सर्वे मारकाः परिकीर्त्तिताः ॥
स्वदशायां स्वभुक्तौ च नराणां निधनं नहि ।
क्वचिद्दशायामिच्छन्ति स्वभुक्तौ न कदाचन ॥

Sloka 55. According to **बलभद्र,** the first and second Drekkanas of **कटक,** the first and second of **वृश्चिक** and the last of **मीन** are **सर्प** Drekkanas: For he says: " **कर्कस्य प्रथमद्वितीयौ वृश्चिकस्य प्रथमद्वितीयौ मीनस्यान्त्यश्चैते पञ्च सर्पद्रेक्काणाः** "

Sloka 56. It is evident that the 22nd **द्रेक्काण** reckoned from the **लग्नद्रेक्काण** is the first **द्रेक्काण** in the 8th house from the Lagna. The 64th **नवांश** from that occupied by the Moon means the first **नवांश** in the 8th house from the Moon.

Sloka 57. *cf.* **प्रश्नमार्ग**

लग्नेन्दू मानदानाभ्यां हत्वा मान्दिं क्षिपेद्द्वयोः ।
प्राणदेहौ क्रमात् स्यातां पुनर्मान्दिः सुताडितः ।
भानुयुक्तो भवेन्मृत्युर्विलिखेत् त्रीनिमानपि ॥

In the foot-note to this sloka given in page 109, for the figures 8° 52′ 30″ in the last but one line, read 2° 47′ 54″.

Slokas 60-66. These slokas are also quoted in **फलदीपिका.**

Sloka 63. But *cf.* **प्रश्नमार्ग**

जातस्याह्नि सषट्ग्रहो गतनिशा मान्दिप्रमाणाह्वये
रात्रौ प्राग्दिनमान्दिरेव न परं तद्राशिनाथालये ।
मन्दोमुष्य नवांशपाश्रितगृहे मृत्युप्रदायी गुरुः
भानुर्द्वादशभागपाश्रितगृहे त्रिंशांशपर्क्षे शशी ॥

Sloka 64. *First half.* But see also the following quotations; (1) **प्रश्नमार्ग**

अष्टमेशाश्रितं राशिमावसत्यहिमत्त्विषि ।
जन्मतारां विलग्नस्थतारकां वा मृतिर्भवेत्

(2) अनुष्ठानपद्धतिः

आत्माकांशकभत्रिकोणभगते सूर्ये चरस्थः स चेद्
यद्यर्कस्थिरभेऽष्टमेशनवभागेशर्क्ष (नवभागर्क्षत्रि) कोणस्थिते ।
लग्नेशस्थनवांशराशिसहिते तस्य त्रिकोणेऽ(पि) थवा
सूर्ये मृत्युमुशन्ति यद्युभयगः सोयं भवेज्जन्मनि ॥

Latter half. *cf.* **प्रश्नमार्ग**

सूर्याश्रितर्क्षगे चन्द्रे रन्ध्रेशाश्रितवेश्मनः ।
त्रिकोणोपगते चेन्दौ राह्वारुढोडुनस्तथा ॥

रन्ध्रेशाधिष्ठितोडौ वा निर्दिष्टं मरणं नृणाम् ।
धनेशाश्रितराशेर्वा तस्य सप्तमभस्य वा ॥
त्रिकोणस्थे धनेशांशराशिगे वा विधौ मृतिः ।
निजजन्मनि यस्मिन् भे गुलिकस्तत्रगे विधौ ॥

Sloka 66. *cf.* जातकादेश

रिपुनिधनान्त्यपतीनां लग्नाधिपगुलिकभानुजानां वा ।
स्फुटयोगजातराशित्रिकोणगे भानुजे भवेन्मरणम् ॥

Sloka 71. The following sloka from **गर्ग** gives another clue for ascertaining the **निर्याण** of any person.

यो राशिर्गुलिकोपेतस्तत्त्रिकोणं गते शनौ ।
मरणं निशि जातानां दिन (वि) जानां तदस्तके ॥

Sloka 72. *cf.* सारावली

उदयाद्द्वाविंशतितमद्रेक्काणो भवति कारणं मृत्योः ।
तस्याधिपतिभवो वा निर्याणं सूचयेत् स्वगुणैः ॥

Vide also *Adhyaya V. A. sloka 11 infra.* For the condition as to when this sloka has to be applied, see latter half of sloka 75, *infra.*

Sloka 73. *cf.* प्रश्नमार्ग

मान्द्यारूढनवांशकामगृहगाः सौम्याः सुमृत्युप्रदाः
पापास्तत्र गतास्तु दुर्मृतिकरास्तेष्वर्क उर्वीपतेः ।
क्षीणेन्दुः सलिले युधि क्षितिसुतः सूर्यात्मजो वञ्चना-
द्राहुः पन्नगदंशनान्मरणदो यद्वा विषस्पर्शनात् ॥

Sloka 74. *First quarter.* *cf.* सारावली

यो बलयुक्तो निधनं पश्यति तद्धातुकोपजो मृत्युः ।
तत्संयुक्तस्तनुजो बहुभिर्बलिभिर्बहुप्रकारः स्यात् ॥

For the humours of the several planets, see slokas 53-59 of Adhyaya, II. *supra.*

Second quarter. *cf.* यवन

दिनकरप्रमुखैर्निधनाश्रितैर्भवति मृत्युरि ति प्रवदेत् क्रमात् ।
अनलतो जलतः करवालतो ज्वरबलेन रुजा क्षुधया तृषा ॥

For the whole sloka, cf. **गुणाकर**

वीर्यान्वितः पश्यति मृत्युभं यस्तद्धातुकोपान्मृतिमामनन्ति ।
तद्युक्तकालाख्यनरस्य गात्रे तस्मिन् प्रदेशे बहुभिर्बहूनाम् ॥
सूर्यादिभिर्निधनगैर्निधनं हुताशतोयायुधज्वरजमामयजं क्रमेण ।
क्षुत्तृष्कृतं च चरभे परदेशगस्य तस्यस्थिरे स्वविशये पथि च द्विमूर्त्तौ ॥

Sloka 77. This sloka appears in **सारावली**. But the reading of the second quarter is different, *viz.* **कुजर्क्षे भास्करे स्थिते**

Slokas 78-79. A slightly different reading is given in **सारावली**, *viz.*

बलिना कुजेन दृष्टे क्षीणेन्दौ रन्ध्रगेऽर्कजे मृत्युः ।
गुल्ममहावेदनया क्रिमिदाहायुधकृतो भवति ॥
लग्नाच्छिद्रत्रिकोणेषु रव्यारार्किनिशाकरैः ।
मृत्युः स्याच्छैलपातेन शस्त्रकुड्यादिपाशजः ॥

See also *Adhyaya V-A. sloka 10, infra.*

Sloka 80. The following is the reading of the sloka as given in **होरासार.**

भौमार्कजौ यदिपरस्परभागसंस्थौ क्षेत्रेऽथवा निधनभेंशयुते च केन्द्रे ।
तस्यावसानसमये क्षितिपालकोपात् शूलादिनायुधशतैर्निधनं समेति ॥

Sloka 81. The following is the reading adopted in **होरासार.**

लग्ने शशी दिनकरे विबलेऽष्टमस्थे लग्नाद्व्यये सुखगतेऽपि च पापखेटे ।
जातस्य हस्तनयनच्युतदेशमृत्युः शस्त्रेण वा निशि निषादकृतेन वा स्यात् ॥

Sloka 83. The second **पाद** reads as **हीनौ धरासूनुब्रणेशयुक्तौ** in **सर्वार्थचिन्तामणि.**

Sloka 84. **देहेश्वरे** is the reading adopted in **सर्वार्थचिन्तामणि** for **दारेश्वरे** in the latter half of this sloka.

Sloka 85 This sloka reads thus in **सर्वार्थचिन्तामणि**

भुक्त्यङ्गपौ भानुसुतेन युक्तौ दुःस्थानगौ वा विषभक्षणेन ।
राहुध्वजाभ्यां सहितौ च दुःस्थावुद्बन्धनात्तस्य मृतिं वदन्ति ॥

Sloka 86. *Vide* also *Adhyaya XIV-sloka* 62 (latter half) *infra.*

Sloka 93. The verse reads thus in सर्वार्थचिन्तामणि.

धर्मे शनौ वा सगुरौ तृतीये करश्छिदोऽर्के निधने व्यये वा ।
विधौ कलत्रे निधनान्विते वा कुजेन युक्ते यदि वा सजीवे ॥
कर्मस्थिताश्चेद्यदि राहुमन्दसौम्याः पदच्छेदयुतोऽत्र जातः ॥

Sloka 94. This sloka is also in सर्वार्थचिन्तामणि. The reading of the first half is slightly different, *viz.*

शुक्रेज्यदृष्टे दिवसाधिनाथे सारे शनौ वा फणिनाथयुक्ते ।

Sloka 95. सर्वार्थचिन्तामणि reads कर्मान्विते for कन्यान्विते.

Sloka 96. The latter half reads thus in सर्वार्थचिन्तामणि

फणीन्द्रचन्द्रात्मजसंयुतेऽर्करश्म्याभिभूते ह्युदरस्य भेदः ।

Sloka 101. *cf.* होरासार

अर्केन्दू लग्नगतौ द्विदेहलग्नेषु पापयुग्दृष्टौ ।
कुरुतः प्राणवियोगं जलमध्ये निश्चयं ब्रूयात् ॥

Vide also V. A-4 *infra.*

Sloka *106*. *cf.* होरासार

चन्द्रात्त्रिकोणसंस्थैः पापैर्लग्नात्त्रिकोणसंस्थैर्वा ।
उद्बन्धबन्धनाद्यैर्निधने भौमेन संयुक्ते ॥

Sloka 107. *cf.* होरासार

अर्कोदयेऽर्कपुत्रे सुतगे रन्ध्रे विधौ कुजे भाग्ये ।
वृक्षाशनिकुड्यपातैर्योगैर्जनितस्य निर्दिशेन्मरणम् ॥

Sloka 109. For the same effect the following yoga is quoted in होरासार.

अर्ककुजौ व्ययसंस्थौ राहुः शशी सप्तमे गुरुः केन्द्रे ।
जातस्य मृतिं विन्द्यात्प्रवासभूमौ सुरालयोद्याने ॥

Sloka 111. *cf.* होरासार

भौमार्कजभवनेऽब्जे पापद्वयमध्यगे न सौम्ययुते ।
कन्यायां हिमगौ वा ज्वराग्निसंपातशस्त्रदोषैर्वा ॥

Vide also Adhyaya V' A-*Sloka 3*, *infra.*

Sloka 112. *cf.* होरासार

विषघटिकायां जातो निधनं क्रूरैर्विषाग्निशस्त्रैर्वा ।
निधनेश्वरे विषांशे क्रूरयुते तन्निमित्तदोषेण ॥
यदि च बहुग्रहयुक्ते रन्ध्रेशे रन्ध्रभेऽत्र संयुक्ते ।
बहुजनमरणे काले निधनं जातस्य निश्चयं ब्रूयात् ॥

Slokas 113–115. *cf.* होरासार

लग्नादष्टमराशेः स्वभावदोषोद्भवं विजानीयात् ।
निधनेशस्य नवांशस्थितराशिनिमित्तदोषजनितं वा ॥
मेषांशे मेषे वा ज्वरविषजठराग्निपित्तसंभूतः ।
येन ग्रहेण युक्ते दृष्टे वा तत्समानदोषेण ॥
वृषभे वृषभांशे वा त्रिदोषसाङ्कर्यशस्त्रदाहाद्यैः ।
ग्रहरहिते प्राप्तफलं ग्रहयुक्ते तत्समानदोषेण ॥
मिथुने मिथुनांशे वा कासश्वासोद्भवश्च शूलाद्वा ।
चन्द्रगृहे चन्द्रांशे वातान्मान्द्यादरोचकाद्वाऽपि ॥

स्फोटकशस्त्रविषाद्यैर्ज्वरैश्च सिंहे तदंशे वा ।
जठराग्निगुह्यकलहप्रपातनाद्यैश्च कन्यायाम् ॥

जूके तदंशके वा स्वबुद्धिदोषेण हन्यते पुरुषः ।
ज्वरसन्निपातदोषैर्मरणं ब्रूयाद्दशाफलयुतैर्वा ॥

वृश्चिकराशौ चांशे पाण्डुग्रहणीग्रहादिरोगहतः ।
विषशस्त्रजजलकाष्ठैश्चापांशे चापसंयुते मर्त्यः ॥

मकरे मकरांशे वा स्थूलानारुचिबुद्धिसंभवान्मृत्युः ।
पापयुते व्याघ्राद्यैः सर्पाद्यैर्वा न सन्देहः ॥

कुंभे कुंभांशे वा पापव्याघ्रशस्त्रभुजगाद्यैः ।
श्वासज्वरपक्षिकृतैर्ब्रूयान्मरणं समादिष्टम् ॥
मीने मीनांशे वा सर्पेण हतो ध्वान्तस्तत्रैव ।
नाब्जैर्वा जलमध्ये जलधरशब्देन पीडितो मृत्युः ॥

Sloka 117. *cf.* होरासार

अनुदितनवांशकाले मोहो द्विगुणः शुभग्रहो लग्ने ।
क्षेत्रोच्चांशकयुक्ते त्रिगुणं निधने न पापसंयुक्ते ॥

Sloka 118. *cf.* होरासार

जीवक्षेत्रोदये लग्ने सुरलोकं गमिष्यति ।
सूर्यभौमोदये क्षेत्रे मर्त्यलोकं गमिष्यति ॥
सौम्यपापयुते लग्ने मर्त्यलोकेषु जायते ।
बुधोदये तथा क्षेत्रे तिर्यग्जातिषु संविशेत् ॥
मन्दराश्युदये क्षेत्रे जीवलोकं गमिष्यति ।

Also *vide* Adhyaya V. A- sloka 14, *infra.*

Adhyaya V. A.

This chapter is no other than the नैर्याणिकाध्याय (Chapter XXV) of बृहज्जातक.

Sloka 1. For the different humours indicated by the several planets *vide* Adhyaya II, slokas 53-59. *cf.* V-74

Sloka 2. *cf.* सारावली

सूर्याङ्गारकयोः खबन्धुगतयोः शैलाग्रपातोद्भवो
मृत्युर्भूतनयेन्दुभानुतनयैः कूपे खसप्ताम्बुगैः ।
पापालोकितयोर्हिमोष्णकरयोः कन्यास्थयोर्बन्धतो
लग्ने सूर्यशशाङ्कयोस्तिमियुगे तोये सदा मज्जतः ॥

Sloka 3. *cf.* सारावली

कर्किणि मन्दे मकरे चन्द्रे मृत्युर्दरोदरकृतः स्यात् ।
पापांशस्थे चन्द्रे कुजभवने शस्त्रवह्निभवः ॥

कन्यायां पद्मिनीशत्रुः पापमध्यगतः सदा ।
रक्तोत्थशोषजं मृत्युं करोति ध्रुवमेव हि ॥

सौरर्क्षे शुभयोर्मध्ये शशी रज्ज्वग्निपातजम् ।
कुर्यान्मृत्युं न सन्देहश्चाणक्यवचनं तथा ॥

Sloka 4. cf. सारावली

नवमसुतयोरशुभयोः पापग्रहदृष्टयोर्भवेन्मृत्युः ।
द्रेक्काणैः पाशभुजगनिगलैश्छिद्रेऽथवा गुप्त्याम् ॥
मीनोदये दिनकरे चन्द्रे पापान्वितेऽस्तगे मेषे ।
स्त्रीहेतुकं हि मरणं स्वमन्दिरे स्याद्वदन्त्येके ॥

Sloka 5. cf. सारावली

रुधिरे सुखेऽथवार्के वियति यमे क्षीणचन्द्रसंयुक्तैः ।
पापैस्त्रिकोणलग्ने शूलप्रोतस्य निर्दिशेन्मरणम् ॥
हिबुकेऽर्के वियति कुजे क्षीणेन्दुयुतेऽर्कजेन संदृष्टे ।
काष्ठेनाभिहतः सन्म्रियते जातो न सन्देहः ॥

Sloka 6. cf. सारावली

क्षीणेन्दुभौमरविचन्द्रजसूर्यपुत्रैः छिद्रास्पदोदयसुखैर्लगुडाहतस्य ।
मृत्युर्वियन्नवमलग्नसुतस्थितैस्तैर्धूमाग्निबन्धनशरीरनिकुट्टनैः स्यात् ॥

Sloka 7. cf. सारावली

हिबुकास्तकर्मसहितैः कुजभानुशनैश्चरैर्भवति मृत्युः ।
आयुधहुतभुग्भूपतिकोपप्रभवः सदा पुंसाम् ॥
कर्माम्बुवित्तसंस्थैः कुजेन्दुमन्दैः क्षतः क्रिमिकृतोन्तः ।

Sloka 8. cf. सारावली

खस्थेऽर्केन्दुकुजे वा सुराप्रपानप्रतापकृतः ॥
सप्तमभवने भौमे क्षीणेन्दुदिवाकरार्किभिर्लग्ने ।
मरणं जातस्य वदेद्यन्त्रोत्पीडनभवमवश्यम् ॥
तुलायां रुधिरे याते कुजर्क्षे भास्करे स्थिते ।
चन्द्रे मन्दगृहं प्राप्ते विण्मध्ये मरणं भवेत् ।
गलितेन्द्वर्कभूपुत्रैर्गतैर्व्योमाष्टबन्धुषु ।
विण्मध्ये तु भवेन्मृत्युः सिद्धसेनः प्रभाषते ॥

Sloka 9. Vide notes to ch. V. Sl. 78.

Sloka 10. cf. सारावली

रवौ सरुधिरे द्यूने निधने रविसंभवे ।
रसातलस्थे हिमगौ मृत्युः पक्षिकृतो भवेत् ॥

For the latter half, *vide* Adhyaya V, sloka 79, *supra.*

S*loka 11.* For the cause of death due to each of the 36 Drekkanas happening to be the **खरद्रेक्काण,** the following slokas from **सारावली** will be found to be useful:

मेषाद्ये द्रेक्काणे क्रूरग्रहवीक्षिते च संयुक्ते ।
अम्ब्वहिविषपित्तकृतं मरणं नृणां समादेश्यम् ॥
विद्याद्द्वितीयभागे मरणं जलकृमिहिमारण्यैः ।
एवं तृतीयभागे तटाककूपप्रपाताद्वा ॥

करभाश्वखरोष्ट्रेभ्यो मृत्युर्ज्ञेयो वृषस्याद्ये ।
पित्ताग्निवातचोराद्द्वितीयभागे वृषस्यैव ॥

विद्यात् तृतीयभागे यानासनवाजिपातकृतम् ।
पुंसां भवंति हि मरणं रणशिरसि महास्त्रकृतमेव ॥
आद्ये मिथुनत्र्यंशे कासश्वासोद्भवो भवति ।
मृत्युर्महिषविषाद्याद्द्वितीयभागे च संनिपाताद्वा ॥
वनवासिचतुश्चरणात्पर्वतनागाद्व्रणात्तथारण्यात् ।
भवति हि मृत्युः पुंसामन्त्ले भागे तु ज्ञुतमस्य ॥
ग्राहेण मद्यपानात् कण्टकदोषेण वा तथा स्वप्नात् ।
भवति हि कर्कटकाद्ये मृत्युर्नृणां तृतीयभागे तु ॥

अभिघाताद्विषपानान्मध्ये त्र्यंशे भयं समादिष्टम् ।
विहगप्रमेहगुल्मासृक्कृतन्द्रीदोषेण च तथान्त्ये ॥
सलिलविषपाद्रोगार्त्सिहाद्ये त्र्यंशके भवेत्पुंसाम् ।
मध्ये तृतीयभागे नलामयकृतो घनोद्देशे ॥
विषशस्त्रयोगदोषैरभिशापाद्वा तथा च पाताद्वा ।
अन्त्ये सिंहत्र्यंशे भवति हि मृत्युर्न सन्देहः ॥
आद्ये कन्यात्र्यंशे मस्तकरोगात्तथाऽनिलान्मृत्युः ।
व्यालगिरिदुर्गवनजो मध्ये भूपात्मजादथवा ॥
करभखरशस्त्रतोयादतिखातात् स्त्रीकृतान्नपानाद्वा ।
अन्त्ये कन्यात्र्यंशे नृणां मृत्युः सदा दृष्टः ॥
आद्ये वणिक्त्रिभागे युवतिचतुष्पान्निपातदोषेण ।
मध्ये तु जठररोगैरन्त्ये व्यालाम्बुजातेभ्यः ॥

आद्येऽलिनस्त्रिभागे विषशस्त्रस्त्रीकृतान्नपानभवः ।
मध्ये तु वस्त्रभारस्रंसनरोगैर्भवति मृत्युः ॥
अन्त्ये तृतीयभागे लोष्टकपाषाणजनितवेदनया ।
भवति हि मरणं ह्यथवा नृणां जङ्घास्थिभङ्गकृतम् ॥

चापस्याद्ये त्र्यंशे गुदानिलसमुद्भवैर्विविधरोगैः ।
मध्ये विषगुरुदोषैरनिलकृतैर्वा भवेन्मृत्युः ॥
अन्त्ये तृतीयभागे जलमध्ये तत्समुत्थितैर्वाऽपि ।
मृत्युर्नृणां दृष्टो जठरामयदोषसंभूतः ॥

मकराद्ये द्रेक्काणे नृपहिंसाव्याघ्रकारणान्मृत्युः ।
ऊरुविनाशादथवा जलचरसत्वाद्विषैकशफसर्पात् ॥
दहनास्त्रतस्करेभ्यो ज्वरादमानुषविभेदनान्मध्ये ।
अन्त्ये मकरत्र्यंशे स्त्रीणां मृत्युः सदा दृष्टः ॥
कुम्भे प्रथमत्र्यंशे स्त्रीभ्यस्तोयैस्तथा जठररोगैः ।
ज्ञेयो मृत्युर्नृणां पर्वतगहनद्विपादैर्वा ॥

मध्ये स्त्रीकृतदुःखैर्गुह्यजरोगैर्भवति मृत्युः ।
अन्त्ये मिथुनचतुष्पदमुखरोगकृतैर्भवेत्पुंसाम् ॥
अंशे मीनयुगाद्ये गुल्मग्रहणीप्रमेहयुवतीभ्यः ।
जङ्घाजलजै रोगैर्गजग्रहकृतैः समादिशेन्मृत्युम् ॥
नौभेदाज्जलमध्ये झषे दृगाणद्वितीयजातानाम् ।
अन्त्ये भवति हि मरणं कुत्सितरोगैर्न सन्देहः ॥

S*loka 12. cf*. सारावली

उदयनवांशाधिपतेः समानभूमौ वदन्ति यवनेन्द्राः ।
ग्रहयोगेक्षणकाद्यैः परिकल्प्यं चान्यदपि तज्ज्ञैः ॥

For the latter half, *cf.* Adhyaya V, sloka 117, *supra.*

When the rising sign is aspected by its lord whch happens to be a benefic planet, the period of unconsciousness will be 2 × 3 or 6 times the period taken by the अनुदितांश of the Lagna to rise.

S*loka 13.* That is, if the 22nd Drekkana is a fiery one (*vide* Adhyaya IX-sloka 112, *infra*) and is owned by a malefic planet, the body will be burnt; if it be a watery one or benefic (*vide* Adhyaya IX, slokas 113-114, *infra*), the body will be thrown into the water. If the Drekkana in question being a mixed one (*vide* Adhyaya IX, sloka 115) is benefic but occupied by a malefic planet, or malefic but occupied by a benefic planet, then the body is neither burnt nor thrown in water, but is allowed to dry in the ordinary course (*i.e.* by exposure to the Sun and wind).

Adhyaya VI

Sloka 2. *cf.* सारावली

जूकस्य दशमे भागे स्थितः कमलबोधनः ।
सहस्रं राजयोगानां भङ्गमेव करोत्यसौ ॥

स्वत्रिकोणगृहं केचित्स्वोच्चं याताः स्वमन्दिरम् ।
अतिनीचे रविश्चैको न तेषां फलसंभवः ॥

सचिवो दानवेन्द्रस्य नीचांशे समवास्थितः ।
संप्राप्तमतुलं राज्यं नरैर्हापयते ध्रुवम् ॥

Also जातकाभरण

तुलायां नलिनीनाथः परमं नीचमाश्रितः ।
निर्दिष्टराजयोगानां दलनाय भवेद्ध्रुवम् ॥

प्रसूतौ दानवामात्यः परमं नीचमाश्रितः ।
करोति पतनं नूनं मानवानां महापदात् ॥

According to Skanda, the mere position of the planets in **नीचक्षेत्र** or **नीचनवांश** is not enough. They must also be in a certain particular bhava to be thus capable of marring the fortunes of the horoscope otherwise accruing. *cf.*

तुलायां दशमं भागमाश्रित्य यदि तिष्ठति ।
रविर्भिक्षोपजीवी स्याद्राजयोगेषु सत्स्वपि ॥

तृतीयं भागमाश्रित्य वृश्चिकेऽम्बुनि तिष्ठति
चन्द्रे याचितकं भुङ्क्ते जातोऽन्नं परवेश्मनि
अष्टाविंशमधिष्ठाय भागं कटकभे कुजे ।
लग्नस्थे शाकभुक्तैव जातः कुक्षिभरिर्भवेत् ॥
मीने पञ्चदशं भागमाश्रित्य मदनं गते।
क्लेशदैः कर्मभिस्तैस्तैर्जातः सौम्ये नयेद्वपुः ॥
मकरे पञ्चमं भागमाश्रित्य धिषणे शुभम् ।
अधितिष्ठति जातो यः सोयमुंछेन जीवति ॥
कन्यायां सप्तविंशेंशे भार्गवे पञ्चमं गते ।
यो जातः पुरुषः सोयं शिलवृत्त्यैव जीवति॥
अजभे विंशमाश्रित्य भागं धनगते शनौ ।
जातो यः पुरुषो नित्यं स श्ववृत्त्यैव जीवति ॥

Sloka 3. cf. सर्वार्थचिन्तामणि

ध्वजाहिमन्दैः सहितेन्द्रपूज्ये शुक्रेक्षिते वा शशिसूनुदृष्टे ।
शूद्रोऽपि चेद्विप्रसमानमेति विद्यां च सर्वामधिगम्य जातः ॥

Sloka 4. cf. सर्वार्थचिन्तामणि

तत्कालहोराधिपतौ धराजे केन्द्रे शनौ चेद्यदि वा विलग्ने ।
शुभग्रहाणामवलोकहीने दासस्तु भिक्षाशनदेहशीलः ॥

Sloka 5. cf. सर्वार्थचिन्तामणि

केन्द्रे शनौ लग्नगते शशाङ्के जीवे व्यये भिक्षुक एव जातः ।

Sloka 6. cf. सर्वार्थचिन्तामणि

जीवे सकेतौ यदि वा सराहौ चण्डालता पापनिरीक्षिते चेत् ।
नीचांशगे नीचसमन्विते वा जीवे द्विजश्चेदपि तादृशः स्यात् ॥

Sloka 7. cf. सर्वार्थचिन्तामणि

भाग्येश्वरे रिःफगते तदीशे वित्तस्थिते भ्रातृगतैश्च पापैः ।
केमद्रुमेऽस्मिन् स भवेत्कुभोजी दुष्कर्मयुक्तोऽन्यकलत्रगामी ॥
सर्वग्रहैर्नीसचपत्नभागैः कर्मान्यगैर्भिक्षुक एव जातः ॥

Sloka 8. cf. सर्वार्थचिन्तामणि

होरेश्वरे रिःफगते तु माने क्रूरान्विते भौमयुते शशाङ्के ।
जातोऽभिशस्तः परदेशवासी भिक्षाशनी दुःखितदेहभाक् स्यात् ॥
भाग्येस्वरे चान्त्यगते सपापे जन्मोदयेशौ रविगौ कुलघ्नः ।
विनष्टपुत्रार्थ कलत्रभाक् स्यात् शुभैर्नयुक्तौ यदि वीक्षितौ वा ॥

Sloka 9. cf. **सर्वार्थचिन्तामणि.**

शुभाशुभैः केन्द्रगतैः शशाङ्को लग्नेश्वरेणापि निरीक्षितंश्चेत् ।
सौरांशके वा यदि संयुतश्चेज्जातः कुलध्वंसकरो विदारः ॥

Sloka 10. cf. **सारावली**

अन्त्याष्टमादिभागे चरराश्यादिषु शशी यदा क्षीणः ।
एकेनापि न दृष्टो ग्रहेण भङ्गस्तदा नृपतेः ॥

Sloka 12. (First half). Vide also Adhyaya XIII, sloka 20, *infra.*

(*Latter half*). *cf.* **सर्वार्थचिन्तामणि**

समन्विताः सौम्यशशाङ्कशुक्राः केन्द्रस्थिता भोगिनि चेद्विलग्ने ।
चण्डालयोगः स भवेत्तदानीं जातो निजाचारसुकर्महीनः ॥

Also **जातकादेश**

शशिबुधशुक्राः केन्द्रे संयुक्ता राहुसंयुते लग्ने ।
चण्डालयोगमस्मिन् जातो निजवंशकर्मरहितः स्यात् ॥

Slokas 13-17. These are also quoted in **सर्वार्थचिन्तामणि.**

Sloka 18. cf. **सारावली.**

सर्वे क्रूराः केन्द्रे नीचारिगता न सौम्ययुतदृष्टाः ।
शुभदा व्ययरिपुरन्ध्रे तदाऽपि भङ्गो भवेन्नृपतेः ॥

Sloka 19. Vide also sloka 81 *infra.*

Sloka 20. The second half of this sloka is quite different in **सर्वार्थचिन्तामणि,** *viz.*

विवर्णतामेति फणीन्द्रयुक्ते माने तदा भौमयुते शिशुघ्नः ॥

Slokas 28-36. The following are some more **दरिद्र** yogas mentioned by **यवनाचार्य.**

लग्नाधीशो व्ययस्थो वै सक्रूरो वा विशेषतः ।
निर्बलोऽस्तं गताः सौम्या निर्द्रव्यो जायते नरः ॥
सकलकेन्द्रगताः खलखेचराः रिपुपराक्रमलाभगताः शुभाः ।
सकलवीर्यपराक्रमवर्जिताः सखलयो (*Sic*)र्मनुजो खलु निर्धनः ॥

लग्नाधिनाथोऽथ सुखाधिनाथः कर्माधिनाथोऽथ धनाधिपश्च ।
व्यये रिपौ कालभदे गृहे च गता विवीर्याः खलु निर्धनो जनः ॥
मदपतिर्यदि शत्रुगतो नरः सकलसौख्यविनाशनसंयुतः ।
तनुपतिर्यदि सूर्यसमायुतस्तनयगोऽथ खलग्रहसंयुतः ॥
लग्नाधिपे मृत्युगते विशेषमस्तं गतः कर्मपतिश्च षष्ठः ।
धनाधिपो द्वादशभावसंस्थः स एव जातो धनवर्जितश्च ॥
तनुपतिर्मदपश्च रिपुस्थितः सुतगताश्च खलाः सबलाः खलु ।
गुरुभृगू यदि चास्तमुपागतौ जगति सौख्यविवर्जितमानवः ॥

धनाधिपो मृत्युगतोऽत्र संस्थः क्रूरग्रहेणाथ विलोकितश्च ।
लग्नाधिपः षष्ठगतो विवीर्यो जातः पृथिव्यां खलु निर्धनश्च ॥

लग्नस्वामी हीनवीर्यो द्रव्यनाथोऽस्तगो यदा ।
केन्द्रगाः सबलाः क्रूरा दरिद्रो मानवो भवेत् ॥

सक्रूरं धनभं चैव क्रूरेणैव निरीक्षितम् ।
धनपो रविसंयुक्तो दरिद्रोपहतो नरः ॥

सक्रूरो धनपश्चैव धनभं सौम्यसंयुतम् ।
धनस्वामी चास्तगतो मानवो द्रव्यवर्जितः ॥

धनाधिपो यदा षष्ठे मृत्युभेऽप्यथवा व्यये ।
सक्रूरं धनभं चैष निर्धनः खलु मानवः ॥

चतुष्टयं शुभरहितं सक्रूरं कुजवर्जितम् ।
दशमं भवति तदा दारिद्र्येणैव पीडितः ॥

लाभषष्ठविगताः खलु सौम्याः द्रव्यनाथखचरोऽस्तगतश्चेत् ।
अस्तगौ गुरुसितौ तु लग्नपो द्वादशे हि नरो यदि निर्धनः ॥

लग्नाधीशो द्रव्यनाथश्च षष्ठे कर्माधीशः संयुतः पापखेटैः ।
सक्रूरं वै द्रव्यभं क्रूरदृष्टं दारिद्रो वै मानवो योगदृष्टे ॥

धनभं क्रूरसंयुक्तं क्रूरदृष्टं तथा पुनः ।
धनस्वामी तृतीये वै दारिद्रो नाम जायते ॥

पापाश्चतुर्षु केन्द्रेषु तथा पापो धने स्थितः ।
दारिद्र्ययोगं जानीयात्स्ववंशस्य क्षयं करः ॥
रविणा सहितो मन्दः शुक्रेण च युतो भवेत् ।
तदा दरिद्रयोगोऽयं सद्रव्यमपि शोषयेत् ॥

तस्य भङ्गोऽयम् ॥

सिंहे मेषे यदा भानुः सितमन्दयुतो भवेत् ।
गुरुसौम्यसमालोकी सधनी भवति ध्रुवम् ॥

Sloka 36. cf. सर्वार्थचिन्तामणि

नीचस्थिता जन्मनि ये ग्रहेन्द्राः स्वोच्चांशगा राजसमानभाग्याः ।
उच्चस्थिता चेदपि नीचभागा ग्रहा न कुर्वन्ति तथैव भाग्यम् ॥

Soka 46. cf. होरारत्न

सप्तमे क्रूरसंदृष्टाः क्रूरा दन्तविकारदाः ।
पापैर्दृष्टेऽजगोचापलग्ने विकृतदन्तवान् ॥

Sloka 48. This and the next two slokas as well as sloka 52 are from बृहज्जातक. In the translation, for the words "two legs and two hands," read "four legs and four hands."

First half. The above result should not be predicted unless the characteristic combinations mentioned are complete. If the characteristics are incomplete, an inordinate largeness of the organs named should be foretold. Some commentators take the word त्रिकोण in the sloka to mean मूलत्रिकोण of Mercury, that is कन्या. But this has to be rejected on the authority of **गार्गि** who distinctly says:

बलहीनैर्ग्रहैः सर्वैर्नवपञ्चमगे बुधे ।
द्विगुणाङ्घ्रिशिरोहस्तो भवत्येकोदरस्तथा ॥

Second half. By the words "malefic planets are in the Riksha Sandhis," it is to be understood that all the three malefics, *viz.*, Saturn, Mars, and the Sun are jointly or severally to be in the last portion of any one are more of कटक, वृश्चिक and **मीन**. By the words "after a long time," nothing more is meant than "later than the ordinary time within which a child may be naturally expected to speak."

The last quarter of the sloka, *viz.*, शुभेक्षितश्चेत्कुरुते गिरं चिरात् leads to the inference that such Moon should also have malefic aspect to make the person mute.

This is supported by गार्गि who says

कुलीरालिझषान्तस्थैः पापैश्चन्द्रे वृषोपगे ।
मूकः पापेक्षितैः सौम्यैश्चिरेण लभते गिरम् ॥
मिश्रदृष्टैर्यथा वीर्यं फलं बोध्यं मनीषिणा ।

Unless therefore all the three malefics are thus placed and the Moon has a malefic aspect, the prediction should not be made. If there be only two malefics thus placed, then frugality or smallness of speech and if only one, wavering slow or stammering speech should be foretold. But if such Moon has the aspect of one or more benefic planets, the person will begin to speak later than when he would otherwise be naturally expected to speak It must thus be remembered that the aspect of malefics is also required to make the native mute, and the aspect of benefics to counteract it.

cf. गुणाकर

त्रिकोणगे बुधे परैर्विलोहितैर्नभश्चरैः
भवेन्मुखाङ्घ्रिपाणिभिर्द्विसङ्गुणैस्तदा शिशुः ।
भसन्धिगैरसद्ग्रहैरवाग्वृषे गतः शशी
शुभैर्विलोकितश्चिराद्गिरं करोति शीतगुः ॥

Also सारावली

क्रूरैर्गृहसन्धिगतैः शशिनि वृषे भौमसौरिरविदृष्टे ।
मूकः सौम्यैर्दृष्टे वाचं कालान्तरे वदति ॥
सौम्ये त्रिकोणसंस्थे लग्नाच्छेषग्रहैर्बलविहीनैः ।
द्विगुणास्यपादहस्तो योगेऽस्मिन्नाहितो भवति गर्भः ॥

The word गवि in the sloka in the text may also mean "in the house of speech," *i.e*, the second house from the Lagna. This view is supported by स्कन्दहोरा where it is laid down thus:

ऋक्षसन्धिगतैः पापैर्दृश्यमानो निशाकरः ।
द्वेधा गविष्ठो वाग्घानिमाधाने जनयेद्ध्रुवम् ॥

Sloka 49. cf. गुणाकर

सदन्तं सौम्यभांशस्थौ कुरुतो मन्दभूमिजौ ।
कर्कलग्ने विधौ कुब्जं सूते मन्दारवीक्षितः ॥

सेन्दौ विलग्ने पृथुरोम्नि जातः पुंगर्भवत्यार्किकुजेन्दुदृष्टे ।
क्रूरग्रहे सन्धिगते सचन्द्रे जडः शुभालोकनवर्जिते च ॥

Also सारावली

क्रूरेषु राशिसन्धिषु शशी न सौम्यैर्निरीक्ष्यते च जडः ।
बुधनवमभागसंस्थौ शशिभौमौ यदि सदन्तः स्यात् ॥
शशिनि विलग्ने कर्किणि कुजार्कदृष्टेऽथवा कुब्जः ।
मीनोदये च दृष्टे कुजार्किशशिभिः पुमान् भवति पङ्गुः ।
व्यर्था भवन्ति योगाः सौम्यग्रहवीक्षिताः सर्वे ॥

Sloka 50. cf. गुणाकर

मृगान्त्यलग्नेऽर्कशनीन्दुदृष्टे प्रकीर्त्तितं वामनकस्य जन्म ।
धीधर्मलग्नोपगतैर्दृगाणैः सपापकैः स्याद्विभुजाङ्घ्रिमूर्द्धः ॥

Also सारावली

वामनको मकरान्त्ये लग्ने रविचन्द्रसौरिभिर्दृष्टे ।
भौमयुतो द्रेक्काणस्त्रिकोणलग्नेषु भेषु संदृष्टः ॥
विभुजाङ्घ्रिमस्तकः स्याच्छनिरविचन्द्रैर्वदेद्गर्भः ॥

The words धीनवमोदयगैश्च दृगाणैः पापैः have been interpreted thus: "If Mars occupy the 1st, 2nd or 3rd Drekkana of the Lagna." But this is opposed to the opinion of गर्ग from whose works the next sloka has been quoted.

Sloka 51. This sloka is from गर्गहोरा where the reading is slightly different; viz., लग्ने द्रेक्काणगो भौमः &c. In order to complete the idea given in sloka 50 above, this has to be read with the following first half of the next sloka in that work, *viz.,*

विपदं नवमस्थाने यदि सौम्यैर्नवीक्षितः ।

Its omission from the text must only be accidental. The translation should therefore be thus:

Mars occuping the first (rising) Drekkana of the Lagna and aspected by the Sun, the Moon and Saturn, produces a headless child. The child will be born armless if Mars occupy the first (rising) Drekkana of the 5th house and be aspected by the same three planets. The child born will have no legs if Mars under the same aspect occupy the first Drekkana of the 9th house from the Lagna.

Sloka 52. *cf.* सारावली

स्यातां यद्याधाने रविशशिनौ सिंहराशिगौ लग्ने ।
दृष्टौ कुजसौरिभ्यां जात्यन्धः संभवति तत्र ॥
आग्नेयसौम्यदृष्टौ रविशशिनौ बुद्बुदेक्षणं कुरुतः ।
नयनविनाशोऽपि यथा तथाऽधुना संप्रवक्ष्यामि ॥
व्ययभवनगतश्चन्द्रो वामं चक्षुर्विनाशयति हीनः ।
सूर्यस्तथैव चान्यच्छुभदृष्टौ याप्यतां मयतः ॥

Also सर्वार्थचिन्तामणि

चन्द्रार्कसंयुक्तहरौ विलग्ने शन्यारदृष्टेऽक्षिविनाशमाहुः ।
शुभाशुभैर्बुद्बुदलोचनः स्याच्छुभैर्न दोषः सहितेक्षणाभ्याम् ॥

Also गुणाकर

अन्धो भवेद्धरणिनन्दनमन्ददृष्टे सिंहोदये कमलकैरवबन्धुयुक्ते ।
सौम्याशुभैर्भवति बुद्बुदनेत्रयुग्मो वामं हिनस्ति सितगुर्व्ययगोऽन्यदर्कः ॥

Bhattotpala, the commentator, adds that if the Lagna (सिंह) be occupied by the Sun alone and be aspected by Mars and Saturn, the child will be blind of the right eye. He will be blind of the left eye if the Moon alone should occupy सिंह and be aspected by Mars and Saturn.

Sloka 54. *cf.* सर्वार्थचिन्तामणि

दिनेशचन्द्रौ व्ययगौ तदानीमन्धो भवेत्सौम्यदृशा विहीनौ ।
युक्ते तयोरन्यतरेण रिःफे काणो भवेत्सौम्यदृशा विहीने ॥

Sloka 56. *Vide* sloka 54 *supra.*

Slokas 59–67. These slokas are quoted in सर्वार्थचिन्तामणि.

Sloka 62. There is a slightly different reading given of this sloka, *viz.*,

लग्ने रविर्भूमिसुतेन दृष्टः श्वासक्षयं विद्रधिगुल्मभाजम ।
भौमे विलग्ने शनिसूर्यदृष्टे खड्गादिभिः पीडितदेहभाक् स्यात् ॥

Sloka 64. वीर्याधिपे is another reading for वीर्यान्विते. *Vide* also Adhyaya XII, sloka 42 *infra.*

Sloka 66. *Vide* also Adhyaya XII, sloka, 43 *infra.*

Sloka 68. *First half. cf.* **सर्वार्थचिन्तामणि**

रोगस्थानगते सूर्ये तद्भावे पापसंयुते ।
पापदृष्टियुते नाभौ पैत्तिकाद्व्रणमादिशेत् ॥

Sloka 69. *First half. cf.* **सर्वार्थचिन्तामणि**

षष्ठे कुजे बुधयुते भृगुचन्द्रनिरीक्षिते ।
क्रूरांशकसमायुक्ते क्षयरोगं वदन्ति हि ॥

Slokas 70-76. These slokas are quoted in **सर्वार्थचिन्तामणि.**

Sloka 71. In the second **पाद** of this sloka, **सह स्थिताः सौख्यगृहे व्यये वा** is another reading.

Sloka 79. **लग्ने गुरौ** is the reading adopted in some books for **लग्ने रवौ** and appears to be the correct one. *cf.* **प्रश्नमार्ग**

लग्नस्थे धिषणे दिवाकरसुतो भौमोऽथवा द्यूनगे
मन्दे लग्नगते मदात्मजतपःसंस्थे महीनन्दने ।
मूर्त्तौ मूढशशीन्दुजौ कृशशशी मन्दश्च रिःफे स्थितौ
पापोपेतकृशामृतांशुरुदयायुःस्वान्त्यधर्मोपगः ॥
अस्ते पापयुतो मान्दिर्वित्रिषष्ठाष्टमान्त्यगः ।
उन्मादददायिनो योगा एवमष्टौ समीरिताः ॥

The latter half of the sloka in the text should therefore be translated thus: "When Saturn is in the Lagna and Mars occupies the 7th house or a Trikona position, the person concerned will be a lunatic."

Sloka 80. The last quarter reads as **शन्यारवारे यदि जन्मकाले** in **सर्वार्थचिन्तामणि.**

Also *cf.* **जातकादेश**

नवमोदयात्मजस्थौ रविचन्द्रौ भ्रातृकेन्द्रगे जीवे ।
युक्ते शनिकुजवारे जातः सोन्माद इव चपलः स्यात् ॥

Sloka 81. *cf.* **जातकादेश**

बुधचन्द्रौ केन्द्रगतौ नान्यग्रहतर्कितौ नृपतिदृष्टौ ।
योगोऽयं पैशाचस्तत्रोत्पन्नः स सोन्मादी ॥

Sloka 88. First half. cf. सर्वार्थचिन्तामणि

जलराशिगते चन्द्रे षष्ठे तद्भवनाधिपे ।
जलर्क्षस्थविदा दृष्टे मूत्रकृच्छ्रादिकं भवेत् ॥

Sloka 92. cf. प्रश्नमार्ग

पापग्रहेक्षितं लग्नं रन्ध्रं रविजवीक्षितम् ।
रन्ध्रेशो विमलो योग एष भुक्तविरोधकृत् ॥

Sloka 96. cf. सर्वार्थचिन्तामणि

षष्ठे चन्द्रे शनौ रन्ध्रे व्यये पापे विलग्नपे ।
पापांशकसमायुक्ते पीनसं रोगमादिशेत् ॥
षष्ठे शनौ सगुलिके रव्यारफणिवीक्षिते ।
शुभैर्न दृष्टे युक्ते वा श्वासकासक्षयादियुक् ॥

Sloka 97. cf. सर्वार्थचिन्तामणि

शन्यारसहिते षष्ठे रविराहुनिरीक्षिते ।
लग्नेश्वरे हीनबले दीर्घरोगी भवेन्नरः ॥

Sloka 99. This sloka as well as the next one are from बृहज्जातक.

For the latter half, *cf.* गार्गिः

पञ्चमे नवमे द्यूने समेतौ सितभास्करौ ।
यस्य स्यातां भवेद्भार्या तस्यैकाङ्गविवर्जिता ॥

Also *cf.* सारावली

लग्नाद्व्ययरिपुगतयोः शशाङ्कभान्वोर्वदन्ति पुरुषस्य ।
प्रभवं समस्तमुनयः क्रमेण पत्न्या सहैकनयनस्य ॥
द्यूने कुजभार्गवयोर्जातः पुरुषो भवेद्विकलदारः ।
धीधर्मस्थितयोर्वा परिकल्प्यं पण्डितैरेवम् ॥

Sloka 100. cf. गुणाकर

एते त्रिलाभप्रतिमा शुभस्थाः सौम्यग्रहालोकनवर्जिताश्च । (अर्केन्दुमहीजमन्दाः)
कर्णोपघातं जनयन्ति पुंसामनङ्गगास्ते विकृतिं रदानाम् ॥

Adhyaya VII.

Sloka 1. In the first line of the translation, for the words "**कन्या, मिथुन, वृषभ,**" read "**कन्या, मीन, मिथुन, वृषभ,**".

In this as well as in the next sloka, the author has described in a very condensed manner the **सिंहासन** and other yogas. With a view to make them clearer, the following are extracted from other works and appended below :—

(1) सिंहासनयोगः सोमजातके
एष सिंहासनो योगः कन्यालौ वृषके झषे ।
चापे नरे हरौ कुम्भे ग्रहैश्चैव परो मतः ॥
दन्ती तुरङ्गयुक्तो नौकावेष्टी गुणी कान्तः ।
नृपसचिवो भवति नृपो योगे सिंहासने जातः ॥
भावकुतूहले
कन्यामीनवृषालिभे यदि खगाः सिंहासनः कीर्तितः
किं वा चापनृयुग्मकुंभहरिभे खेटे हि सिंहासनः ।
यः सिंहासनयोगतो हि मनुजो भूपाधिराजो बली
गर्जत्कुञ्जरवाजिराजिमुकुटारूढो धरामण्डले ॥

(2) चतुश्चक्रयोगः सोमजातके
हरौ स्त्रियामलौ वाऽपि घटे मीने वृषे नरे ।
ग्रहैर्लग्ने च योगोऽयं चतुश्चक्रोऽभिधीयते ॥
चक्रवर्ती महावीर्यः सर्वज्ञः सर्वजीवनः ।
आज्ञामयो महातेजा पराक्रमी नृपो भवेत् ॥
भावकुतूहले
वृषे सिंहे कन्याकलशमिथुनान्त्यालितुरगे
समाजः खेटानामिह भवति जन्मन्यपि नरः ।
चतुश्चक्रे योगे सकलसुखभोगेन मिलितो
महीपानामालीमुकुटमणिपाली विजयते ॥

(3) कनकदण्डयोगः सोमजातके
मीने मेषे वृषे चैव तुलायां च स्थिते ग्रहे ।
योगः कनकदण्डाख्यो देवासुरसुदुर्लभः ॥

(4) डमरुकयोगः   सोमजातके

वृषे च मिथुने चापे कीटे डमरुको मतः ।
अपरो युवतीसिंहे घटे मीने उदाहृतः ॥
जातो डमरुके योगे विद्याविख्यातकीर्तिमान् ।
परोपकारी दाता च नारीहृदयवल्लभः ॥

(5) ध्वजयोगः   सोमजातके

मेषे वृषे झषे वाऽपि स्थितः स्थाने ग्रहो यदि ।
दोलाछत्रप्रदो योगे राजयोगध्वजोत्तमः ॥
यो जातो ध्वजयोगे स भवति नीचोऽपि दोलया युक्तः ।
अन्यो भवति हि सचिवो नृपजो भवति नृपो न सन्देहः ॥

(6) एकावली.   सोमजातके

एकैकग्रहयोगेन भवेदेकावली शुभा ।
लग्नं विना शुभैर्वाऽपि स मता कस्यचिन्मते ॥
दाता भोक्ता प्रचुरयुवतीनां निधीनां निधान-
मेकावल्यां भवति सचिवः सर्वराज्यं पृथिव्याम् ॥

भावकुतूहले

एकैकेन खगेन जन्मसमये सैकावली कीर्त्तिता
मुक्तालीव समस्तभूपमुकुटालङ्कारचूडामणिः ।
तज्जातो रिपुपुंजभञ्जनकरी गन्धर्वदिव्याङ्गना-
वृन्दानन्दपरो गुणव्रजधरो विद्याकरो मानवः ॥

(7) राजहंसयोगः   सोमजातके

घटे मेषे नरे चापे तुलायां सिंहगे ग्रहे ।
राजहंसो भवेद्योगो राज्यस्य स सुखप्रदः ॥

(8) चतुःसागरयोगः   सोमजातके

तुलामकरमेषेषु कर्कटे वा स्थिते ग्रहे ।
चतुःसागरयोगोऽयं राज्यदो धनदो मतः ॥
नैकवाणिज्यकुशलः शास्त्रज्ञः स्थानतत्परः ।
भूपतिर्नृपतुल्यो वा चतुःसागरयोगजः ॥

भावकुतूहले

यदि तुलामकराजकुलीरभे रविमुखाः सकला विलसन्ति चेत् ।
इह चतुष्कमहोदधिसंज्ञकः सुरपतेः समतां तनुते नृणाम् ॥

(9) गृध्रपुच्छयोगः सोमजातके

मृगे कीटे भवेत्पुच्छः कन्यालौ वृषभे झषे ।
गृध्रपुच्छो भवेद्योगश्चतुःसागरतः शुभः ॥

(10) चिन्हपुच्छयोगः सोमजातके

मृगे कर्किणि सिंहे च चापे वा मिथुने घटे ।
योगानामुत्तमो योगो चिन्हपुच्छो महाफलः ॥

(11) प्रचण्डयोगः भावकुतूहले

कुलीरे कन्यायामनिमिषधनुर्युग्मभवने
जनुः काले यस्य प्रभवति नभोगो रविमुखः ।
प्रचण्डप्रोत्तुङ्गप्रबलरिपुहन्ता क्षितिपतिः
समन्तादाधिक्यं व्रजति धनदानेन महताम् ॥

(12) श्रीछत्रयोगः भावकुतूहले

प्रसूतिकाले यदि सर्वखेटैस्तनुव्ययाङ्गार्थगृहस्थितैश्चेत् ।
पुरातनात्पुण्यत एव पुंसां श्रीच्छत्रयोगं प्रवदन्ति सन्तः ॥

Sloka 3. The first sentence of the translation should read thus: "If all the planets are associated with the Moon's hora (चन्द्रहोरा), the person born will be a famous King."

In the last line of the translation, for "9th," read "10th."

Sloka 4. In the 2nd line of the translation of this sloka, for the words "the 10th and the 7th bhavas," read "the 10th, the 7th and the 4th bhavas." The number of yogas satisfying all the conditions described in this sloka will, if carefully analysed, be found to be very limited.

The following horoscope is suggested as an example for this sloka.

Meena Lagna; the Sun in Simha; the Moon in Meena; Mars in Vrischika; Mercury in Kanya; Jupiter in Dhanus; Venus in Tula; and Saturn in Makara.

But see the following sloka from सारावली.

सुखतनुमदगाः शुभाः समग्राः कुजरविरविजास्त्रिधर्मलाभसंस्थाः ।
यदि भवति महीपतिः प्रशान्तो यवनपतिकृतो ह्ययं महीपयोगः ॥

Sloka 5. According to बृहत्प्राजापत्य, बृहज्जातक, सारावली and other works, four or more planets (other than the Moon) aspecting a Vargottama Lagna or Moon will make the person born at that time a King.

cf. बृहज्जातक

वर्गोत्तमगते लग्ने चन्द्रे वा चन्द्रवर्जितैः ।
चतुराद्यैर्ग्रहैर्दृष्टे नृपा द्वाविंशतिः स्मृताः ॥

Also सारावली

गणोत्तमे लग्ननवांशकोद्गतो निशाकरश्चापि गणोत्तमेऽथवा ।
चतुर्ग्रहैश्चन्द्रविवर्जितैस्तदा निरीक्षितः स्यादधमोद्भवो नृपः ॥

Also जातकाभरण

वर्गोत्तमेऽमृतकरे यदि वा शरीरे संवीक्षिते च चतुरादिभिरिन्दुहीनैः ।
द्वाविंशतिप्रमितयः खलु संभवन्ति योगाः समुद्रवलयक्षितिपालकानाम् ॥

Also माण्डव्य

विलग्नभवनं गते बलयुते च वर्गोत्तमे
चतुःप्रभृतिभिर्ग्रहैः शशिनि वा समालोकिते ।
स संभवति पार्थिवः खलु कृपाणपाणीरणे
कदाचिदपि वीक्षते रिपुजनो न यस्याननम् ॥

But our author has gone further by restricting the position of the planets. According to slokas 30-31 of the 2nd Adhyaya, Saturn in the 4th or the 11th house, Mars in the 6th or the 10th house and Jupiter in the 5th or the 9th house, all counted from the Lagna or the Moon, are also capable of aspecting either of them respectively as all planets are while they are in the 7th house. Our author has rejected the aspects of Saturn from the 11th house, of Mars from the 6th house and of Jupiter from the 5th and 9th houses. He only accepts the aspects of Saturn from the 4th house, of Mars from the 10 house and of Jupiter and other planets from the 7th house. His object would appear to be to place all the planets in the three Kendras, 4th, 7th and 10th and in such a manner as to be capable of bestowing their full aspect on the Lagna or the Moon as the case may be. The least number of planets thus situated and capable of aspecting the Vargottama Lagna or the Moon is four. चन्द्रविमुक्तखेटैः *i.e.*, "by planets other than the Moon" has reference only so far as Lagna yogas are concerned, for the Moon cannot aspect itself. But the question is "Will the aspect of the Moon on the Lagna nullify the yoga if it is otherwise complete?" The answer is in the negative. In this case, the Moon's aspect does not count, being productive of neither good nor evil and the Moon cannot be one of the planets making up the least number of four above stated. *cf.* बृहत्प्राजापत्य.

लग्ने वर्गोत्तमांशस्थे दृश्यमाने नभश्चरैः ।
चतुर्भिः पञ्चभिः षड्भिरपि चेति द्विविंशतिः ॥
चन्द्रे च तादृशे चेत्थं राजयोगान् समासतः ।
जानीहि भोः सौम्य चतुश्चत्वारिंशदिदं च ते ॥
वक्ष्यामि लग्नयोगेषु संशयः स्यात्तथान्यथा ।
चन्द्रः पश्यतु कामं स द्रष्टृत्वेन न गण्यते ॥

There will be 22 yogas *viz.*,

${}^{6}C_{4} + {}^{6}C_{5} + {}^{6}C_{6} = 15 + 6 + 1$ for each of the Lagna and the Moon, or 44 yogas in all.

Sloka 6. (First half). cf. जातकादेश

अश्विन्यां लग्नगः शुक्रः सर्वग्रहनिरीक्षितः ।
करोति पृथिवीपालं निर्जितारातिमण्डलम् ॥

Also फलदीपिका

अश्विन्यामुदयगतो भृगुर्ग्रहेन्द्रैर्दृष्टश्चेज्जनयति भूपतिं जितारिम् ॥

The following from सारावली mentioning the several asterisms which, when occupied by Venus, confer kingship will also be of interest:

कृत्तिकारेवतीस्वातीपुष्यस्थायी भृगोः सुतः ।
करोति भूभुजां नाथमश्विन्यामपि संस्थितः ॥

Latter half. *cf.* जातकादेश

नीचांशकान् परित्यज्य त्र्यादिक्षेत्रोच्चसंस्थिताः ।
तेषामेको विलग्नस्थः कुर्वन्ति पृथिवीपतिम् ॥

According to बृहत्प्राजापत्य, बृहज्जातक and other works, three or four planets in their exaltation (स्वोच्च), in their own houses (स्वक्षेत्र), or in their Mulatrikona (मूलत्रिकोण) make a person *born in the royal family*, a King. Five or more such planets will make *any person* a King. But two such planets in the first case or four such in the second case will only make the person rich. *cf.* बृहत्प्राजापत्य.

सर्वैस्त्र्याद्यैः स्वतुङ्गस्थैः सर्वैः स्वक्षेत्रगैरुत ।
सर्वैर्वा स्वत्रिकोणस्थैर्नृपः स्यान्नृपवंशजः ॥
पञ्चादिभिस्तथा भूतैर्ग्रहैरन्योऽपि नान्यथा ।
द्वाभ्यां चतुर्भिरेते स्युरुभये धनिनः परम् ॥

It has also to be noted here that it is only when the 5 or 6 planets in स्वक्षेत्र are *strong* that the person born becomes a King. If they or any of them be weak, he only becomes rich. But seven planets in स्वक्षेत्र will, irrespective of their strength, make the person a King. *cf.* बृहत्प्राजापत्य.

पञ्चादिभिर्बलोपेतैः स्वगृहस्थैर्नभश्चरैः ।
अस्तु पृथ्वीपतिः स्याच्चेद्बलयुक्तैरुताबलैः ॥
सप्तभिस्तादृशैः खेटैर्नृपो भवति निश्चयात् ।

Also बृहज्जातक

उच्चस्वत्रिकोणगैर्बलस्थैस्त्र्याद्यैर्भूपतिवंशजा नरेन्द्राः ।
पञ्चादिभिरन्यवंशजाता हीनैर्वित्तयुता न भूमिपालाः ॥
कुलसमकुलमुख्यबन्धुपूज्या धनिसुखिभोगिनृपाः स्वभैकवृद्ध्या ।
परविभवसुहृत्स्वबन्धुपोष्या गणपबलेशनृपाश्च मित्रभेषु ॥

Śloka 7. (*First half*). *cf.* फलदीपिका

नीचारिगृहमपहाय वित्तसंस्थो लग्नेशः सह कविना बली च भूपम् ॥

Also जातकादेश

शत्रुनीचगृहं त्यक्त्वा कुटुम्बस्थः सभार्गवः ।
लग्नेश्वरो बली यत्र स नरः पृथिवीपतिः ॥

From the two parallel passages above given, it will be seen that Venus and the lord of the Lagna should both be in the 2nd bhava. The text lends itself also to the above interpretation and it may preferably be rendered thus : "When Venus together with the lord of the Lagna, who is also strong, is in the 2nd **भाव** which is neither the planet's (Venus') depression sign, nor is owned by an enemy, the person born will become a King."

(Latter half). cf. **सारावली**

अधिमित्रांशगश्चन्द्रो दृष्टो दानवमन्त्रिणा ।
अनिशं कुरुते लक्ष्मीस्वामिनं भूपतिं नरम् ॥

Also **जातकाभरण**

नक्षत्रनाथोऽप्यधिमित्रभागे शुक्रेण दृष्टो नृपतिं करोति ।
स्वांशाधिमित्रांशगतोऽथवा स्याज्जीवेन दृष्टः कुरुते नृपालम् ॥

Sloka 8. (First quarter). cf. **जातकादेश**

मीने मीनांशके लग्ने शुक्रे जातो नृपो भवेत् ॥

(Second quarter). cf. **सारावली**

लग्नाधिपतिः स्वोच्चे पश्यन्मृगलाञ्छनं नृपं कुरुते ।
बहुगजतुरगबलौघैः क्षपितविपक्षं महाविभवम् ॥

(Latter half). cf. Sloka 48, *infra.*

Sloka 9. (First half). According to **सारावली** any planet in the 9th **भाव** identical with its exaltation sign will bestow Kingship if the lord of that bhava occupies or aspects it and two other planets are in their exaltation signs as well. *cf.*

तपोगृहं यस्य भवेत्तदुच्चकं ग्रहेण तेनाथ युतं निरीक्षितम् ।
ग्रहद्वयं स्वोच्चगतं यदा भवेत्तदा कुटुम्बी नियतं महीपतिः ॥

(Second half). cf. sloka 47, *infra.*

Also **जातकादेश**

लग्नं विहाय केन्द्रे सकलकलापूरितो निशानाथः ।
भार्गवदेवगुरुभ्यां दृष्टो राजा भवेन्नियतम् ॥

Also सर्वार्थचिन्तामणि

निशाकरे केन्द्रगते विलग्नं त्यक्त्वा त्रिकोणे यदि जीवदृष्टे ।
शुक्रेण दृष्टे बलपूर्णयुक्ते जातो नरो भूपतिभाग्यतुल्यः ॥

This yoga finds an exception when Taurus happens to be the Lagna with the Moon there. *cf.* सारावली.

वृषे शशी लग्नगतः सुपूर्णः सितेन दृष्टो वणिजि स्थितेन ।
बुधोऽपि पातालगतो यदि स्यात्तदान्यजातो भवति क्षितीशः ॥

For a person born in a royal family no aspects are required to place him on the throne. *cf.* सारावली.

लग्नं विहाय केन्द्रे सकलकलापूरितो निशानाथः ।
विदधाति महीपालं विक्रमधनवाहनोपेतम् ॥

Sloka 10. (*First quarter*). *cf.* फलदीपिका.

एकोऽप्युच्चक्षेत्रगो मित्रदृष्टः कुर्याद्भूपं मित्रयोगाद्धनाढ्यम् ।

Also सारावली

एक एव खगः स्वोच्चे वर्गोत्तमगतो यदि ।
बलवान् मित्रसंदृष्टः करोति पृथिवीपतिम् ॥

(*Latter half.*) See notes under sloka 6, *supra*. According to Varahamihira, one or two planets in their exaltation, one of them being in the Lagna and the Moon in **कटक**, will create Rajayoga. 16 such Rajayogas are possible under the above combination. *cf.* बृहज्जातक.

द्व्येकाश्रितेषु तथैकतमे विलग्ने स्वक्षेत्रगे शशिनि षोडश भूमिपाः स्युः ॥

Ordinarily 3 or 4 planets in their exaltation will make a person born in a royal family a King. Five or more planets in exaltation will make any person a King. *cf.* बृहत्प्राजापत्य.

त्रिभिर्ग्रहैश्चतुर्भिर्वा स्वोच्चस्थैर्नृपवंशजः ।
नृपः स्यात्पञ्चषैरन्यवंशजातोऽपि मानवः ॥

But there are other special combinations under which 3, 4, 5 or more planets may not be in their exaltation signs and yet the person born attains royalty. The author deals with several such exceptions to the said ordinary yogas handed down by tradition which are difficult to be observed except by men of extraordinary talents.

Sloka 11. A manuscript copy reads the first quarter as follows:

सर्वे चोपचयस्थिताः खलखगाः सौम्या विलग्नस्थिताः ।

Probably this is the correct reading. The translation will then be, "If all the malefic planets be in the उपचय houses and the benefic ones in the 1st or the 10th भाव, the person born will be a cruel king quelling his numerous foes."

The author desires that malefics should be in the उपचय places *excepting the 10th* as the undermentioned quotation from माण्डव्यजातक makes it clear.

सकलसौम्यखगाश्च निजोच्चगास्तनुधनात्मजसौख्यगतामलाः ।
अरिपराक्रमलाभगताः खला विजयते जगतीं परमायुषः ॥

(*Latter half*). *cf.* सारावली.

करोत्युत्कृष्टोद्यद्दिनकृदमृताभीशुसहितः
स्थितस्तादृ*ग्रूपं सकलनयनानन्दजननः ।
अपूर्वोयं स्मृत्या नयनजलसिक्तोऽपि सततं
रिपुस्त्रीशोकाग्निर्ज्वलति हृदयेऽतीव सुतराम् ॥

* "If placed in a similar position, *i.e.* in the 7th house," has to be understood from यदास्ते in the sloka previous to this in सारावली.

Sloka 12. (*First half*). *cf.* फलदीपिका.
भौमश्चेदजहरिचापलग्नसंस्थो पृथ्वीशं कलयति मित्रखेटदृष्टः ॥

(*Latter half.*) *cf.* Sloka 49 *infra.* Also सारावली

जीवनिशाकरसूर्याः पञ्चमनवमतृतीयगा वक्रात् ।
यदि भवति तदा राजा कुबेरतुल्यो धनैर्वासौ ॥

Sloka 13. *cf.* जातकाभरण
चेत् खेचरो नीचगृहं प्रयातस्तदीश्वरश्चापि तदुच्चनाथः ।
केन्द्रस्थितौ तौ भवतः प्रसूतौ प्रकीर्त्तितौ भूपतिसंभवाय ॥

Sloka 15. In the third line of the translation after the words "or a friendly Rasi," add "or has attained a **पारावतांश**".

cf. **सर्वार्थचिन्तामणि**

कर्मेशे रन्ध्रभावस्थे स्वोच्चमित्रांशसंयुते ।
पारावतांशके वाऽपि राजराजो भवेन्नरः ॥

Sloka 16. (*Latter half*). *cf.* **सर्वार्थचिन्तामणि**

भाग्याधिपसमायुक्तनवांशाधिपतौ सुखे ।
पुत्रस्थानं गते वाऽपि नृपश्रेष्ठो भवेन्नरः ॥

Sloka 18. (*First half*). *cf.* **सर्वार्थचिन्तामणि**

लग्ने चन्द्रे गुरौ सौख्ये कर्मस्थे भृगुनन्दने ।
स्वोच्चस्वर्क्षस्थिते मन्दे नृपतुल्यो भवेन्नरः ॥

Sloka 19. (*Latter half*). *cf* **सर्वार्थचिन्तामणि**

माने राहौ भवेन्मन्दे भाग्यनाथेन वीक्षिते ।
लग्नेशे नीचखेटे नायुते नृपसमो भवेत् ॥

Sloka 20. *cf.* **सर्वार्थचिन्तामणि**

त्रयो वा द्वौ खगौ वाऽपि चत्वारो नीचसंयुताः ।
शुभषष्ठ्यंशसंयुक्ताः स्वोच्चांशे वा धरापतिः ॥

Sloka 21. The first 3 quarters of this sloka are also capable of being interpreted thus:

"If the lords of (1) the 10 and 9th houses counted from the Lagna, (2) the 10th and 9th houses counted from the 9th house and (3) the 10 and 9th houses reckoned from the 10th house be in conjunction, occupy each a sign owned by the other, or occupy mutually aspecting Kendras, or be associated (at the same time) with the lord of the second house, the person born will be wealthy. *cf.* **फलदीपिका**.

कर्मेशो नवमगतश्च भाग्यनाथो मध्यस्थो भवति नृपो जनैः प्रशस्तः ॥

Out of the 12 yogas caused by the relationship of the lords of any two successive houses out of the 12 ones, our author describes here the 3 Rajayogas.

The 12 yogas are:

(1) लाभ	by the relationship of the lords of the	1st & 2nd houses
(2) राजभृत्य	do	2nd & 3rd ,,
(3) चमूपक	do	3rd & 4th ,,
(4) अमात्य	do	4th & 5th ,,
(5) दारुणं कर्म	do	5th & 6th ,,
(6) राजयोग	do	6th & 7th ,,
(7) प्रियामृतिः	do	7th & 8th ,,
(8) भाग्यव्ययम्	do	8th & 9th ,,
(9) राजयोग	do	9th & 10th ,,
(10) भूमिद्रव्यम्	do	10th & 11th ,,
(11) ऋणव्ययम्	do	11th & 12th ,,
(12) वित्तहानि	do	12th & 1st ,,

cf. पराशर

लग्नवित्तौ स्वदुश्चिक्यौ त्रितुर्यौ तुर्यपञ्चमौ ।
द्विषात्मजौ षष्ठमारौ स्त्रीरन्ध्रौ मृतिभाग्यकौ ॥
धर्मकर्मौ खलाभौ च रिःफलाभौ तनुव्ययौ ।
पुष्कला लाभयोगाद्यं राजभृत्यं चमूपकम् ॥
अमात्यं दारुणं कर्म राजयोगं प्रियामृतिम् ।
भाग्यव्ययं राजयोगं भूमिद्रव्यमृणव्ययम् ॥
वित्तहानिर्द्वादशैते योगा वै सर्वदा स्मृताः ॥

The relationship between planets is of four kinds:

1 Each one occupying the other's house or Kendra or Kona.

2 Both planets aspecting each other.

3 Any one of the two planets aspecting the other.

4 Both planets occupying the same house or Varga, etc.

cf. पराशर

प्रथमः स्थानसम्बन्धो दृष्टिजस्तु द्वितीयकः ।
तृतीयस्त्वेकतो दृष्टिः स्थित्येकत्र चतुर्थकः ॥
अन्योन्यगौ तथा स्वे स्वे संयुतावन्यभे स्थितौ ।
पूर्णेक्षितौ मिथो वाऽपि चैकवर्गगतौ यदा ॥

The association of the lords of the Kendra and Kona places is capable of producing Rajayogas.

cf. जातकचन्द्रिका

केन्द्रत्रिकोणपतयः संबन्धेन परस्परम् ।
इतरैरप्रसक्ताश्चेद्विशेषफलदायकाः ॥

Also

त्रिकोणाधिपयोर्मध्ये संबन्धो येन केन चित् ।
केन्द्राधिपोऽतिबलिनो भवेद्यदि स योगकृत् ॥

Also पराशर

अथातः संप्रवक्ष्यामि राजयोगादिकं परम् ।
ग्रहाणां स्थानभेदेन राशिदृष्टिवशात्फलम् ॥
तपःस्थानाधिपो मन्त्री मन्त्राधीशो विशेषतः ।
उभावन्योन्यसंदृष्टौ जातश्चेदिह राज्यभाक् ॥
यत्र कुत्रापि संयुक्तौ तौ वाऽपि समसप्तमौ ।
राजवंशोद्भवो बालो राजा भवति निश्चितम् ॥
वाहनेशस्तथा माने मानेशो वाहने स्थितः ।
बुद्धिधर्माधिपाभ्यां तु दृष्टौ चेदिह राज्यभाक् ॥
सुतेशकर्मेशसुखेशलग्ननाथा यदा धर्मपसंयुताश्चेत् ।
नृपोन्तरश्चेदिह वारणाढ्यः स्वतेजसा व्याप्तदिगन्तरालः ॥
सुखकर्माधिपौ चैव मन्त्रिनाथेन संयुतौ ।
धर्मेशेनाथवा युक्तौ जातश्चेदिह राज्यभाक् ॥
सुतेश्वरो धर्मपसंयुतश्चेल्लग्नेश्वरेणापि युतौ विलग्ने ।
सुखेऽथवा मानगृहेऽथवा स्याद्राज्याभिषिक्तो यदि राज्यवंशः ॥
धर्मस्थाने गुरुक्षेत्रे स्वगृहे भृगुसंयुते ।
पञ्चमाधिपसंयुक्ते जातश्चेदिह राज्यभाक् ॥
निशार्द्धाच्च दिनार्द्धाच्च परं सार्द्धद्विनाडिका ।
शुभो तदुद्भवो राजा धनी वा तत्समोऽपि वा ॥
चन्द्रः कविं कविश्चन्द्रं पश्यत्यपि तृतीयगः ।
शुक्राच्चन्द्रे ततः शुक्रे तृतीये वाहनार्थवान् ॥

Also भावकुतूहल

बली पुण्यस्वामी दशमभवनाधीशभवने
तपः स्वाम्यागारे भवति दशमेशोऽपि भविनाम् ।

तदा गर्जद्दन्तावलनिकरघण्टाघनरवै-
र्दिगन्तं वित्रस्ताविजयगमने यात्यरिगणः ॥
यदा पुण्यस्वामी दशमभवने पुण्यभवने
बली कर्माधीशो भवति भविनामेव जनने ।
समुद्रान्तं कीर्त्तिर्विजयगमने वैरिपटली
धनुर्ज्याटङ्कारैर्भजति चकिताभीतिपदवीम् ॥
यदा राज्यस्वामी नवमसुतकेन्द्रेऽर्थभवने
बलाक्रान्तो यस्य प्रभवति स वीरो नरवरः ।
सदा काव्यालापी नवमणिकलापी बहुबली
तुरङ्गालीदन्तावलकलभगन्ता धनपतिः ॥

In these cases it is not very necessary that the lords of the Kendras and Konas should be two different planets. One planet may be the lord of two Kendras or a Kendra and a Kona and yet a good result will be produced though not to the same extent as when they are owned by two separate planets. *cf.* जातकचन्द्रिका.

केन्द्रत्रिकोणाधिपयोरैक्ये ते योगकारकाः ।
अन्यत्रिकोणपतिना संबन्धो यदि किंपुनः ॥

Sloka 22. cf. सर्वार्थचिन्तामणि

षड्भिर्ग्रहैरुच्चसमन्वितैः स्याद्राजाधिराजो बहुदेशभर्त्ता ।
उच्चस्थितैः पञ्चभिरत्र राजा शक्त्यान्वितो देवगुरौ विलग्ने ॥

Also जातकाभरण

नभश्चराः पञ्च निजोच्चसंस्था यस्य प्रसूतौ स तु सार्वभौमः ॥

The author suggests the inference that, in the case of five planets in exaltation, one of them must be in the Lagna. and that preferably Jupiter. In the case of six planets in exaltation, it is not necessary that one of them snould be in the Lagna. One, two ,three or four planets in exaltation alone do not make a person of ordinary birth a king. *cf.* कूटस्थः

सुखिनः प्रकृष्टकार्या राजप्रतिरूपकाश्च राजानः ।
एकद्वित्रिचतुर्भिर्जायन्तेऽतः परं दिव्याः ॥

Also **बृहत्प्राजापत्य**

त्रिभिर्ग्रहैश्चतुर्भिर्वा स्वोच्चस्थैर्नृपवंशजः ।
नृपः स्यात्पञ्चषैरन्यवंशजातोऽपि मानवः ॥

All the works on astrology are unanimous in the above view.

According to Yavana and others, three or four malefic planets in their exaltation makes the king cruel. *cf.*

तैः क्रूरैर्भवति प्रायः क्रूरात्मान्यैस्तथाऽन्यथा ।
अशक्यो नियमः सौम्य कर्मभावानुरोधतः ॥

Also **मणित्थ**

पापैः पापमतिःस्यात् स्वोच्चगतैर्धर्मवांस्तथा सौम्यैः ।
व्यामिश्रैर्मिश्रमतिः पृथ्वीशो जायते मनुजः ॥

From the above, it is also clear that benefic planets in exaltation make the king virtuous and that if the planets in exaltation which go to raise him to kingship be both malefic and benefic, he will be of a mixed nature.

But **जीवशर्मा** says that malefics in exaltation do not bestow royalty on the person born under their auspices; he will be wealthy and at the same time cruel, angry and quarrelsome. *cf.*

पापैरुच्चगतैर्जाता न भवन्ति नृपा नराः ।
किन्तु वित्तान्वितास्ते स्युः क्रोधिनः कलहप्रियाः ॥

But **वराहमिहिर** who agrees with the majority has laid down that planets in exaltation do not deprive the person of royalty for the simple reason of their being malefics. If they have the power of conferring royalty on the person they will certainly do so, but he will be ill-natured because they who helped him to the throne are malefics. *cf.* **बृहज्जातक.**

प्राहुर्यवनाः स्वतुङ्गगैः क्रूरैः क्रूरमतिर्महीपतिः ।
क्रूरैस्तु न जीवशर्मणः पक्षे क्षित्यधिपः प्रजायते ॥

वराहमिहिर has confirmed his above conclusion by the following sloka in his **लघुजातक.**

त्रिप्रभृतिभिरुच्चस्थैर्नृपवंशभवा भवन्ति राजानः ।
पञ्चादिभिरन्यकुलोद्भवाश्च तद्वत्त्रिकोणगतैः ॥

The above is the general rule. But there are exceptional circumstances in which only one planet in exaltation may make a person of ordinary birth a King.

32 cases of Rajayogas are stated to arise, 16 when all or any three of the four planets Mars, Saturn, Sun and Jupiter are exalted, one of the four or three above mentioned being in the Lagna at the time, and the other 16 when any two or one of the above named four planets occupy exaltation positions identical with the Lagna Rasi and the Moon is in Kataka.

cf. बृहज्जातक

वक्रार्कजार्कगुरुभिः सकलैस्त्रिभिश्च स्वोच्चेषु षोडश नृपाः कथितैकलग्ने ।
द्व्येकाश्रितेषु च तथैकतमे विलग्ने स्वक्षेत्रगे शशिनि षोडश भूमिपाः स्युः ॥

Also होरामकरन्द

स्वोच्चस्थै रविजीववक्रशनिभिः सर्वैस्त्रिभिर्वा क्रमात्
तेषामन्यतमोदये क्षितिभुजां योगाः स्मृताः षोडश ।
अन्येऽप्युच्चगयोर्द्वयोः कुलिशगे चन्द्रे तदेकोदये
भूपाः षोडश तुङ्गगे तनुगतेनैकेन तन्मध्यतः ॥

Sloka 23. (*First half*). Varahamihira thus describes a Rajayoga when Saturn is in कुंभ identical with the rising sign.

यमे कुम्भेऽर्केऽजे गवि शशिनि तैरेव तनुगै-
र्नियुक्सिंहालिस्थैः शशिजगुरुवक्रैर्नृपतयः ।

Some books read नृयुक् for नियुक् in the above quotation. नियुक् means मीन. *cf.* बृहच्छौनकहोरा.

अन्त्योऽत्रानिमिषो मत्स्ययुगात्मत्वात्तदाह्वयः ।
मत्स्याह्वयश्च बोध्योऽयं कथ्यते नियुगित्यपि ॥

In support of the above, we have the above three yogas described thus in स्कन्दहोरा.

सूर्ये मेषं गते चन्द्रे वृषभं प्राप्य तिष्ठति ।
कुंभस्थे सूर्यपुत्रे च मेषादिष्टविलग्नताम् ॥

प्राप्तेषु बुधगुर्वारैर्मीनलेयालिगैस्त्रयः ।
राजानः परिमन्तव्या मन्यते न मनीषिभिः ॥

And प्राजापत्य

सूर्ये मेषं गते लग्ने तस्मिन्नुक्षघटस्थयोः ।
चन्द्रसूर्यजयोर्जातो भौमसौम्येन्द्रनेतृभिः ॥
कीटमीनमृगेन्द्रस्थैः पृथिवीपालको भवेत् ।
इत्येको द्वयमन्यच्च श्रृणु मे गदतो द्वयम् ॥

But the reading "नृयुक्" is also not without authorities. We have the following from कौशिकहोरा.

अजवृषकुंभस्थेषु द्युमणीन्दुशनैश्चरेषु तनुगैस्तैः ।
वीणालेयालिस्थेष्विन्दुजगुरुभूमिजेषु राजानः ॥

For accepting 'नृयुक्' as the correct-reading our only authority is पूर्वशास्त्र even which in this case is but scanty.

From the above quotations from बृहत्प्राजापत्य, etc., it will be seen that the Sun and the Moon are the only two planets in exaltation while Saturn is in Kumbha identical with the Lagna and Mars, Mercury and Jupiter are in वृश्चिक, मीन and सिंह respectively and yet the yoga is declared. That this result will be all the more certain when four planets are in exaltation signs goes without saying. *cf.* माण्डव्य.

कुंभे जन्मनि लग्नगे(सौरि विलग्नगे) गुरुयुते द्रव्यस्थिते भार्गवे
दुश्चिक्ये द्युमणौ व्यये यदि कुजे चन्द्रेण युक्ते बुधे।
सौख्यस्थे यदि पुत्रभावविगते राहौ तदा मानवो
जातोऽयं जगतीतले नृपवरः संपूजितो वृत्रहा ॥

In the above quotation, the Sun, the Moon, Mars and Venus are in their exaltation signs.

(*Second half.*) "चन्द्रपुत्रे" in this half of the sloka is perhaps an error or an interpolation for भूमिपुत्रे. वराहमिहिर gives a case in which Mars being in मेष indentical with the rising sign and Jupiter in कटक will create a Rajayoga.

The same position will create another Rajayoga if **कटक** be the Lagna instead of **मेष**.

cf. **बृहज्जातक**

अजे सारे मूर्त्तौ शशिगृहगते चामरगुरौ
सुरेड्ये वा लग्ने धरणिपतिरन्योऽपि गुणवान् ।

The position of Mercury in **मेष** identical with the rising sign as stated in the text is rather insufficient to produce a Rajayoga. But we shall not venture to sit in judgment over the author and only suggest the probability of an error or interpolation in the text.

Sloka 24. (*First half*). *cf.* the latter half of sloka 62 in Adhyaya II, *supra.*

Also **सारावली**

कुमुदगहनबन्धुं श्रेष्ठमंशं प्रपन्नं
यदि बलसमुपेतः पश्यति व्योमचारी ।
उदयभवनसंस्थः पापसंज्ञो न चैवं
भवति मनुजनाथः सार्वभौमः सुदेहः ॥

Also **फलदीपिका**

निषादमपि पार्थिवं जनयतीन्दुरुच्चस्वभ-
स्थितग्रहनिरीक्षितो धवलकान्तिजालोज्वलः ।
विहाय तनुभं कलास्फुरितपूर्णकान्तिः शशी
चतुष्टयगतो नृपं जनयति द्विपाश्वान्वितम् ॥

Sloka 26. In the third **पाद** "**मृगमुखभवनस्थे**" appears to be a better reading, and the translation would then be "and Saturn is in **मकर**."

Three Rajayogas are mentioned by **वराहमिहिर** and others as described below:

(1) The Moon and Jupiter in **धनुस्**, Mars in **मकर** and Venus in **मीन** identical with the Lagna.

(2) The Moon and Jupiter in **धनुस्**, Mars in **मकर** and Mercury in **कन्या** identical with the Lagna.

(3) The Moon, Jupiter and Venus in धनुस्, Mars and Saturn in मकर and Mercury in कन्या identical with the Lagna.

Of the above three yogas, the third yoga is the best and our author would appear to have described it as the sloka is capable of that interpretation. The translation will then be "When the Moon in conjunction with Jupiter and Venus occupies धनुस्, Mercury is in कन्या identical with the Lagna and Mars and Saturn are in मकर, &c." *cf.* बृहज्जातक.

हये सेन्दौ जीवे मृगमुखगते भूमितनये
स्वतुङ्गस्थौ लग्ने भृगुजशशिजावत्र नृपती ।
सुतस्थौ वक्रार्को गुरुशशिसिताश्चापि हिबुके
बुधे कन्यालग्ने भवति हि नृपोऽन्योऽपि गुणवान् ॥

A further suggestion is also thrown out by the author by placing the word गुरु first in the group "गुरुसितयुतचन्द्रे." He could have very well said "सितगुरुयुतचन्द्रे." But he did not do so apparently with a particular object, *viz.*, in order to make the readers understand that Jupiter alone, (without the association of Venus or the Moon), in that position and in the event of the other combinations being fulfilled, will make the person equal to a King of that description which Venus and the Moon are unable to do without the association of Jupiter. *cf.* स्कन्दहोरा.

यस्य कन्याभवेल्लग्नं तद्गते चन्द्रनन्दने ।
भौमे मृगमुखस्थे च जीवेन्द्वोश्च हयस्थयोः ॥

स राजा मीनभं लग्नं यस्य काव्येऽत्र तिष्ठति ।
भौमे मृगमुखस्थे च जीवेन्द्वोश्च हयस्थयोः ॥

सुतरां स भवेद्राजा कन्यालग्नसमुद्भवः ।
मकरं गतयोर्मन्दभौमयोर्विदि तद्गते ॥

गुरुः शशिसितौ चापि हिबुके चेत्स मानवः ।
प्रभूतगुणसंयुक्तो जायते पृथिवीपतिः ॥

Also बृहत्प्राजापत्य

बुधः कन्यागतो लग्ने कन्यायां सुतभं गते ।
भौमे समन्दे चापस्था गुरुः शशिसितावपि ॥
एते त्रयश्चेज्जनयेन्नृपतिं बहुभिर्गुणैः ।
शौर्यौदार्यादिभिर्युक्तं ज्योक्चेदेकोऽत्र तत्समम् ॥

Sloka 27. (First half). In this yoga, the rising sign must be मकर. *cf.* बृहज्जातक.

मृगे मन्दे लग्ने सहजरिपुधर्मव्ययगतैः
शशाङ्काद्यैः ख्यातः पृथुगुणयशाः पुंगलपतिः ।

Also सारावली

मृगे मन्दे लग्ने कुमुदवनबन्धुश्च तिमिग-
स्तथा कन्यां त्यक्त्वा बुधभवनसंस्थः कुतनयः ।
स्थितो नार्यां सौम्यो धनुषि सुरमन्त्री यदि भवेत्
तदा जातो भूपः सुरपतिसमः प्राप्तमहिमा ॥

(Second half). *cf.* सारावली.

उदयति मीने शशिनि नरेन्द्रः सकलकलाढ्यः क्षितिमुत उच्चे ।
मृगपतिसंस्थे दशशतरश्मौ घटधरगे स्याद्दिनकरपुत्रे ॥

Sloka 28. *cf.* सारावली.

कुजे विलग्ने च शशी यदाऽस्ते स्फुटांशुसंभारविराजिताङ्गः ।
राजा तदा शत्रुभिरप्रधृष्यो वेदार्थविद्धेतुशतानुवादैः ॥

Sloka 29. *cf.* सारावली.

वर्गोत्तमे त्रिप्रभृतिग्रहेन्द्राः केन्द्रस्थिता नो शुभसंयुताश्च ।
नोरूक्षधूमोनविवर्णदेहाः कुर्वन्ति राज्ञः प्रसवं प्रसन्नाः ॥

Sloka 30. *cf.* सारावली.

शीर्षोदयर्क्षेषु गताः समस्ता नीचारिवर्गे स्वगृहे शशाङ्कः ।
सौम्येक्षितोऽन्यूनकलो विलग्ने दद्यान्महीं रत्नगजाश्वपूर्णाम् ॥

Sloka 31. This as well as the two succeeding slokas are from सारावली. *cf.* बृहज्जातक.

कुजे तुङ्गेऽर्केन्द्वोर्धनुषि यमलग्ने च कुपतिः
पतिर्भूमेश्चान्यः क्षितिसुतविलग्ने सशशिनि ।

सचन्द्रे सौरेऽस्ते सुरपतिगुरौ चापधरगे
स्वतुङ्गस्थे भानावुदयमुपयाते क्षितिपतिः ॥

The above quotation treats of four Rajayogas, but our author treats of the Rajayoga stated in the first quarter only.

cf. Also स्कन्दहोरा

लग्नस्थे भास्वतः पुत्रे सूर्येन्द्वोर्धनुषिष्ठयोः ।
मकरस्थः कुजः कुर्याद्भूपालमतिपौरुषम् ॥

and लघुप्राजापत्य

धनुर्धरगते सूर्ये सचन्द्रे नक्रगः कुजः ।
अविशेषेण राजानं कुर्याल्लग्नगते शनौ ॥

The reader cannot have failed to observe that the Sun is strong in a quadruped sign. His own as well as his exaltation signs are both quadruped ones. The second half of धनुस् is also a quadruped sign and the Sun is stronger there than in the first half.

Sloka 34. The following is the yoga given in **सारावली** for the same effect:

रविर्नभःस्थः स्वत्रिकोणगोऽपि वा स्वराशिसंस्थाः सितजीवचन्द्राः ।
तृतीयषष्ठायगताश्च चन्द्रात् कुर्वन्ति गोपालमिह क्षितीशम् ॥

Sloka 35. This as well as the next four slokas are taken from सारावली.

The yoga mentioned in this sloka is applicable only to persons born in the royal family.

Sloka 37. According to बृहज्जातक, बृहत्प्राजापत्य and other works, the yoga is said to result from the following combination: Mercury in Kanya identical with the Lagna, Jupiter and the Moon in the 7th house therefrom (*i.e.* Meena), Venus in the 10th (*i.e.* Mithuna) and Mars and Saturn in the 5th (*i.e.* in Makara). *cf.* बृहज्जातक.

स्वोच्चसंस्थे बुधे लग्ने भृगौ मेषूरणाश्रिते ।
सजीवेऽस्ते निशानाथे राजा मन्दारयोः सुते ॥

Also बृहत्प्राजापत्य

बुधः कन्यागतस्तत्र जातं सिंहगते रवौ ।
चन्द्रे सजीवे मीनस्थे मिथुनस्थे च भार्गवे ॥
मकरं गतयोर्भौममन्दयोः पृथिवीपतिम् ।
कुर्यादसंशयं सौम्य गुणवन्तं यशस्विनम् ॥

कुलीरे सुखराशिगेऽमले in the text appears therefore to be an error.

Sloka 45. cf. सारावली

केन्द्रे विलग्ननाथः सुहृद्भिरभिवीक्षितो विहगैः ।
लग्नस्थिते च सौम्ये भूपतिरिह जायते पुरुषः ॥

Sloka 46. cf. सारावली

